Downloaded from https:// www.studiestoday.com

कक्षा 9

# काव्यकौमुदी (प्रथमोभागः)

**प्रवेशिका**

संस्कृत-द्वितीयपत्रम्

काव्यकौमुदी (प्रथमोभागः)
कक्षा 9

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# काव्यकौमुदी (प्रथमो भागः)

(प्रवेशिका-नवमकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

**(संस्कृत-द्वितीयपत्रम्)**

**कक्षा–9**

**माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यपुस्तक–लेखन–समितिः

**पुस्तकम् –** काव्यकौमुदी (प्रथमो भागः)
प्रवेशिका-नवमकक्षायै स्वीकृतं पाठ्यपुस्तकम्


संयोजकः – **बहादुरसिंह गुर्जरः**
सहायक-निदेशकः
संस्कृतशिक्षाविभागः, राजस्थानम्, जयपुरम्

लेखकगणः –

1. **डॉ. जयप्रकाश मिश्रः**
   व्याख्याता (संस्कृतवाङ्मयम्)
   राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः महापुरा, जयपुरम्

2. **डॉ. धर्मसिंह गुर्जरः**
   व्याख्याता (व्याकरणशास्त्रम्)
   राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः बौंली, सवाईमाधोपुरम्

3. **डॉ. शिवचरण शर्मा**
   प्रधानाचार्यः
   राजकीय-वरिष्ठोपाध्याय-संस्कृतविद्यालयः, बानूड़ा, सीकरम्


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यक्रम–निर्माण–समितिः

काव्यकौमुदी (प्रथमो भागः)

**(प्रवेशिका कक्षा–९)**

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–

1. श्री बहादुर सिंह गुर्जर
सहायक–निदेशक, संस्कृत–शिक्षा, राजस्थान, जयपुर

2. डॉ. नाथूलाल सुमन, पूर्व–संयुक्तसचिव
उच्च–शिक्षा, शासन–सचिवालय, जयपुर

3. श्री योगेन्द्र धामा, व्याख्याता
राजकीय महाविद्यालय, अलवर

4. डॉ. हरिसिंह राजपुरोहित, व्याख्याता,
राजकीय महाविद्यालय, ओसियां, जोधपुर

5. श्री हरिओम गौतम
संभागीय–संस्कृत–शिक्षाधिकारी, भरतपुर–संभाग, भरतपुर

6. श्री रामावतार सिंह, प्रधानाध्यापक,
राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, धौलपुर

7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, डूंगरपुर

8. श्री महेशचन्द्र शर्मा, प्राध्यापक
राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय
कुण्डगेट सावर, अजमेर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रास्ताविकं किञ्चित्.....

अखिलेऽस्मिन् संस्कृतवाङ्मये अभ्युदयनिःश्रेयसप्रदातॄणां मानवोपयोगिनामुपायानां साधुभावानाञ्च सुष्ठु निदर्शनं दृश्यते। **'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथे'**ति वचनमनुसृत्य भारतीयजनानां मौलिककर्तव्यान्तर्गतभारतीयसंस्कृतिसन्दर्भे विद्यालयीयशिक्षापाठ्यक्रमे संस्कृतभाषायाः स्थानं सुरक्षितं वर्तते।

लोके कस्या अपि भाषायाः शिक्षणे श्रवणभाषणाध्ययनलेखनात्मकं चतुर्विधं कौशलमावश्यकं मन्यते। अतः संस्कृतभाषायामध्ययनलेखनभाषणादिभिर्विना छात्राणामपेक्षितं सामर्थ्यं नैव प्रादुर्भवति। संस्कृतपाठ्यपुस्तकेषु जीवनोपयोगिसद्विचाराणां प्रासङ्गिकोपदेशानाम्, नीतितत्त्वानाम्, सुभाषितानाम्, कथामाध्यमेन लोकव्यवहाराणां युगपन्निदर्शनम्, बहुविधानाम् अभ्यासार्थप्रश्नानां पर्याप्तसङ्कलनस्यावश्यकताऽनुभूयते, येन विद्यार्थिनः संस्कृतभाषानैपुण्यं सहजतया प्राप्नुयुः। एतदेव मनसि निधाय संस्कृतशिक्षाविभागस्य विद्यालयेषु संस्कृतशिक्षणार्थं युगानुरूपपाठ्यक्रमनिर्माणं **'माध्यमिक-शिक्षाबोर्ड-राजस्थान, अजमेर'** इत्यस्य निर्देशानुसारं संस्कृतशिक्षाविभागीयविद्यालयेभ्यः **''काव्यकौमुदी''** इत्याख्यं प्रथमभागात्मकं संस्कृतपाठ्यपुस्तकं प्रवेशिका-नवम-कक्षायाः छात्राणां कृते प्रथमप्रसूनरूपेणैतत् प्रस्तूयते।

अत्र छात्राणां कृते पद्यमाध्यमेन कथामाध्यमेन च सदाचार-नीतिशास्त्र-धर्मशास्त्र-मैत्री-परोपकारादीनां सम्यग् ज्ञानार्थं सरलभाषाषया विषया गुम्फिताः सन्ति। अत्र पद्यभागे योगशिक्षा, नारीमहिमा, भीमाष्टकम्, नीतिश्लोकाः, पर्यावरणम्, छन्दांसि, कोशश्च छात्राणामुपकाराय सुललितभाषया सुबोधव्याख्यासहितः प्रस्तुतो विद्यते। एवमेव गद्यभागे झटिति अर्थावबोधनार्थं हितोपदेशस्याङ्गभूतः 'मित्रलाभः' इति नामधेयः कथासङ्ग्रहः प्रसङ्गान्वयव्याख्या-समाससन्धिप्रकृतिप्रत्ययोदिभिः परिपूर्णो वर्तते। एकतः पद्यपाठान् पठित्वा विद्यार्थिनः काव्यरसास्वादनपूर्वकं जीवनोपदेशं प्राप्स्यन्त्यपरतश्च हितोपदेशमाध्यमेन ज्ञास्यन्ति यत्– ज्ञानं विना जीवनं निरर्थकं भवति। विद्यया एव नराः पुरुषार्थचतुष्टयं प्राप्नुवन्ति। विद्याविहीना जनाः पशुवद् भवन्ति। लोभ एव सर्वविधस्य नाशस्य कारणमेतदर्थं प्राणिनो नश्यन्ति। मित्रमन्तरेण प्राणी सर्वत्र आत्मानम् असुरक्षितम् एकाकिनं चानुभवति। आपद्भ्यः संरक्षणार्थं सुहृदेव प्रभुः मन्यते। जीवने सततं पूर्णमनोयोगेन प्रयत्नः करणीयः प्रयत्नं विना मृगराजोऽपि स्वोदरपूर्तिं कर्तुमक्षमो दृश्यते। उक्तञ्च–

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।**

**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥**

अतः शिक्षकसमुदायेन विद्यार्थिवर्गो विद्यार्जनायोद्यमकरणार्थं सततं प्रेरणीयः। अनेन काव्यकौमुदी-नामधेयेन प्रथमभागरूपेण संस्कृतपाठ्यपुस्तकेन छात्राः संस्कृतवाङ्मयस्य परिचयं प्राप्य पुस्तकस्यास्य वैशिष्ट्यञ्चावगम्य संस्कृताध्ययने नूनं सोत्साहं प्रवृत्ता भविष्यन्तीति शम्।

**संयोजकः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यक्रमः

## संस्कृतम् (द्वितीय-पत्रम्)

### (गद्यम्, रचना, पद्यम्, छन्दः, कोषश्च)

पूर्णाङ्काः 100

| बिन्दवः | विषय-वस्तु | अङ्काः |
|---|---|---|
| **1.** | **गद्य-काव्यम्** | **30** |
| (क) | पाठ्यपुस्तकस्य एकस्य गद्यस्य सप्रसंग-व्याख्या | 10 |
| (ख) | भावार्थ-लेखनम् | 5 |
| (ग) | अतिलघूत्तरात्मकाः पञ्च प्रश्नाः | 5 |
| (घ) | लघूत्तरात्मकौ द्वौ प्रश्नौ | 5 |
| (ङ) | कस्यापि एकस्य पाठस्य संस्कृते सारांशलेखनम् | 5 |
| | **पाठाः**<br>(1) प्रस्ताविका<br>(2) मित्रलाभः<br>(3) वृद्ध-व्याघ्रपथिक -कथा<br>(4) कपोत -मूषक -कथा<br>(5) मूषक -परिव्राजक -कथा<br>(6) सञ्चयशील-जम्बुक -कथा | |
| **2.** | **रचना - निबन्धाः, पत्राणि, धातुरूपाणि शब्दरूपाणि च।** | **20** |
| (क) | **निबन्धः**- संस्कृतभाषा, विद्या, सदाचारः, परोपकारः, नारीशिक्षा, पर्यावरणम्, विवेकानन्दः। एतेषु एकः निबन्धः। | 5 |
| (ख) | **पत्रम्** - अवकाशार्थम्, शुल्कमुक्त्यर्थम् , स्थानान्तरण- प्रमाणपत्र- प्राप्त्यर्थम्<br>अथवा<br>मात्रे / पित्रे, भ्रात्रे, मित्राय वा पत्र-लेखनमेकम्। | 5 |
| (ग) | **शब्द-रूपाणि**<br>राम, हरि, गुरु, रमा, नदी, पितृ, मति, फल। | 5 |
| (घ) | **धातु-रूपाणि**<br>भू, पठ्, लिख्, गम्, स्था, दृश्, नम्, पच्, पा, सेव्, याच्, नी, इत्यादि धातूनाम् एतदनुसारं रूपवताम् अन्येषां धातूनाम्, लट्, लोट्, लङ्, लृट्, विधिलिङ् - एतेषु पञ्चलकारेषु अभ्यासः। | 5 |
| **3.** | **पद्य-काव्यम्** | **30** |
| | (क) एकस्य पद्यस्य सप्रसङ्गान्वय-व्याख्या | 10 |
| | (ख) सप्रसङ्ग-भावार्थः (एकस्य पद्यस्य) | 5 |
| | (ग) अतिलघूत्तरात्मकाः पञ्च प्रश्नाः | 5 |
| | (घ) विषय-वस्तु सम्बन्धिनौ लघूत्तरात्मकौ द्वौ प्रश्नौ | 5 |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(उत्तरसीमा च विशंतिः शब्दाः)

(ङ) कृतिः कृतिकारश्च तत्सम्बन्धिनौ लघूत्तरात्मकौ द्वौ प्रश्नौ 5

**पाठाः**

(1) योगशिक्षा – श्री बहादुरसिंह गुर्जरः

(2) नारीशिक्षा– डॉ. सतीश कपूरः

(3) नीतिश्लोकाः – नीतिशतकात्

(4) भीमाष्टकम् – डॉ. श्रीधरभास्करवर्णेकरः

(5) पर्यावरणम् – पं. प्रभुदत्त आत्रेयः

**4. छन्दांसि** **15**

(क) गणलक्षणम्, चिह्नम्, उदाहरणम्, लघु–गुरु–विचारः, गणसूत्रम्, यति–पाद–लक्षणञ्च (तत्सम्बन्धिनौ द्वौ प्रश्नौ) 2

(ख) छन्दसां लक्षणानि 5

(ग) छन्दसाम् उदाहरणानि 5

(घ) छन्दसाम् अपठितोदाहरणेषु छन्दोनिर्धारणम् 3

**पठनीयानि छन्दांसि** आर्या, अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, भुजङ्गप्रयातम्, वंशस्थवृत्तम्, द्रुतविलम्बितम्

**5. कोषः** दैनिक–व्यवहारोपयोगिशब्दानां ज्ञानम्। एकशतं निर्धारित–शब्दानां ज्ञानम् **5**
(फल–पशु–पक्षि–सम्बन्धि–दैनिकोपयोगि वस्तु–भोजनसामग्री–अध्ययनादि–सम्बन्धिनः शब्दाः)

**निर्धारितपुस्तकम् - काव्यकौमुदी (प्रथमो भागः)** – माध्यमिक शिक्षा बोर्ड, राजस्थान, अजमेर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषयानुक्रमणिका

## पद्यभागः


| पाठ–संख्या | शीर्षकम् | | लेखकः | पृष्ठ–संख्या |
|---|---|---|---|---|
| प्रथमः पाठः | योगशिक्षा | – | बहादुर सिंह गुर्जरः | 1 |
| द्वितीयः पाठः | नारी–महिमा | – | डॉ0 सतीश कपूरः | 5 |
| तृतीयः पाठः | भीमाष्टकम् | – | डॉ0 श्रीधरभास्कर वर्णेकरः | 16 |
| चतुर्थः पाठः | नीतिश्लोकाः (नीतिशतकात्) | – | भर्तृहरिः | 27 |
| पञ्चमः पाठः | पर्यावरणम् | – | पं. प्रभुदत्तशर्मा 'आत्रेयः' | 43 |
| षष्ठः पाठः | छन्दांसि | – | सङ्कलितानि | 52 |
| सप्तमः पाठः | कोशः | – | व्यवहारोपयोगिनः शब्दाः | 64 |


## गद्यभागः

### हितोपदेशः (मित्रलाभः) रचना च


| क्रम–संख्या | अध्यायः | पृष्ठ–संख्या |
|---|---|---|
| 1. | कथासारः | 73 |
| 2. | प्रस्ताविका – प्रथमो भागः | 77 |
| 3. | मित्रलाभः – द्वितीयो भागः | 105 |
| 4. | वृद्धव्याघ्रपथिककथा – तृतीयो भागः | 113 |
| 5. | कपोतमूषककथा – चतुर्थो भागः | 127 |
| 6. | मूषकपरिव्राजककथा – षष्ठो भागः | 154 |
| 7. | सञ्चयशीलजम्बुककथा – सप्तमो भागः | 178 |
| 8. | शब्दरूपाणि धातुरूपाणि च | 197 |
| 9. | प्रार्थनापत्रं, निबन्धाः संख्याज्ञानं च | 210 |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रथमः पाठः

# योगशिक्षा

**बहादुर सिंह गुर्जरः**

**ऊँ सङ्गच्छध्वं संवदध्वं, सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते।।**

**योग–शब्दस्यार्थः –** युज्–समाधौ, युजिर्–योगे युज–संयमने च एतेभ्यः त्रिभ्यः धातुभ्यः च घञ्–प्रत्यये कृते योग–शब्दः निष्पद्यते। तस्यार्थः क्रमशः –समाधिः, संयोगः संयमनञ्च भवति। योगशास्त्रे योग–शब्दस्यार्थः समाधिमूलकः एव।

योगः सम्पूर्णं जीवनदर्शनम्, आत्मानुशासनम्, विशिष्टजीवनपद्धतिः च अस्ति। योगः व्याधिमुक्तस्य समाधियुक्तस्य च जीवनस्य सङ्कल्पना वर्तते। योगः आत्मदर्शनस्य परमात्मप्राप्तेश्च परमा विद्या विद्यते। योगमाध्यमेन प्राणवायुं वशीकृत्य सम्पूर्णम् आरोग्यं प्राप्तुं शक्यते।

परमयोगी शिवः योगशास्त्रपरम्परायां प्रथमतया परिगण्यते। महाभारते योगशास्त्रस्य आदिप्रवर्तकरूपेण हिरण्यगर्भः स्मर्यते। यथा –

**साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।**
**हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः।।**

पूर्वतनानामाचार्याणां योगशास्त्रविषयकलिखितसाहित्याभावे पातञ्जलयोगसूत्रकारो महर्षिः पतञ्जलिरेव योगशास्त्रप्रणेता मन्यते।

योगसूत्रस्य प्रथमसूत्रे प्रयुक्तानुशासनपदेन महर्षिपतञ्जलिरपि निर्दिशति यत्– पूर्वोपदिष्टसिद्धान्तानां एव सर्जनबद्धतात्र दृश्यते तथापि पतञ्जलिमते–**'योगश्चित्तवृत्तिनिरोधः'** अर्थात् चित्तस्य वृत्तीनां निरोधः एव योगः। चित्तवृत्तिनिरोधः अभ्यासेन वैराग्येन च सम्भवति। यथा–

**अभ्यासवैराग्याभ्यां च तन्निरोधः।**

चित्तवृत्तिनिरोधरूपं योगत्वं प्राप्तुं निरन्तरं दीर्घकालपर्यन्तं श्रद्धापूर्वकं अभ्यासस्य साधनायाः च आवश्यकता भवति। यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः।**

स एवंविधो योगः अष्टसोपानात्मको वर्तते। तानि अष्ट सोपानानि यथा –

| | | |
|---|---|---|
| 1. यमः | 2. नियमः | 3. आसनम् |
| 4. प्राणायामः | 5. प्रत्याहारः | 6. धारणा |
| 7. ध्यानम् | 8. समाधिः। | |

**तत्र यमाः पञ्च –**

| | | |
|---|---|---|
| (1) सत्यम् | (2) अहिंसा | (3) अस्तेयम् (अचौर्यम्) |
| (4) ब्रह्मचर्यम् | (5) अपरिग्रहः (असङ्ग्रहः) | |

**नियमाः अपि पञ्च –**

| | | |
|---|---|---|
| (1) शौचम् (बाह्याभ्यन्तर–शुद्धिः) | (2) सन्तोषः | (3) तपः |
| (4) स्वाध्यायः | (5) ईश्वरप्रणिधानम् (भक्तिपूर्वकम् ईश्वरं प्रति समर्पणम्)। | |

सर्वप्रथमं पञ्चानां यमानां पञ्चानां नियमानां च पालनपूर्वकम् आसनसिद्धिः करणीया भवति। ततः नाडीशुद्धिं विधाय प्राणायामस्य अभ्यासः करणीयः । प्राणायामस्य परिभाषा योगदर्शने निम्नलिखितसूत्ररूपेण प्राप्यते–

**'तस्मिन् सति श्वास–प्रश्वासयोर्गतिविच्छेदः प्राणायामः।**

अर्थात् आसनसिद्धौ श्वास–प्रश्वासयोः गतेः लयबद्धीकरणम् एव प्राणायामः। सारांशतया वक्तुं शक्यते यत् श्वास–प्रश्वासयोः नियन्त्रणमेव प्राणायामः। त्रिषु लोकेषु सर्वं प्राणवशे एव अस्ति। यथोक्तम् –

**प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्।**
**मातेव पुत्रान् रक्षस्व, श्रीश्च प्रज्ञां च विधेहि नः।।**

प्राणायामेन प्राणानां विस्तारः अथवा प्राणेषु नियन्त्रणं भवति। तत्क्रमस्तु यथा –

**यमैश्च नियमैश्चैव आसनैश्च सुसंयतः।**
**नाडीशुद्धिं च कृत्वादौ प्राणायामं समाचरेत्।।**

(शुक्लयजु. त्रिशिखिब्राह्मणोपनिषद्)

अर्थात् यम–नियम–आसन–सिद्धिपूर्वकं नाडीशुद्धिं च विधाय एव प्राणायामस्य सम्यक् अभ्यासः करणीयः,। अन्यथा वायुः प्रकुपितो भूत्वा विविधान् रोगान् जनयति। यथा–

**हिक्का श्वासश्च कासश्च शिरःकर्णाक्षिवेदनाः।**
**भवन्ति विविधा रोगाः पवनस्य प्रकोपतः।।**

(हठयोगप्रदीपिका)

विधिपूर्वकं प्राणायामकरणेन सर्वेषां रोगाणां नाशो भवति। यथोक्तम् –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।** (गोरक्षसंहिता)

युक्तिपूर्वकं वायुसेवनेन सिद्धिः सम्भवति। वायुसेवनविधिविषये सामवेद–योगचूडामणि– उपनिषदि कथ्यते–

**यथा सिंहो गजो व्याघ्रो भवेत् वश्यः शनैः शनैः।**
**तथैव सेवितो वायुरन्यथा हन्ति साधकम्।।**

यथा सिंह–गज–व्याघ्राः शनैः शनैः वशमायान्ति शीघ्रतायां च स्वामिनम् एव हन्ति तथैव शनैः शनैः वायुः सेवनीयः अपितु अन्यथा द्रुतगत्या सेवितः वायुः साधकमेव हन्ति।

अतः योगगुरोः सन्निधौ एव शास्त्रसम्मतविधिना प्राणायामस्य अभ्यासः करणीयः।

प्राणायामपरः साधकः एव चित्तवृत्तिनिरोधपूर्वकं क्रमशः प्रत्याहार–धारणा–ध्यानावस्थां च प्राप्य समाधिं समधिगच्छति, अतः योगशिक्षा सर्वक्षेमकरी वर्तते।

योगाभ्यासः बालकानां कृते अतीव लाभप्रदो भवति यतोहि विद्यार्थिजीवने प्रायः सर्वे योगस्य अष्टसु सोपानेषु प्रथमद्वितीययोः अर्थात् यम–नियमयोः पालनन्तु स्वभावतः एव कुर्वन्ति। तृतीयसोपानस्य कृते आसनानाम् अभ्यासः प्रतिदिनम् आवश्यकः। आसनैः अन्तःस्रावियन्थिभ्यो यः स्रावः भवति सः साक्षात् रुधिरे सम्मिलति। तेन हीमोग्लोबिन– इत्याख्यं तत्त्वं प्राणवायुं (ऑक्सीजन) अवशोषयति। एवं शरीरं स्वस्थं भवति। अतः बालकैः प्रतिदिनं नियमपूर्वकं योगासनाभ्यासः करणीयः। कानिचन प्रसिद्धानि आसनानि यथा –

| | | |
|---|---|---|
| ताडासनम् | भुजङ्गासनम् | वृक्षासनम् |
| वज्रासनम् | शशाङ्कासनम् | मण्डूकासनम् |
| सर्वाङ्गासनम् | पद्मासनम् | पवनमुक्तासनम् |
| शीर्षासनम् | मयूरासनम् | त्रिकोणासनम् |
| | शवासनम् | |

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः, शान्तिः, शान्ति।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास–प्रश्नाः

**निर्देशः–निम्नलिखितानां प्रश्नानां संस्कृतमाध्यमेन उत्तरं देयम् –**

1. षट्कर्म–शुद्धिः कथं भवति ?
2. योगशास्त्रस्य कति सोपानानि भवन्ति ? नामानि लिखत।
3. के यमाः ?
4. के नियमाः ?
5. शौचं किं भवति ?
6. वायुं कथं त्यजेत् ?
7. वायुं कथं प्रपूर्येत ?
8. प्राणवायुः कथं सेवनीयः भवति ?
9. शीघ्रतापूर्वकं प्राणवायुसेवनेन सः किं करोति ?
10. पवनस्य प्रकोपतः के के रोगा भवन्ति ?
11. सर्वरोगक्षयः कथं भवेत् ?
12. प्राणायामात् पूर्वं किम् आवश्यकम् ?
13. नाड़ीशोधनात् पूर्वं किम् आवश्यकम् ?
14. केषामपि पञ्चानाम् आसनानां नामानि लेख्यानि ?
15. रिक्तस्थान–पूर्तिः करणीया –

    (1) यमैश्च ............................................ समाचरेत्।।

    (2) यथा सिंहो ......................................... हन्ति साधकम्।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## द्वितीयः पाठः

# नारी–महिमा

**डॉ. सतीश कपूरः**

**परिचयः –**

श्रद्धाऽनुविद्धेन हृदयेन अनुशीलनीयायाम् अस्माकं भारतीयसंस्कृतौ नारीणां किं स्थानं विद्यते इति जिज्ञासां शमयितुम् एकमेव पद्यमिदं सुपर्याप्तं भवति यत्–

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।'**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफलाः क्रियाः।। इति।।**

प्रस्तुतः पाठोऽयं 'नारी–महिमा' इति नाममात्रेण एवं स्वपरिचयं सुतरां प्रकटयति। अस्मिन् पाठे नारीणां गुणगौरवं स्थितिदर्शनं च परिलक्षितम् अस्ति। नारीं प्रति मनुष्याणां दृष्टिकोणस्य सार्थक्यं चापि अत्र निदर्शितं विद्यते।

आशुकविः डॉ. सतीश कपूरः अस्य पाठस्य रचयिता वर्तते। हरियाणाप्रान्तस्य अम्बालयनगरे लब्धजन्मा कविरेषः व्याकरणशास्त्रे साहित्यशास्त्रे च अधीती वर्तते। सकलभुवनभास्करं भगवन्तं सूर्यदेवं महागुरुरूपेण समाराधयितुं प्रतिदिनम् एकमभिनवं पद्यं विरचय्य पद्यप्रसूनाञ्जलिरूपाणि भुवनभास्करस्तवात्मकानि षोडश शतकानि समर्पितानि कविनाऽनेन। अभिनवमौक्तिकशतकम् इति मुक्तककाव्यमपि विरचितमनेन। इतोऽतिरिच्य कविनानेन संस्कृते हिन्द्याम् आङ्ग्लभाषायां च अनेकानि गीतानि कविता लघुरूपकाणि चापि विरचितानि। विविधरागेषु नवीनस्वररचना संस्कृतबन्धश्च, संस्कृतच्छन्दोऽनुगुणं नवतालप्रयोगः विविधच्छन्दसां नवप्रयोगश्चापि कवेरस्य वैशिष्ट्यम्।

राजस्थान–संस्कृत–अकादमी, जयपुरद्वारा संस्कृतप्रतिभासम्मानेन श्रेष्ठसंस्कृतशिक्षक सम्मानेन च कविरेष सभाजितः। जयपुरस्थिते श्री–दिगम्बर–जैन–आचार्य–संस्कृत– महाविद्यालये त्रयोदशवर्षाणि व्याख्यातृपदमधिष्ठाय साम्प्रतमेषः सप्तभ्यो वर्षेभ्यो राष्ट्रियसंस्कृतसंस्थान– मानितविश्वविद्यालयस्य जम्मूनगरस्थिते श्रीरणवीरपरिसरे साहित्यविभागाध्यक्षपदमधितिष्ठति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## नारी–महिमा

**जन्मप्रदेति जननी जनितेति पुत्री,**
**नारी तथैव भगिनी च सहोदरत्वात्।**
**अर्धाङ्गिनी घनघटा प्रणयाऽमृतानाम्,**
**नारीं विना तु विफलश्रमवान् विधाता।। 1।।**

**पदच्छेदः –** जन्मप्रदा इति जननी जनिता इति पुत्री नारी तथा एवं भगिनी च सहोदरत्वात्। अर्धाङ्गिनी घनघटा प्रणय + अमृतानाम् नारीम् विना तु विफलश्रमवान् विधाता।

**अन्वयः** – नारी जन्मप्रदा इति जननी, जनिता इति पुत्री तथा एव च सहोदरत्वात् भगिनी, प्रणयामृतानाम् घनघटा (रूपेण) अर्धाङ्गिनी (भवति) नारीं विना तु विधाता अपि विफलश्रमवान् (भवेत्)।

**व्याख्या –** नारी – स्त्री, योषित्। जन्मप्रदा – जन्मप्रदात्री। इति–इति कारणात्। जननी–माता। जनिता – उत्पादिता। इति – अस्मात् कारणात्। पुत्री–तनया, सुता। तथा एव च – तेनैव प्रकारेण, तद्वत् वा। सहोदरत्वात – समानोदरजन्मकारणात्। भगिनी – स्वसा। प्रणयामृतानाम् – प्रेमरूप–सुधानाम्। घनघटा – मेघघटा (रूपेण) अर्धाङ्गिनी – जाया भार्या वा (भवति)। नारीम् विना – स्त्रियम् अन्तरेण। तु – तावत्। विधाता–ब्रह्मा, स्रष्टा (अपि)। विफलश्रमवान् – निष्फलप्रयत्नः (भवेत्)।

**भावार्थः –** नार्याः विविधरूपाणि वर्णयति कविः – नारी जन्मदायिनी भवति अतः जननी उच्यते, सा उत्पादिता तस्मात् पुत्री इति ज्ञायते। तेनैव प्रकारेण समानोदरत्वात् सहोदरी प्रेम्णः घनघटारूपेण अर्धाङ्गिनी कथ्यते। नारीं विना तु ब्रह्मा अपि सृष्टिं कर्तुं न समर्थः इत्याशयः।

**व्याकरणम् –** जन्मप्रदेति–जन्मप्रदा + इति, स्वरसन्धिः, गुणः। तथैव – तथा + एव, स्वरसन्धिः, वृद्धिः। अर्धाङ्गिनी – अर्ध + अङ्गिनी, स्वरसन्धिः, गुणः।

प्रणायामृतानाम् – प्रणयः एव अमृतम् इति तेषाम् (अवधारणार्थे कर्मधारय) विफलश्रमवान् – विगतं फलं यस्मात् तत् विफलम्, विफलः श्रमः यस्य सः (बहुव्रीहिः)। तस्मिन्नेव अर्थे मतुप्। घनघटा – घनानां घटा (षष्ठी तत्पुरुषः)।

विधाता – वि+धा+तृच्। नारी – नर+ङीप् ।

जनिता – जन् + णिच् + क्त +टाप्। प्रणयः – प्र+नी+अच्।

**बाल्येऽमृतानि ददती करुणार्द्रचित्ता,**
**कर्त्तव्यमार्गमुचितानुचितं दिशन्ती।**
**स्निग्धाशिषैव दुरितानि निवारयन्ती,**
**उत्साहपुण्यतटिनी खलु मातृशक्तिः।। 2।।**

**पदच्छेदः –** बाल्ये अमृतानि ददती करुणार्द्रचित्ता कर्त्तव्यमार्गम् उचित + अनुचितम् दिशन्ती। स्निग्ध–आशिषा एव दुरितानि निवारयन्ती उत्साहपुण्यतटिनी खलु मातृशक्तिः।

**अन्वयः –** करुणार्द्रचित्ता बाल्ये अमृतानि ददती, उचितानुचितं कर्त्तव्यमार्गं दिशन्ती, स्निग्धाशिषा एव दुरितानि निवारयन्ती मातृशक्तिः खलु उत्साहपुण्यतटिनी (वर्तते)।

**व्याख्या** – करुणार्द्रचित्ता–करुणापूर्णहृदया, वात्सल्यप्लाविताऽन्तःकरणा इत्याशयः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बाल्ये–शैशवावस्थायाम्। अमृतानि–सुधातुल्यपदार्थान्, अमृतपदेन दुग्धं, पुष्टिकराणि खाद्यवस्तूनि च लक्षितानि। ददती–प्रयच्छन्ती। उचितानुचितम् – शोभनाशोभनम्, करणीयाकरणीयम्। कर्तव्यमार्गम्–कर्तव्योपदेशम्, कर्ममार्गम्, आचरणपद्धतिम्।

दिशन्ती – बोधयन्ती। स्निग्धाशिषा – स्नेहपूर्णाशीर्वादेन। एव – अवधारणार्थे। दुरितानि–अनिष्टानि, अमङ्गलानि। निवारयन्ती–दूरीकुर्वती। मातृशक्तिः – मातृरूपाशक्तिः, जननीमहिमा। खलु–निश्चयेन। उत्साहपुण्यतटिनी–उत्साहरूपा पुण्यरूपा च नदी वर्तते।

**भावार्थः** – मातृशक्तेः गरिमाणं वर्णयन् कविः कथयति यत् करुणापूर्णहृदया मातृशक्तिः बाल्यकाले दुग्धादिपुष्टिकरान् अमृततुल्यपदार्थान् ददाति। करणीयाकरणीयस्य मार्गम् उपदिशति। मातुः स्नेहपूर्णाशीर्वादेन एव सन्ततेः अमङ्गलं विनश्यति। माता निश्चयेन उत्साहरूपा पुण्यरूपा च नदी वर्तते, सा ईदृशी नदी यस्याः एकतः उत्साहरूपं तटम् अपरतः च पुण्यरूपं तटं भवति। रूपकम्–अलङ्कारः।

**व्याकरणम्** – आशिषैव – आशिषा + एव, स्वरसन्धिः, वृद्धिः। बाल्येऽमृतानि बाल्ये+अमृतानि, स्वरसन्धिः, पूर्वरूपम्। करुणार्द्रचित्ता–करुण + आर्द्रचित्ता, स्वरसन्धिः, सवर्णदीर्घः। स्निग्धाशिषा–स्निग्ध + आशिषा, स्वरसन्धिः, सवर्णदीर्घः।

स्निग्धाशिषा – स्निग्धा च असौ आशीः, तया कर्मधारयः। कर्तव्यमार्गम् – कर्तव्यस्य मार्गः, तम् (षष्ठीतत्पुरुषः)। उचितानुचितम् – उचितं च अनुचितं च तयोः समाहारः (द्वन्द्वः)। करुणार्द्रचित्ता – आर्द्रचित्तं यस्याः सा आर्द्रचित्ता (बहुव्रीहिः), करुणया आर्द्रचित्ता इति (तृतीयातत्पुरुषः) ददती–दा + शतृ + ङीप्। कर्तव्यः – कृ + तव्यत्। तटिनी – तट+इनि+ङीप्। स्निग्धा – स्निह् + क्त + टाप्।

**श्रान्तोऽसि तात ! विनिधेहि शिरो मदङ्गे,**
**इत्याग्रहेण मृदुलं मृदुलं स्पृशन्त्याः।**
**पुण्यैर्विमुग्धमुखदुग्धरदाङ्कुरायाः**
**धन्या हि मातुरिव ते पितरः सुतायाः।। 3 ।।**

**पदच्छेदः** – श्रान्तः असि तात ! विनिधेहि शिरः मदङ्गे इति आग्रहेण मृदुलम् मृदुलम् स्पृशन्त्याः। पुण्यैः विमुग्ध–मुख–दुग्ध–रद–अङ्कुरायाः, धन्याः हि मातुः इव ते पितरः सुतायाः।

**अन्वयः –** तात ! श्रान्तः असि, शिरः मदङ्गे विनिधेहि, इति आग्रहेण मृदुलं स्पृशन्त्याः पुण्यैः विमुग्धमुखदुग्धरदाङ्कुरायाः मातु इव सुतायाः पितरः ते हि धन्याः (सन्ति)।

**व्याख्या** – तात ! पितः। श्रान्तः असि – श्रमेण क्लान्तः असि। शिरः शीर्षम्, मस्तकम्। मदङ्के–मम क्रोडे। विनिधेहि – स्थापय। इति–इत्थम्, आग्रहेण, साग्रहम्, अनुरोधपूर्वकम्, मृदुलं मृदुलम् – कोमलतापूर्वकम्। स्पृशन्त्याः स्पर्शं कुर्वत्याः। पुण्यैः सुकृतैः। विमुग्धमुखदुग्धरदाङ्कुरायाः – विमुग्धं नाम निर्दोषरमणीयम्, दुग्धरदाः नाम दुग्धदन्ताः, निर्दोषसुन्दराननदुग्धदन्तकलिकायाः इत्यर्थः। मातुः इव – जनन्याः इव। सुतायाः – तनयायाः। पितरः – जनकाः। ते–तादृशाः जनाः। हि – निश्चयेन। धन्याः सौभाग्यशालिनः सन्ति।

**भावार्थः** – सुतायाः प्रकृतिं वर्णयन् तस्याः जन्म पितुः सौभाग्यमित्याह – श्रमेण क्लान्तं पितरं पुत्री कथयति–हे तात ! भवान् मम क्रोडे शिरः स्थापयतु, ततः सा कोमलतापूर्वकं शिरः स्पृशति। एषा बाला



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

निर्दोषसुन्दरमुखे दुग्धदन्तकलिकायुक्ता अस्ति अर्थात् तस्याः मुखे दुग्धदन्ताः शोभन्ते। बालिका अपि मातृतुल्यगरिमाणं प्रदर्शयति। तासां पितरः सौभाग्यशालिनः भवन्ति।

**व्याकरणम् –** श्रान्तोऽसि – श्रान्तः + असि, विसर्गसन्धिः, रुत्व–उत्व–पूर्वरूपम्। इत्याग्रहेण–इति + आग्रहेण, स्वरसन्धिः, यण्। मातुरिव–मातुः इव, विसर्गसन्धिः, रुत्वम्। शिरो मदङ्के–शिरः+मदङ्के, विसर्गः, रुत्व–उत्व–गुणः।

विमुग्धमुखदुग्धरदाङ्कुरायाः – विमुग्धे मुखे दुग्धरदानाम् अङ्कुराः यस्याः सा तस्याः (बहुव्रीहिः)। मदङ्के–मम अङ्के तस्मिन् (षष्ठीतत्पुरुषः)।

श्रान्तः–श्रम–क्त। विमुग्धः – वि + मुह् + क्त। दुग्ध – दुह् – क्त।

**रक्षानिबन्धनपवित्रचरित्रदृष्टिम्,**
**सङ्कल्पशक्तिमतुलां हृदये सृजन्ती।**
**नारी जनस्य सुकृतैर्भगिनी भवन्ती,**
**भ्रातेति मर्मगरिमाणमभिव्यनक्ति।। 4 ।।**

**पदच्छेदः** – रक्षानिबन्धन पवित्र चरित्र दृष्टिम्, सङ्कल्पशक्तिम् अतुलाम् हृदये सृजन्ती। नारी जनस्य सुकृतैः भगिनी भवन्ती, भ्राता इति मर्म–गरिमाणम् अभिव्यनक्ति।

**अन्वयः –** जनस्य हृदये रक्षानिबन्धनपवित्रचरित्रदृष्टिम् अतुलां संङ्कल्पशक्तिं सृजन्ती (जनस्य) सुकृतैः भगिनी भवन्ती नारी ''भ्राता'' इति मर्म–गरिमाणम् अभिव्यनक्ति।

**व्याख्या** – जनस्य = मनुष्यस्य। हृदये = मनसि, अन्तःकरणे। रक्षानिबन्धनपवित्रचरित्रदृष्टिम् – रक्षासूत्रबन्धनेन पावनचरित्रदृष्टिम्। अतुलाम् = अनुपमाम्। सङ्कल्पशक्तिम् = निष्ठाबलम्, आत्मशक्तिम्। सृजन्ती = उत्पादयन्ती। जनस्य = मानवस्य। सुकृतैः = पुण्यैः। भगिनी = सहोदरी, स्वसा। भवन्ती = जायमाना। नारी = स्त्री। 'भ्राता' इति = सहोदर इति शब्दस्य। मर्म = गरिमाणम्, गूढरहस्यगौरवम्। अभिव्यनक्ति = प्रकटयति।

**भावार्थः** – सम्प्रति भगिनीचरितस्य महिमानम् आह – भगिन्या बद्धे रक्षासूत्रे महान्तः पुण्यभावाः निवसन्ति, तेन रक्षासूत्रबन्धनेन सा नारी मानवस्य हृदये पावनचरित्रदृष्टिम् अतुलनीयां निष्ठाशक्तिं च उत्पादयति। मानवस्य पुण्यैः एव सा भगिनीरूपे आयाति। 'भ्राता' इति पदस्य महत्त्वं बोधयितुं भगिनी एव प्रेरयति।

**व्याकरणम् –** भ्रातेति – भ्राता + इति, स्वरसन्धिः, गुणः। सुकृतैर्भगिनी–सुकृतैः + भगिनी, विसर्गसन्धिः, रुत्वम्। मर्मगरिमाणम् – मर्मणः गरिमा तम् (षष्ठीतत्पुरुषः)। रक्षानिबन्धनपवित्र – चरित्रदृष्टिम् – पवित्रं च तत् चरित्रम्, पवित्रचरित्रम्, तस्य दृष्टिः पवित्रचरित्रदृष्टिः रक्षायाः निबन्धनम् रक्षानिबन्धनम्, रक्षानिबन्धनेन पवित्रचरित्रदृष्टिः ताम् (तत्पुरुषः)। सङ्कल्पशक्तिम् – सङ्कल्पस्य शक्तिः ताम् (षष्ठीतत्पुरुषः)। गरिमाणम् – गुरु + इमनिच् द्वितीया एकवचनम्। सृजन्ती – सृज् + शतृ + ङीप्। चरित्रम् – चर् + इत्र।

**मोहान्धयौवनवने प्रणयावलोकैः,**

**हस्तेन हस्तमुपयम्य दिशं दिशन्ती।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वंशं समुज्ज्वलयते सदपत्यरत्नैः,**

**सौभाग्यसिन्धुसरिता जगतीह नारी।। 5 ।।**

**पदच्छेदः** – मोहान्धयौवनवने प्रणय अवलोकैः हस्तेन हस्तम् उपयम्य दिशम् दिशन्ती। वंशम् समुज्ज्वलयते सत् अपत्यरत्नैः सौभाग्य–सिन्धु–सरिता जगति इह नारी।

**अन्वयः –** मोहान्धयौवनवने प्रणयावलोकैः हस्तेन हस्तम् उपयम्य दिशं दिशन्ती, सदपत्यरत्नैः, वंशं समुज्ज्वलयते। नारी इह जगति सौभाग्यसिन्धुसरिता (वर्तते)।

**व्याख्या** – मोहान्धयौवनवने – मोहग्रस्तयुवावस्थारूपे कानने। प्रणयावलोकैः – प्रेमरूपप्रकाशैः। हस्तेन – करेण। हस्तम् – करं, पाणिम्। उपयम्य – गृहीत्वा। दिशम् – दिशानिर्देशम्। दिशन्ती – उपदेशं कुर्वती। सदपत्यरत्नैः – श्रेष्ठसन्ततिरूपमणिभिः। वंशम् – कुलम् (अन्वयम्)। समुज्ज्वलयते – उज्ज्वलं करोति, गौरवान्वितं करोति। नारी–स्त्री। इह–अत्र। जगति–संसारे। सौभाग्य–सिन्धुसरिता–पुण्यसागरगामिनी नदी। वर्तते इति शेषः।

**भावार्थः** – मायाजालपरिपूर्णे यौवनरूपे वने प्रणयरूपप्रकाशैः करेण करं गृहीत्वा कर्तव्यविषयं बोधयन्ती सा नारी पत्नीरूपेण श्रेष्ठ–सन्तानरूपरत्नैः कुलं गौरवान्वितं करोति। नारी पत्नीरूपेण तादृशी नदी विद्यते या खलु सौभाग्यसमुद्रं प्रति नयति।

**व्याकरणम् –** जगतीह – जगति+इह, स्वरसन्धिः, सवर्णदीर्घः। मोहान्धम् – मोह + अन्धम्, स्वरसन्धिः, सवर्णदीर्घः। सदपत्यरत्नैः – सत् + अपत्यरत्नैः, व्यञ्जनसन्धिः, जश्त्वम्। समुज्ज्वलयते – सम् + उद् + ज्वलयते, व्यञ्जनसंधिः, श्चुत्वम्।

मोहान्धयौवनने –मोहेन अन्धम्, मोहान्धम् च तद् यौवनम् मोहान्धयौवनम्, मोहान्धयौवनम् एव वनम् तस्मिन् (तत्पुरुषः, कर्मधारय)।

मोहः – मुह् – घञ्। प्रणयः – प्र + नी + अच्। उपयम्य – उप + यम् + ल्यप्। दिशन्ती – दिश् + शतृ + ङीप्।

**दुर्गाऽपि सा भुवनदुर्गतिखण्डयित्री,**

**चण्डी च दुश्चरितदानवदण्डयित्री।**

**लक्ष्मीश्च सैव जगतो विभवस्वरूपा,**

**सज्ज्ञानदानमहिमा च सरस्वती सा।। 6 ।।**

**पदच्छेदः** – दुर्गा अपि सा भुवनदुर्गतिखण्डयित्री, चण्डी च दुश्चरितदानव – दण्डयित्री। लक्ष्मीः च सा एव जगतः विभवस्वरूपा, सज्ज्ञानदान – महिमा च सरस्वती सा।

**अन्वयः –** सा भुवनदुर्गतिखण्डयित्री दुर्गा अपि (विद्यते), दुश्चरितदानवदण्डयित्री च चण्डी (वर्तते)। सा एव च जगतः विभवस्वरूपा लक्ष्मीः, सज्ज्ञानदानमहिमा सरस्वती च सा (एव अस्ति)।

**व्याख्या** – सा – पूर्वोक्ता नारी। भुवनदुर्गतिखण्डयित्री – संसारदुर्दशा, विनाशकर्त्री। दुर्गा अपि – देवी अपि। (विद्यते) दुश्चरितदानवदण्डयित्री – दुराचरणदैत्यदण्डदायिनी। (च) चण्डी – प्रचण्डरूपा देवी वर्तते। सा एव च – पूर्वोक्ता नारी एव। जगतः – संसारस्य। विभवस्वरूपा – ऐश्वर्यरूपिणी। लक्ष्मीः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

– श्रीः, रमा। अस्ति। सज्ज्ञानदानमहिमा – उत्तमविद्यादान – महिममयी सरस्वती – ज्ञानदायिनी देवी च सा – नारी एव अस्ति।

**भावार्थः** –नार्याः गौरवं देवीरूपेषु वर्णयति कविः यत् – सा लोकस्य दुर्दशां विनाशयति अतः दुर्गा अस्ति, तथैव दुष्टान् दैत्यान् दण्डयति तेन चण्डी अपि सा एव नारी विद्यते। जगतः ऐश्वर्यस्वरूपिणी लक्ष्मीः अपि नारी वर्तते। सा एवं उत्तमविद्यादायिनी सरस्वती अस्ति।

**व्याकरणम्** – सज्ज्ञानम् – सद् + ज्ञानम्, व्यञ्जनसन्धिः श्चुत्वम्। सैव – सा + एव, स्वरसन्धिः, वृद्धिः। खण्डयित्री – खण्डयितृ + ई (ङीप्) स्वरसन्धि : यण्। दुर्गाऽपि – दुर्गा + अपि, स्वरसन्धिः, सवर्णदीर्घः। भुवनदुर्गतिखण्डयित्री – भुवनानां दुर्गतिः भुवनदुर्गतिः तस्याः खण्डयित्री (तत्पुरुषः)। सज्ज्ञानदानमहिमा – सत् च तत् ज्ञानम् सज्ज्ञानम् तस्य दानम् सज्ज्ञानदानम् इति महिमा यस्याः सा (तत्पुरुषगर्भबहुव्रीहिः)। दुश्चरितदानवदण्डयित्री – दुष्टं चरितं येषां ते, ते च दानवाः तान् दण्डयति इति सा (बहुव्रीहिगर्भतत्पुरुषः)। दण्डयित्री – दण्ड् + तृच् + ङीप्। विभवः– वि+ भू + अप्। ज्ञानम् – ज्ञा + ल्युट्। महिमा – महत् + इमनिच्।

**कल्याणमात्रचरिताऽद्य च लोकतन्त्रे,**<br>
**नेतृत्वमप्यनुपमं सहजं वहन्ती।**<br>
**विज्ञानभूमिषु पुनः पदमर्पयन्ती,**<br>
**सिद्धेव पर्यटति सा गहनेऽन्तरिक्षे।। 7 ।।**

**पदच्छेदः** – कल्याणमात्रचरिता अद्य च लोकतन्त्रे, नेतृत्वम् अपि अनुपमम् सहजम् वहन्ती। विज्ञानभूमिषु पुनः पदम् अर्पयन्ती, सिद्धा इव पर्यटति सा गहने अन्तरिक्षे।

**अन्वयः** – कल्याणमात्रचरिता च सा अद्य लोकतन्त्रे अनुपमं नेतृत्वम् अपि सहजं वहन्ती, पुनः विज्ञानभूमिषु (अपि) पदम् अर्पयन्ती, (सा) गहने अन्तरिक्षे सिद्धा एव पर्यटति।

**व्याख्या**– कल्याणमात्रचरिता – हितमात्राचरणशीला। अद्य–आधुनिककाले। लोकतन्त्रे–जनानां शासने, शासनविशेषे। अनुपमम् उत्कृष्टम्, अद्वितीयम्। नेतृत्वम् – नायकत्वम् अपि। सहजम् – स्वाभाविकरूपेण। वहन्ती – धारयन्ती। पुनरपि च। विज्ञानभूमिषु – विज्ञानक्षेत्रे अपि। पदम् – चरणम् अर्पयन्ती प्रथयन्ती, स्थापनं कुर्वती। सा–नारी। गहने – गभीरे। अन्तरिक्षे – नभोमण्डले। सिद्धा – सिद्धाङ्गना। इव – यथा। पर्यटति – भ्रमति।

**भावार्थः** – आधुनिकयुगे नार्याः चरितोत्कर्षं वर्णयति कविः यत् वर्तमानकाले लोकतन्त्रेऽस्मिन् हिताचरणशीला सा नारी नायकत्वम् उत्कृष्टरूपेण सहजतया धारयति। पुनश्च विज्ञानक्षेत्रे अपि पदस्थापनं कृत्वा विशालब्रह्माण्डे सिद्धाङ्गना इव पर्यटनं करोति।

**व्याकरणम्** – अप्यनुपमम् – अपि + अनुपमम्, स्वरसन्धिः, यण्। सिद्धेव – सिद्धा + इव, स्वरसन्धिः, गुणः। गहनेऽन्तरिक्षे – गहने + अन्तरिक्षे, स्वरसन्धिः, पूर्वरूपम्। पर्यटति – परि + अटति, स्वरसन्धिः, यण्।

कल्याणमात्रचरिता – कल्याणम् एव चरितम् यस्याः सा कल्याणमात्रचरिता (बहुव्रीहिः)। लोकतन्त्रे – लोकस्य तन्त्रम् तस्मिन् (षष्ठीतत्पुरुषः)। विज्ञानभूमिषु – विज्ञानस्य भूमिः तासु (षष्ठीतत्पुरुषः) नेतृत्वम् – नेतृ + त्व। वहन्ती – वह + शतृ + ङीप्। सिद्धा – सिध् + क्त + टाप्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**नारीं स्वभावमृदुलामबलां वदन्तः,**

**जानन्ति नात्मबलगौरवमेव तस्याः।**

**नो चेन्महामहिमदुर्धरशक्तिमन्तः,**

**जन्माऽलभन्त किमु वा पुरुषस्य गर्भे।। 8 ।।**

**पदच्छेदः** – नारीम् स्वभावमृदुलाम् अबलाम् वदन्तः, जानन्ति न आत्मबलगौरवम् एव तस्याः। नो चेत् महामहिम दुर्धर शक्तिमन्तः, जन्म अलभन्त किमु वा पुरुषस्य गर्भे।

अन्वयः – स्वभावमृदुलां नारीम् अबलां वदन्तः (जनाः) तस्याः आत्मबलगौरवम् एव न जानन्ति। नो चेत् महामहिम दुर्धरशक्तिमन्तः (वीराः) किमु वा पुरुषस्य गर्भे जन्म अलभन्त?

**व्याख्या** – स्वभावमृदुलाम् – कोमलस्वभावाम्, निसर्गकोमलाम्। नारीम् – स्त्रियम्। अबलां वदन्तः – 'अबला' इति पदेन कथयन्तः नास्ति बलं यस्याः सा अबला इत्यनेन बलहीना, निर्बला वा अर्थः प्राप्यते। यद्यपि अबलापदं नारीपर्यायवाचकम् एव प्रयुज्यते तथापि अत्र व्यङ्ग्यवचनं विधीयते यत् नारीकृते 'अबला' इति पदप्रयोगं कुर्वन्तः जनाः। तस्याः – नार्याः। आत्मबलगौरवम् –आत्मशक्तिमहिमानम्। एव – नूनम्। न जानन्ति – न विदन्ति, न अवगच्छन्ति। नो चेत् – अन्यथा। महामहिमदुर्धरशक्तिमन्तः – अतिशयदुर्दम्यपराक्रमशालिनः वीराः। किमु वा – किं वा। पुरुषस्य – नरस्य। गर्भे – गर्भाशये, उदरे वा। जन्म – जननम्। अलभन्त – प्राप्तवन्तः।

**भावार्थः** – अत्र नार्याः आत्मबलं वर्णयति कविः – ये जनाः कोमलस्वभावां नारीम् अबलापदेन वदन्ति ते तासाम् आत्मबलगौरवं न जानन्ति। अतिशयपराक्रमशालिनः वीराः नारीणां गर्भेषु एव जन्म अलभन्त, न च पुरुषगर्भेषु।

**व्याकरणम् –** चेन्महामहिम – चेत् + महामहिम, व्यञ्जनसन्धिः, अनुनासिकः। जन्मालभन्त– जन्म + अलभन्त, स्वरसन्धिः, सवर्णदीर्घः।

स्वभावमृदुलाम् – स्वभावेन मृदुला ताम् (तृतीया–तत्पुरुषः)। आत्मबलगौरवम् – आत्मनः बलम् इति आत्मबलम् तस्य गौरवम् (षष्ठीतत्पुरुषः)। महामहिमदुर्धरशक्तिमन्तः – महाँश्चासौ महिमा इति महामहिमा दुर्धरा च असौ शक्तिः दुर्धरशक्तिः, महामहिमा दुर्धरशक्तिः च येषां ते तादृशाः (मतुप्) बहुव्रीहिः। वदन्तः – वद् + शतृ प्रथमा बहुवचनम्। शक्तिमन्तः शक्ति + मतुप् प्रथमाबहुवचनम्।

**तामद्य बुद्धिरहिताः प्रतिरुद्धपुण्याः,**

**निघ्नन्ति गर्भनिहितामपि ये कृतघ्नाः।**

**तेऽमी स्वयं स्वचरणानि कुठारघातैः,**

**उच्छेदयन्ति महिषासुरवंशजन्याः।। 9 ।।**

**पदच्छेदः** – ताम् अद्य बुद्धिरहिताः प्रतिरुद्धपुण्याः, निघ्नन्ति गर्भनिहिताम् अपि ये कृतघ्नाः। ते अमी स्वयम् स्वचरणानि कुठारघातैः उच्छेदयन्ति महिषासुरवंशजन्याः।

**अन्वयः –** अद्य तां गर्भनिहिताम् अपि ये बुद्धिरहिताः, प्रतिरुद्धपुण्याः, कृतघ्नाः (जनाः) निघ्नन्ति। ते अमी महिषासुरवंशजन्याः कुठारघातैः स्वचरणानि स्वयम् उच्छेदयन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – अद्य – आधुनिककाले। ताम् – नारीम्। गर्भनिहितामपि – गर्भे स्थितामपि। ये–जनाः। बुद्धिरहिताः – मतिहीनाः। प्रतिरुद्धपुण्याः – भाग्यहीनाः। कृतघ्नाः – अकृतज्ञाः। निघ्नन्ति – मारयन्ति, गर्भपातं कुर्वन्ति इत्यर्थः। ते अमी – तादृशाः एते जनाः। महिषासुरवंशजन्याः – महिषासुरकुलोत्पन्नाः, (महिषासुरो नाम दानवराजः पुरा दुर्गां युद्धे मारयितुं तत्परः, स्वयं हतः इति पौराणिकी कथा)। कुठारघातैः –परशुप्रहारैः। स्वचरणानि–स्वपदानि। स्वयम्–आत्मना एव। उच्छेदयन्ति–विखण्डयन्ति, लुनन्ति।

**भावार्थः** – कन्याभ्रूणहत्यां निन्दति कविः यत् ये जनाः कन्यां जन्मनः प्रागेव मारयन्ति ते बुद्धिरहिताः, हीनभाग्याः अकृतज्ञाः च भवन्ति। ते महिषासुरस्य कुले उत्पन्नाः ये परशुप्रहारैः स्वयं स्वपदानि विखण्डयन्ति। यथा महिषासुरः युद्धे दुर्गां घातयितुं तत्परः, किन्तु स्वयमेव हतः।

**व्याकरणम्** – तेऽमी – ते–अमी, स्वरसन्धिः पूर्वरूपम्। उच्छेदयन्ति – उद् + छेदयन्ति, व्यञ्जनसन्धिः, श्चुत्व – चर्त्वम्। स्वचरणानि – स्वस्य चरणानि, (षष्ठीतत्पुरुषः)। प्रतिरुद्धपुण्याः – प्रतिरुद्धं पुण्यं येषां ते प्रतिरुद्धपुण्याः (बहुव्रीहिः)। कुठारघातैः – कुठारेण घातः तैः (तृतीयातत्पुरुषः)।

गर्भनिहिताम् – गर्भे निहिताम् (सप्तमीतत्पुरुषः)। जन्याः–जन + यत् (प्रथमाबहुवचनम्)। बुद्धि – बुध् + क्तिन्। घातः–हन् + घञ्। निहिताम् – नि + धा + क्त + टाप् (अम्)।

**नार्यस्तु यत्र हृदयेन समाद्रियन्ते,**
**तस्मिन् गृहे प्रमुदिता निवसन्ति देवाः।**
**स्वर्गोपमं भवति देवमयं गृहं तद्,**
**राष्ट्रं च तैस्त्रिभुवनश्रियमुद्बिभर्ति।। 10 ।।**

**पदच्छेदः** – नार्यः तु यत्र हृदयेन समाद्रियन्ते, तस्मिन् गृहे प्रमुदिता निवसन्ति देवाः। स्वर्गोपमम् भवति देवमयम् गृहम् तद्, राष्ट्रम् च तैः त्रिभुवनश्रियम् उद्बिभर्ति।

**अन्वयः** – यत्र तु नार्यः हृदयेन समाद्रियन्ते, तस्मिन् गृहे प्रमुदिताः देवाः निवसन्ति। देवमयं तद् गृहं (च) स्वर्गोपमं भवति, तैः (गृहैः) च राष्ट्रं त्रिभुवनश्रियम् उद्बिभर्ति।

**व्याख्या** – यत्र तु – यस्मिन् स्थाने गृहे वा। नार्यः – स्त्रियः। हृदयेन – अन्तःकरणेन, मनसा। समाद्रियन्ते – सम्यक् आदृताः भवन्ति। तस्मिन् गृहे – तादृशे भवने। प्रमुदिताः – प्रसन्नाः। देवाः – सुराः। निवसन्ति – विराजन्ते। देवमयम् – देवयुक्तम्। तद्गृहम् – तादृशं भवनम्। स्वर्गोपमम् – स्वर्गतुल्यम्। भवति – जायते। तैः च – पूर्वोक्तैः गृहैः। राष्ट्रम् – देशः। त्रिभुवनश्रियम् – लोकत्रयलक्ष्मीम्। उद्बिभर्ति – उद्वहति, अधिगच्छति।

**भावार्थः** – नारीणां समादरजन्यां कल्याणपरम्परां निरूपयति कविः यत्– यस्मिन् गृहे नारीणां समादरः भवति, तस्मिन् गृहे देवाः निवासं कुर्वन्ति। **'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'** इति अयं भावः अत्र विलसति। देवयुक्तं गृहं स्वर्गतुल्यं भवति। स्वर्गतुल्यैः गृहैः राष्ट्रं महासमृद्धिभिः सम्पन्नं भवति। अतः नारीं प्रति सदैव समादरः ज्ञापनीयः।

**व्याकरणम्** – नार्यस्तु – नार्यः + तु, विसर्गसन्धिः, सत्वम्। स्वर्गोपमम्, स्वर्ग – उपमम्, स्वरसन्धिः, गुणसन्धिः। तैस्त्रिभुवनश्रियम् – तैः + त्रिभुवनश्रियम्, विसर्गसन्धिः, सत्वम्।

स्वर्गोपमम् – स्वर्गः उपमा यस्य तत् स्वर्गोपमम् (बहुव्रीहिः)। त्रिभुवनश्रियम् – त्रयाणां भुवनानां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

समाहारः त्रिभुवनम् त्रिभुवनस्य श्रीः ताम् (द्विगुगर्भषष्ठीतत्पुरुषः)।

प्रमुदिताः – प्र + मुद् + क्त + टाप्। देवमयम् – देव + मयट्।

## अभ्यासप्रश्नाः

### बहुविकल्पात्मकप्रश्नाः –

### निर्देशः – उचितं सङ्केताक्षरं कोष्ठके लेख्यम् –

1. नारी जन्मप्रदा अतः सा उच्यते –
   (क) पुत्री (ख) भगिनी
   (ग) जननी (घ) पत्नी
2. उत्साहपुण्यतटिनी अस्ति –
   (क) मातृशक्तिः (ख) पितृशक्तिः
   (ग) भ्रातृशक्तिः (घ) जनशक्तिः
3. जनस्य सुकृतैः नारी भवति –
   (क) भगिनी (ख) पत्नी
   (ग) माता (घ) पुत्री
4. नारी कैः वंशं समुज्ज्वलयते –
   (क) प्रणयावलोकैः (ख) हस्तेन हस्तमुपयम्य
   (ग) श्रेष्ठकार्यैः (घ) सदपत्यरत्नैः
5. मातृशक्तिः आशिषा निवारयति –
   (क) सुखानि (ख) रोगान्
   (ग) दोषान् (घ) दुरितानि
6. कल्याणमात्रचरिता नारी अन्तरिक्षे कथं पर्यटति –
   (क) शोभा इव (ख) सिद्धा इव
   (ग) धरा इव (घ) प्रभा इव
7. देवमयं तद् गृहं कीदृशं भवति –
   (क) स्वर्गोपमम् (ख) नरकोपमम्
   (ग) पर्वतोपमम् (घ) गृद्धोपमम्
8. महिषासुरवंशजन्याः के ?
   (क) ये बालान् निघ्नन्ति (ख) ये कन्याभ्रूणं निघ्नन्ति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) ये पशून् निघ्नन्ति (घ) सर्वे

9. यत्र नार्यस्तु पूज्यन्ते तत्र के रमन्ते ?

(क) जनाः (ख) जन्तवः

(ग) देवताः (घ) दैत्याः

10. सज्ज्ञान–दानमहिमा नारी केन नाम्ना वर्णिता ?

(क) सरस्वती (ख) दुर्गा

(ग) लक्ष्मीः (घ) चण्डी

## अतिलघूत्तरात्मकप्रश्नाः

### निर्देश : एकवाक्येन प्रत्येकम् उत्तरं लिखत –

1. सहोदरत्वात् नारी केन नाम्ना ज्ञायते ?
2. नारीं विना विधाता कीदृशो भवेत् ?
3. मातृशक्तिः कीदृशं कर्तव्यमार्गं दिशति ?
4. "तात ! श्रान्तोऽसि मदङ्के शिरो विनिधेहि" इति का कस्मै कथयति ?
5. नारी (भगिनीरूपा) रक्षानिबन्धनेन जनस्य हृदये किं सृजति ?
6. 'दिशन्ती' इत्यत्र कः धातुः कश्च प्रत्ययः ?
7. 'तेऽमी' इत्यस्य कः सन्धिविच्छेदः ?
8. 'उचिताऽनुचितम्' अत्र कः समासः ?
9. कीदृशी नारी अनुपमं नेतृत्वं सहजं वहति ?
10. देवाः कस्मिन् गृहे प्रमुदिताः निवसन्ति ?

## लघूत्तरात्मक–प्रश्नाः

### निर्देशः – पङ्क्तिचतुष्टयेन प्रतिप्रश्नम् उत्तरं देयम् –

1. मातृशक्तिः उत्साहपुण्यतटिनी कथम् अस्ति ?
2. 'श्रान्तोऽसि तात !..........' इति पद्यस्य आशयं वर्णयत।
3. नारी इह जगति सौभाग्यसिन्धुसरिद् अस्ति। कथम् ?
4. आधुनिकयुगे नार्याः चरितोत्कर्षं वर्णयत।
5. नार्याः दुर्गादिपौराणिकस्वरूपाणां गौरवं वर्णयत।
6. यत्र नार्यः समाद्रियन्ते तद् गृहं कीदृशं भवति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### निबन्धात्मकाः प्रश्नाः –

**निर्देशः – दशसु वाक्येषु प्रत्येकम् उत्तरं लिखत –**

1. नारीमहिमा पाठस्य सारः लेख्यः।
2. प्रस्तुतपाठस्य प्रणेतुः परिचयं लिखत।
3. राष्ट्रं त्रिभुवनश्रियं कदा धारयति ?
4. भगिनीरूपे पत्नीरूपे च नार्याः चरितं वर्णयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# तृतीयः पाठः

# भीमाष्टकम्

**डॉ. श्रीधरभास्करवर्णेकरः**

## परिचयः

भारतरत्नस्य डॉ. भीमराव–अम्बेड़करमहोदयस्य प्रेरणास्पदं जीवनवृत्तम् आश्रित्य कविप्रज्ञाभारती डॉ. श्रीधरभास्करवर्णेकरमहोदयेन ''भीमाष्टकम्'' इति विरचितम्। एतदेव 'भीमाष्टकम्' अस्मिन् पुस्तके पाठरूपेण प्रस्तुतम् अस्ति। 'भीमाष्टकम्' इति नाम्ना एव अस्य पाठस्य विषयवस्तुनः ज्ञानं सुस्पष्टं जायते। 'भीम' इतिपदेन डॉ0 अम्बेडकरमहोदयस्य नाम, अष्टकपदेन च अष्टसंख्यकानां श्लोकानां सङ्केतः अधिगृह्यते। अस्पृश्यकुले जन्म सम्प्राप्य सर्वथा प्रतिकूलपरिस्थितौ अपि एष महानुभावः विशिष्टं यशः अलभत, तेनैव यशःप्रभावेण दलितजनानाम् उद्धारम्, अशिक्षितजनेषु शिक्षाप्रचारं, दीनहीनानां जनानां च जीवनपरिष्कारम् अकरोत्। एतादृशस्य पुण्यकर्मनिर्वाहकस्य महापुरुषस्य जीवनवृत्तम् एतस्मिन् भीमाष्टके मङ्गलस्वरूपतया नमोवचनपूर्वकं प्रस्तुतमस्ति।

अस्य भीमाष्टकस्य रचयिता डॉ0 श्रीधरभास्करवर्णेकरमहोदयः संस्कृतसाहित्यजगति सुविख्यातः वर्तते। अयं कविः नागपुरस्य पुण्यभूमौ जन्म अलभत। श्रीमतः वर्णेकरमहोदयस्य गणना महाकवीनां समूहे भवति। अनेन महाकविना सुविपुला सारस्वतसाधना सुरभारतीसेवा च विहिता। अनेन विरचितकाव्यानां नामानि एतानि सन्ति –

1. शिवराज्योदयम् – षट्षष्टिसर्गात्मकं महाकाव्यम्।
2. विभूतिवन्दनम् – खण्डकाव्यम्।
3. जवाहरतरङ्गिणी – खण्डकाव्यम्।
4. विनायकवैजयन्ती – खण्डकाव्यम्।
5. रामकृष्णपरमहंसीयम् – खण्डकाव्यम्।
6. विवेकानन्दविजयम् – नाटकम्।
7. शिवराज्योदयम् – नाटकम्।

एतदतिरिच्य श्रीमता वर्णेकरमहोदयेन बहूनि स्तोत्राणि विरचितानि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भीमाष्टकम् –

**जन्मास्पृश्यकुले विपत्तिविकले नानानिषेधाकुले,**
**विद्यामन्दिरसम्प्रवेशनविधौ लोके विरोधो महान्।**
**नो धर्माचरणे मनागनुमतिर्नो संस्कृतिप्रेरणा,**
**प्राप्तो येन तथाऽप्युदग्रमहिमा भीमाय तस्मै नमः।। 1 ।।**

**पदच्छेदः** – जन्म अस्पृश्यकुले विपत्तिविकले नानानिषेधाकुले, विद्यामन्दिरसम्प्रवेशन–विधौ लोके विरोधः महान्। नो धर्माचरणे मनाग् अनुमतिः नो संस्कृतिप्रेरणा, प्राप्तः येन तथा अपि–उदग्र–महिमा भीमाय तस्मै नमः।

**अन्वयः** – यस्य नानानिषेधाकुले विपत्तिविकले अस्पृश्यकुले जन्म, विद्यामन्दिरसम्प्रवेशन– विधौ लोके महान् विरोधः। धर्माचरणे मनाक् अनुमतिः नो, संस्कृतिप्रेरणा नो, तथापि येन उदग्रमहिमा प्राप्तः तस्मै भीमाय नमः।

**प्रसङ्गः** – अस्मिन् पद्ये कविः डॉ. भीमराव–अम्बेडकरस्य प्रभावातिशयस्य वर्णनं करोति।

**व्याख्या** – यस्य – यस्य भीमराव–अम्बेडकरस्य। नानानिषेधाकुले – विविधप्रतिबन्ध– व्याकुले। विपत्तिकाले – आपद्ग्रस्तसमये। अस्पृश्यकुले – निम्नवंशे। जन्म–जननम्, उत्पत्तिः। (अभवत्)। विद्यामन्दिरसम्प्रवेशनविधौ – विद्यालयप्रवेशविषये। लोके–जगति, संसारे। महान् – भूयान्, अत्यधिकः। विरोधः – प्रतिरोधः। धर्माचरणे – धर्मस्य परिपालने, धर्मकृत्यनिर्वाहे। नो–नैव, नहि। मनाक् – किञ्चिदपि, ईषदपि। अनुमतिः – स्वीकृतिः, अनुज्ञा। नो–नैव, नहि। संस्कृतिप्रेरणा – भारतीयसंस्कृतिविषये समुपदेशना। तथापि – पुनरपि, तदनन्तरमपि। येन – वर्ण्यमानेन (भीमरावअम्बेडकरमहोदयेन) उदग्रमहिमा – विशालगौरवम् – प्रचण्डप्रभावः। प्राप्तः – अधिगतः, लब्धः। तस्मै – तादृशाय। भीमाय– डॉ० भीमराव–अम्बेडकराय। नमः– प्रणामः, नमस्कारः, इति।

**भावार्थः** – यस्य भीमराव–अम्बेडकरस्य जन्म अनेकविधप्रतिबन्धिते अभावग्रस्तसमये निम्नकुले जातम्, तस्य इह लोके प्रचुरः विरोधः सञ्जातः। धर्माचरणस्य स्वीकृतिं स च नैव प्राप्तवान्। तथापि लोके स्वविवेकपूर्णव्यवहारेण तेन लोके महती प्रतिष्ठा प्राप्ता। अत एव विविधविरोधपरिवेशेऽपि यः प्रखरप्रभावं प्रकटितवान् तस्मै महापुरुषाय नमः इति।

**व्याकरणम्** – अस्पृश्यकुले – अस्पृश्यस्य कुलम् – अस्पृश्यकुलम् तस्मिन् अस्पृश्यकुले। विद्यामन्दिरसम्प्रवेशनविधौ – विद्यायाः मन्दिरं विद्यामन्दिरम्, तस्मिन् सम्प्रवेशनविधिः इति विद्यामन्दिरसम्प्रवेशनविधिः – तस्मिन् (षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः)। धर्माचरणे – धर्मस्य आचरणम् इति धर्माचरणम्, तस्मिन् (षष्ठीतत्पुरुषः)। प्राप्तः – प्र + आप् + क्त + सु। तस्मै तत् + ङे (स्मै) चतुर्थी–एकवचनम्।

निदर्शनम् – नि + दृश् + ल्युट् (यु–अन) + सु। दृढतरम् – दृढ + तरप् (तर) + सु। जीवनम् – जीव् + ल्युट् (यु–अन) + सु। धीरोदात्तनरोत्तमाय – धीर + उदात्त, नर + उत्तमाय – गुणसन्धिः।

**जीवानां बलजन्म दैवनियतं मान्येऽवमान्ये कुले,**
**श्रेष्ठत्वं परमात्मपौरुषपरं लोकेऽत्र निःसंशयम्**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तत्त्वस्यास्य निदर्शनं दृढतरं यस्योज्ज्वलं जीवनम्**
**धीरोदात्तनरोत्तमाय सततं भीमाय तस्मै नमः ।। 2 ।।**

**पदच्छेदः –** जीवानाम् बलजन्मदैवनियतम् मान्येऽवमान्ये कुले, श्रेष्ठत्वम् परम् आत्मपौरुषपरम् लोके अत्र निःसंशयम्। तत्त्वस्य अस्य निदर्शनम् दृढतरम् यस्य उज्ज्वलम् जीवनम्, धीरोदात्तनरोत्तमाय सततम् भीमाय तस्मै नमः।

**अन्वयः –** जीवानाम् मान्ये अवमान्ये (वा) कुले बलजन्म दैवनियतम् (भवति) परम् अत्र लोके आत्मपौरुषपरम् श्रेष्ठत्वम् निःसंशयम् (भवति इति)। इस्य तत्त्वस्य दृढतरं निदर्शनम् यस्य उज्ज्वलम् जीवनम् (विद्यते इति) तस्मै धीरोदात्तनरोत्तमाय भीमाय नमः।

**प्रसङ्गः –** आस्मिन् पद्ये कविः डॉ. भीमरावस्य जीवनं समाजस्य कृते उदाहरणस्वरूपं वर्तते इति प्रतिपादयन् कथयति यत्–

**व्याख्या –** जीवानाम् – प्राणिनाम्, जन्मधारिणाम् , मान्ये – सम्माननीये, अवमान्ये – अवमाननीये, अनादरणीये, (वा – अथवा), बलजन्म – बलं, शक्तिः वेति, जन्म च – जन्मग्रहणं च , दैवनियतम् – भाग्याधीनम्, भाग्येन निश्चितम् (अस्ति) अर्थात् पूर्वनिर्धारितमस्ति (परम् –किन्तु) अत्र – अस्मिन् जगति, इह लोके वा, श्रेष्ठत्वम् – महिमशालिता, महत्ता, श्रेष्ठता वेति, परमात्मपौरुषपरम् – आत्मनः पौरुषस्य अधीनमस्ति, ईश्वरस्याधीनम् उत्साहशक्त्यधीनं चेति (वर्तते), निःसंशयम् – निःसन्देहम् अस्य – एतस्य (पूर्वोक्तस्य), तत्त्वस्य – वृत्तान्तस्य, दृढतरम् – स्थूलतरम्, निदर्शनम् – दृष्टान्तः, उदाहरणभूतम्, यस्य – व्यक्तिविशेषस्य – डा. भीमराव (अम्बेडकरस्य) उज्ज्वलम् – स्वच्छम्, उन्नतं कीर्तिमयञ्च, जीवनम् – अखिलजीवनव्यवहारः (विद्यते – अस्ति), तस्मै – तादृशाय, भीमाय – डॉ, भीमरावअम्बेडकराय, नमः – नमस्कारः, प्रणामः,

**विशेषः –** अस्मिन् पद्ये '**दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्**' इत्यस्य अभिप्रायस्य प्रतीतिः नूनं जायते। अस्मिन् जगति प्राणिनः सम्माननीये, असम्माननीये च कुले सद् जन्मग्रहणं शक्तिग्रहणं च ईश्वराधीनमस्ति, किन्तु स्वश्रमेण पौरुषप्राप्तिः नूनं स्वाधीनं, मन्यते कथनमेतत् डॉ. भीमराव अम्बेडकरस्य अखिलेऽपि जीवने सर्वतोभावेन अवलोक्यते। एतादृशगुणगणयुक्ताय धीरोदात्तपुरुषाय डॉ. भीमरावमहापुरुषाय कविः प्रणामाञ्जलिं निवेदयति।

**मिथ्याधर्ममताभिमानकृपणैर्देशेऽखिले भारते,**
**अस्पृश्या इति धिक्कृताश्चिरमहो हा मानवैर्मानवाः।**
**शश्वन्निर्दलिता उपेक्षिततमा विद्यार्जने वञ्चिताः,**
**तेऽमी येन समुद्धृताः स्वतपसा भीमाय तस्मै नमः।। 3 ।।**

**पदच्छेदः –** मिथ्या–धर्म–मत–अभिमत–कृपणैः देशे अखिले भारते, अस्पृश्या इति धिक्कृताः चिरम् अहो हा मानवैः मानवाः शश्वत् निर्दलिताः उपेक्षिततमाः विद्या–अर्जने वञ्चिताः ते अमी येन सम् उद्धृताः स्वतपसा भीमाय तस्मै नमः।

**अन्वयः –** अहो हा ! अखिले भारते देशे मिथ्याधर्ममताभिमानकृपणैः मानवैः मानवाः अस्पृश्याः इति' चिरं धिक्कृताः। शश्वत् निर्दलिताः उपेक्षिततमाः विद्यार्जने वञ्चिताः (च) ते अमी (मनुष्याः) येन स्वतपसा समुद्धृताः तस्मै भीमाय नमः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः–** अस्मिन् पद्ये डॉ0 भीमराव–अम्बेडकरः दीनजनानामुद्धारम् अकरोत् इति कविः वर्णयति।

**व्याख्या** – अहो हा ! – हा हन्त ! अहह ! (खेदे) अखिले – सम्पूर्णे, सकले वा। भारतदेशे – आर्यावर्ते, भारतवर्षे वा। मिथ्याधर्ममताभिमानकृपणैः – व्यर्थधार्मिकतर्कगर्व (अहंकार) – कुटिलैः। मानवैः = मनुष्यैः, नरैः वा। मानवाः – मनुष्याः नराः वा। अस्पृश्याः इति – स्पर्शायोग्याः इति, स्प्रष्टुं न योग्याः इति। (एवंविधम्) चिरम् – चिरकालपर्यन्तं दीर्घकालं यावत् वा। धिक्कृताः – अपमानिताः, तिरस्कृताः वा। शश्वत् – सर्वदा, आरम्भकालादेव। निर्दलिताः – दमिताः। उपेक्षिततमाः – अवहेलिततमाः, नितराम् अवमानिताः वा। विद्यार्जने – ज्ञानप्राप्तिविषये। वञ्चिताः – अवरोधिताः, प्रतारिताः वा। ते अमी–पूर्वोक्ताः एते निर्दलितादयः। येन–जनविशेषेण (डॉ. भीमराव–अम्बेडकरेण) स्वतपसा – निजतपोबलेन, अनवरतप्रयासैः वा। समुद्धृताः परिरक्षिताः – संरक्षिताः। तस्मै – तादृशाय, तत्स्वरूपाय वा। भीमाय – डॉ0 भीमराव–अम्बेडकराय। नमः – नमस्कारः इति।

**भावार्थः** – हन्त ! सम्पूर्णभारतवर्षे निरर्थकधार्मिकाहंकारैः मानवैः मनुष्याः स्पर्शयोग्याः न सन्तीति वचनैः दीर्घकालं यावत् अपमानिताः अतिष्ठन्। ये निरन्तरं निर्दलिता उपेक्षिता विद्यार्जनवञ्चिताः आसन् तेषां कृते सम्मानप्रदानार्थं प्रयासः विहितः, एतादृशाय भीमराव–अम्बेडकराय नमः इति।

**व्याकरणम्** –

मिथ्याधर्ममताभिमानकृपणैः – मिथ्याधर्ममतस्य अभिमानमिति मिथ्याधर्ममताभिमानम्, तस्मिन् कृपणः इति मिथ्याधर्ममताभिमानकृपणः, तैः (ष.त.)। (स.त.)। उपेक्षिततमाः – उपेक्षित + तमप् (तम्) + जस्। विद्यार्जने – विद्यायाः अर्जनम् इति विद्यार्जनम्, तस्मिन् विद्यार्जने (ष.त.)। वञ्चिताः– वञ्च् + क्त (त) + जस्। अमी – अदस् + जस् (पुं.प्र.ब.)। स्वतपसा – स्वस्य तपः इति स्वतपः, तेन स्वतपसा (ष. त.)।

**अज्ञानोपहतात्मनां जडधियां व्यालुप्तसत्कर्मणाम्,**
**न ज्ञानेन विना कदाचन भवेज्ज्योतिर्मयं जीवनम्।**
**तद्विद्याऽभिमुखीकृता स्वजनता येन प्रबुद्धात्मना,**
**विद्याराधननैष्ठिकाय विदुषे भीमाय तस्मै नमः।। 4 ।।**

**पदच्छेदः** – अज्ञान–उपहत–आत्मनाम् जडधियाम् व्यालुप्तसत्कर्मणाम्, न ज्ञानेन विना कदाचन भवेत् ज्योतिर्मयं जीवनम्, तद्विद्याः अभिमुखीकृता स्वजनता येन प्रबुद्ध–आत्मना विद्या–आराधन–नैष्ठिकाय विदुषे भीमाय तस्मै नमः।

**अन्वयः** – अज्ञानोपहतात्मनाम् जडधियाम् व्यालुप्तसत्कर्मणाम् (च) जीवनम् ज्ञानेन विना न कदाचन (अपि) ज्योतिर्मयं भवेत् (इति) तद् येन प्रबुद्धात्मना स्वजनता विद्याभिमुखीकृता तस्मै विद्याराधननैष्ठिकाय विदुषे भीमाय नमः।

**प्रसङ्गः** – अस्मिन् पद्ये डॉ0 भीमराव–अम्बेडकरः उपेक्षितवर्गस्य जनानां मध्ये विद्यायाः प्रचारं–प्रसारं च कृतवान् इति वर्ण्यते।

**व्याख्या–** अज्ञानोपहतात्मनाम् – अविद्याग्रस्तचेतसाम्। जडधियाम् जडबुद्धीनाम्। व्यालुप्तसत्कर्मणाम् – प्रणष्टसत्कृत्यानाम् (जनानामिति शेषः)। जीवनम् – प्राणधारणम्। ज्ञानेन विना – विद्याम् अन्तरेण, ज्ञानस्य अभावे वा। कदाचन – कदाचिदपि। ज्योतिर्मयम् – प्रकाशमयम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ज्ञानप्रकाशितमिति भावः)। न भवेत् – न स्यात्। तद् – तर्हि। येन–जनविशेषेण (भीमरावेण)। स्वजनताः – निजजनाः (तथाकथितः अस्पृश्यसमाजः इति)। विद्याऽभिमुखीकृताः – ज्ञानप्राप्तिविषये प्रेरिताः। तस्मै–तादृशाय। विद्याराधननैष्ठिकाय – ज्ञानसमाराधानप्रतिज्ञाय। विदुषे–ज्ञानिने, विपश्चिते विज्ञाय वा भीमाय– डॉ0 भीमराव–अम्बेडकराय। नमः – नमस्कारः इति।

**भावार्थः –** येन भीमराव–अम्बेडकरेण अविद्याग्रस्तानां, जडमतीनां प्रणष्टसत्कर्मणां जनानां मध्ये विद्याध्ययनार्थं प्रेरितम्। एतादृशः विद्या–नैष्ठिकः विज्ञः प्रणम्यः इति।

**व्याकरणम् –** अज्ञानोपहतात्मनाम् – अज्ञानेन उपहत आत्मा यस्य सः अज्ञानोपहतात्मा, तेषाम् अज्ञानोपहतात्मनाम् (बहुव्रीहिः) कदाचन – किम् (क) दा + चन। जीवनम् – जीव् + ल्युट् (यु – अन)। स्वजनता – स्वस्य जनः स्वजनः, तस्य भावः, कर्म वा स्वजनता। विदुषे – विद् + मतुप् (मत्) (ङे.)।

**श्रीमन्वादिभिराद्यवागनुगतैः सौराज्यकार्योचितः,**
**पन्थाः प्राक्तनधर्मशास्त्रविधिवत् क्षुण्णः पुरा भारते।**
**कालेनोपहतः स येन सुधिया काले नवे संस्कृतः,**
**सश्रद्धं नवसंविधानऋषये भीमाय तस्मै नमः।। 5 ।।**

**पदच्छेदः –** श्रीमन्वादिभिः आद्यवाग् अनुगतैः सौराज्य–कार्य + उचितः, पन्थाः प्राक्तन– धर्मशास्त्रविधिवत् क्षुण्णः पुरा भारते, कालेन उपहतः सः येन सुधिया काले नवे संस्कृतः, सश्रद्धम्, नवसंविधानऋषये भीमाय तस्मै नमः।

**अन्वयः–** पुरा भारते आद्यवाग् अनुगतैः श्रीमन्वादिभिः क्षुण्णः, प्राक्तनधर्मशास्त्रविधिवत् सौराज्यकार्योचितः पन्थाः कालेन उपहृतः। येन सुधिया नवे काले सः (पन्थाः) संस्कृतः (इति) तस्मै नवसंविधान–ऋषये भीमाय सश्रद्धं नमः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः डॉ. भीमराव–अम्बेड़करमहोदयः भारतदेशे नवीनं संविधानम् अरचयत् इति प्रतिपादयति।

**व्याख्या –** पुरा – प्राचीनकाले, पुरातनसमये। भारते – भारतवर्षे, भारतराष्ट्रे वा। आद्यवागनुगतैः – आदिवाणीम् अनुसरद्भिः प्रथमगिरमनुगच्छद्भिः। श्रीमन्वादिभिः श्रीमद्भिः मनुप्रभृतिभिः धर्माचार्यैः। क्षुण्णः – अभ्यस्तः। प्राक्तनधर्मशास्त्रविधिवत् – पूर्वतनस्मृतिग्रन्थानुरूपम्। सौराज्यकार्योचितः सुशासनकर्तव्ययोग्यः। पन्थाः – मार्गः, अध्वा वा। कालेन – समयेन, यथाकालम्, कालक्रमेण वा। उपहतः = निहतः, क्षीणः, खण्डितो वा। सः – सः मार्गः। येन सुधिया – येन सुबुद्धिना, सन्मतिना वा। नवे काले – नूतनसमये, आधुनिककाले वा। संस्कृतः संशोधितः, परिष्कृतः वा। तस्मै – तादृशाय। नवसंविधानऋषये – नवीनधर्मसिद्धान्तसंस्थापकाय, नवीनाचारद्रष्ट्रे। भीमाय – डॉ. भीमराव–अम्बेड़करमहोदयाय। सश्रद्धम् – सादरम्, श्रद्धापूर्वकं वा। नमः – नमस्कारः इति।

**भावार्थः –** प्राचीनकाले भारतदेशे संस्कृतवाणीम् आश्रित्य मनुसदृशैः धर्माचार्यैः निर्मितं धर्मशास्त्रं सम्यगधीत्य सुशासनकार्योचितः नवीनः मार्गः श्रीमता भीमराव–अम्बेडकरमहोदयेन आश्रितः। एतादृशनूतनसंविधाननिर्मात्रे श्रीमते भीमरावमहोदयाय नमस्कारः इति।

## व्याकरणम्

श्रीमन्वादिभिः – श्रीमनु–आदिभिः – यण्सन्धिः। आद्यवागनुगतैः – आद्यवाचम् अनुगतः इति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आद्यवागनुगतः, तैः आद्यवागनुगतैः। क्षुण्णः – क्षुद् + क्तः (त) + सु। कालेनोपहतः – कालेन + उपहतः (गुणसन्धिः)। सश्रद्धम् – श्रद्धया + सह इति सश्रद्धम्। नवसंविधानऋषये – नवसंविधानस्य ऋषिः इति नवसंविधानऋषिः तस्मै नवसंविधान–ऋषये।

**अध्यात्मप्रवणो नितान्तकरुणापूर्णोऽष्टमार्गात्मकः,**
**सद्धर्मः किल सम्प्रवर्तित इह श्रीबुद्धदेवेन यः।**
**कालेनाऽस्तमितोऽपि येन स पुनः सञ्जीवितो भारते,**
**भक्त्या धर्मधुरन्धराय कृतिने भीमाय तस्मै नमः।। 6।।**

**पदच्छेदः –** अध्यात्मप्रवणः नितान्तकरुणापूर्णः अष्टमार्गात्मकः सद्धर्मः किल सम्प्रवर्तितः इह श्रीबुद्धदेवेन यः, कालेन अस्तमितः अपि येन सः पुनः सञ्जीवितः भारते भक्त्या धर्मधुरन्धराय कृतिने भीमाय तस्मै नमः।।

**अन्वयः –** इह किल श्रीबुद्धदेवेन यः अध्यात्मप्रवणः, नितान्तकरुणापूर्णः, अष्टमार्गात्मकः (च) सद्धर्मः सम्प्रवर्तितः सः कालेन अस्तमितः अपि येन भारते पुनः सञ्जीवितः (इति) तस्मै धर्मधुरन्धराय कृतिने भीमाय भक्त्या नमः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः कथयति यतः– डॉ. भीमराव–अम्बेड़करः सद्धर्मस्य प्रवर्तनं कृतवान् इति।

**व्याख्या –** इह – अत्र। किल – नूनम्। श्रीबुद्धदेवेन – महात्मना बुद्धेन। यः – अग्रे वर्ण्यमानः (सद्धर्मः), अध्यात्मप्रवणः – आत्मचिन्तनपरः। नितान्तकरुणापूर्णः – दयाभावपरिपूर्णः सुतरां कारुण्यभरितः। अष्टमार्गात्मकः – अष्टसिद्धान्तमयः। सद्धर्मः – उत्कृष्टधर्मः, श्रेष्ठधर्मः। किल – खलु, निश्चयेन। सम्प्रवर्तितः सम्प्रेरितः, प्रतिपादितः। कालेन – कालक्रमेण, समयपरिवर्तनेन। अस्तमितः – लुप्तोऽपि, अस्तं गतोऽपि। सः – सद्धर्मः। येन – डॉ. भीमराव–अम्बेडकरेण। भारते –भारतदेशे। पुनः – भूयः। सञ्जीवितः – सम्प्रवर्तितः, सम्प्राणितः। तस्मै – तादृशाय। धर्मधुरन्धराय – धर्मधौरेयाय, धर्मपालनमूर्धन्याय। कृतिने – पुण्यवते, पुण्यात्मने, भीमाय – डॉ. भीमराव–अम्बेडकराय। भक्त्या–भक्तिभावेन, आदरपूर्वकम्। नमः = नमस्कार इति।

**भावार्थः –** अत्र महात्मनः बुद्धस्य मार्गमाश्रित्य डॉ. भीमराव–अम्बेडकरः आत्मचिन्तनपरं कारुण्ययुक्तम्, अष्टसिद्धान्तमयं श्रेष्ठधर्मं प्रतिपादितवान्। कालक्रमेण लुप्तोऽपि यः सद्धर्मः (बौद्धधर्मः) तद्धर्मः पुनः भारतदेशे अनेन पुनः सम्प्राणितः। एतादृशगुणयुक्ताय धर्मधौरेयाय पुण्यात्मने भीमाय सादरं नमस्कारः इति।

**व्याकरणम् –** अध्यात्मप्रवणः – अध्यात्मे प्रवणः इति अध्यात्मप्रवणः (स.त.)। सद्धर्मः – सत् चासौ धर्मः इति सद्धर्मः (कर्मधा.)। सम्प्रवर्तित – सम् + प्र + वृत् + क्त + सु। सज्जीवितः सम् + जीव् + क्त + सु। धर्मधुरन्धराय – धर्मेषु धुरन्धरः इति धर्मधुरन्धरः तस्मै धर्मधुरन्धराय (स.तत्पु.)। कृतिने – कृतिन् + ङे.(ए) च.वि.ए.व.।

**अन्यायप्रतिरोधिने नयवते पाखण्डविध्वंसिने,**
**अत्याचारविमर्दिने बलवते निःशक्तसंरक्षिणे।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**युक्तायुक्तविवेकिने मतिमते सद्धर्मसंस्कारिणे,**

**दीनानाथसुधारिणे कृतिमते भीमाय तस्मै नमः।। 7।।**

**पदच्छेदः –** अन्यायप्रतिरोधिने नयवते पाखण्डविध्वंसिने अत्याचारविमर्दिने बलवते निःशक्तसंरक्षिणे युक्तायुक्तविवेकिने मतिमते सद्धर्म–संस्कारिणे दीनानाथ–सुधारिणे कृतिमते भीमाय तस्मै नमः।

**अन्वयः –** अन्यायप्रतिरोधिने, नयवते, पाखण्डविध्वंसिने, अत्याचारविमर्दिने, बलवते, निःशक्तसंरक्षिणे, युक्तायुक्तविवेकिने, मतिमते, सद्धर्मसंस्कारिणे, दीन–अनाथ–सुधारिणे तस्मै कृतिमते भीमाय नमः।

**प्रसङ्गः –** अस्मिन् श्लोके डॉ0 भीमराव–अम्बेडकरस्य व्यक्तित्वे विद्यमानानां विशिष्टगुणानां वर्णनं विद्यते।

**व्याख्याः –** अन्यायप्रतिरोधिने – अनुचितकर्मविरोधिने, दुर्निर्णयविरोधिने। नयवते – नीतिशास्त्रनिपुणाय, नीतिमते। पाखण्डविध्वंसिने – आडम्बरविघातिने। अत्याचारविमर्दिने – क्रूरकृत्यविनाशिने, कदाचारविनाशकर्त्रे। बलवते – शक्तिमते, शक्तियुक्ताय। निःशक्तसंरक्षिणे – असमर्थजनपालकाय, सामर्थ्यशून्यजनसंधारकाय। युक्तायुक्तविवेकिने – उचितानुचितज्ञानसम्पन्नाय, सद्असद्विवेकयुक्ताय। मतिमते – सुधिये, बुद्धिमते। दीनानाथसुधारिणै – दैन्यग्रस्तजनपरिष्कारिणे, निर्धन अनाथजनानां सुधारकर्त्रे। तस्मै– तादृशाय। कृतिमते – कृतकृत्याय, क्रियासिद्धियुक्ताय, भीमाय – डॉ. भीमराव–अम्बेडकराय। नमः नमस्कारः इति।

भावार्थः – अनुचितकार्यविरोधिने नीतिमते आडम्बरविरोधिने क्रूरकृत्यविनाशिने शक्तियुक्ताय असमर्थजनपालकाय उचितानुचितज्ञानसम्पन्नाय बुद्धिमते श्रेष्ठधर्मसंस्कारिणे दीन–अनाथ–सुधारकर्त्रे बुद्धियुक्ताय श्रीमते डा. भीमराव–अम्बेडकराय नमः।

## व्याकरणम् –

अन्यायप्रतिरोधिने–अन्यायस्य प्रतिरोधी इति अन्यायप्रतिरोधी, तस्मै अन्यायप्रतिरोधिने। पाखण्डविध्वंसिने–पाखण्डस्यविध्वंसी इति पाखण्डविध्वंसी तस्मै – पाखण्डविध्वंसिने। मतिमते – मति + मतुप् (मत्) + ङे (च.ए.) सद्धर्मसंस्कारिणे – सद्धर्मस्य संस्कारी इति सद्धर्मसंस्कारी, तस्मै सद्धर्मसंस्कारिणे। कृतिमते–कृति + मतुप् (मत्) + ङे (ए) च.ए.व.।

**अनग्रजन्माऽपितु योऽग्र्यजन्मा,**

**निषिद्धधर्माऽपितु धर्म्यकर्मा।**

**अभीमधामाऽपितु भीमनामा,**

**समादरान्मे शतशः प्रणामाः।। 8 ।।**

**पदच्छेदः –** अनग्रजन्मा अपितु यः अग्र्यजन्मा, निषिद्धधर्मा अपितु धर्म्यकर्मा अभीमधामा अपितु भीमनामा समादरात् मे शतशः प्रणामाः।

**अन्वयः –** यः अनग्रन्मा अपितु अग्र्यजन्मा (यः) निषिद्धधर्मा अपितु धर्म्यकर्मा। (यः) अभीमधामा अपितु भीमनामा। समादरात् मे शतशः प्रणामाः।

**प्रसङ्गः –** अस्मिन् श्लोके कविः सादरं डॉ. भीमराव–अम्बेडकरं प्रणमति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** – यः व्यक्तिविशेषः (भीमरावः) अनग्रजन्मा अपि – उच्चकुले जन्म अलब्ध्वाऽपि। अग्र्यजन्मा –श्रेष्ठजन्मा, उत्तमजन्मवान्। यः व्यक्तिविशेषः, निषिद्धधर्मा अपि–अननुमतधर्माचरणः अपि, धर्माचरणे निवारितः अपि। धर्म्यकर्मा – धार्मिककृत्यनिर्वाहकः धर्मानुकूलकृत्यः अपि। अभीमधामा अपि – अभयङ्करतेजाः अपि, अभयप्रदप्रभावः अपि। भीमनामा – भीमनामकः भीमाभिधानः, समादरात्– श्रद्धावशात्, निष्ठापूर्वकम्। मे – मम। शतशः– शतसंख्याकाः अनेकशः। प्रणामाः – नमस्काराः, प्रणतयः इति।

**भावार्थः** – यः भीमरावः अनुच्चकुले जनिं लब्ध्वाऽपि श्रेष्ठः अभवत्। धर्माचरणाद् दूरीकृतोऽपि ध र्मानुकूलकार्यं सम्पादितवान्। अभयङ्करशरीरस्थोऽपि भीमनामधेयः यः तं ससम्मानं कविः नमस्करोतीति।

**व्याकरणम्** :– अनग्रजन्मा – न अग्रजन्मा इति अनग्रजन्मा (नञ्–समासः)। निषिद्धः धर्मः यस्य स निषिद्धधर्मा (बहुव्रीहिः)। मे – अस्मद् + ङस् (ष.ब.)। समादरात् – समादर + ङसि. (पं. ए.व.)।

## अभ्यासप्रश्नाः

### 1. अतिलघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य एकपङ्क्तौ उत्तरं प्रदेयमिति।**

1. डॉ. भीमराव अम्बेडकरस्य जन्म कस्मिन् कुलेऽभवत् ?
2. अस्पृश्यकुलानां कृते डॉ. भीमरावः किं कृतवान् ?
3. जीवानां बलं जन्म च कस्य अधीनं भवति ?
4. लोके श्रेष्ठत्वं केन (माध्यमेन) प्राप्यते ?
5. अस्पृश्यभावनया कीदृशैः मानवैः मानवाः चिरं धिक्कृताः ?
6. जीवनं केन विना ज्योतिर्मयं न सम्भाव्यते ?
7. अष्टमार्गात्मकः सद्धर्मः केन सम्प्रवर्तितः ?
8. कः अन्यायप्रतिरोधी उच्यते ?

### 2. लघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य पंक्तिचतुष्टयात्मकम् उत्तरं प्रदेयम् –**

1. पुरा अस्पृश्यजनानां कृते किं किं निषिद्धम् आसीत् ?
2. डॉ० भीमराव–अम्बेडकरस्य जीवनं कस्य तत्त्वस्य निदर्शनं विद्यते ?
3. डॉ० भीमरावेण स्वतपसा कीदृशाः जनाः समुद्धृताः ?
4. कीदृशानां जनानां जीवनं ज्योतिर्मयं न सम्भाव्यते ?
5. ज्ञानमुद्दिश्य डॉ. भीमरावेण किं किम् आचरितम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

6. पुरा भारतवर्षे कः पन्थाः कालेन उपहतः ? केन च पुनः संस्कृतः ?
7. कः सद्धर्मः श्रीबुद्धदेवेन सम्प्रवर्तितः ?
8. अष्टमार्गात्मकः सद्धर्मः कः इति लेखनीयम्।

## 3. निबन्धात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य दशसु पङ्क्तिषु उत्तरं प्रदेयम् –**

1. 'तथाऽपि उदग्रमहिमा प्राप्तः' इत्यस्य आशयं स्पष्टयत।
2. 'जीवानां बलजन्मदैवनियतम्' इति कथनस्य कोऽभिप्रायः ?
3. भीमाष्टकस्य लेखकस्य सङ्क्षिप्तः परिचयः प्रदेयः।
4. अस्पृश्यताविषये स्वकीयं मतं प्रकटयत।
5. नवसंविधान–ऋषिः कः किमर्थं च इति स्पष्टयत।
6. डॉ0 भीमराव–अम्बेडकरमहोदयस्य गुणविशेषाः वर्णनीयाः।
7. अनग्रजन्माऽपितु ............................ इत्यादिनः पद्यस्य भावः लेख्यः।
8. 'भीमाष्टकम्' इति पाठस्य सारांशः लेखनीयः।

## व्याकरणपल्लवनम् –

### सन्धिपरिचय :–

निषेधाकुले – निषेध + आकुले – दीर्घः (स्वरसन्धिः)।

मनागनुमतिः – मनाक् + अनुमतिः – जश्त्वम्, हल्सन्धिः।

तथाप्युदग्रमहिमा – तथापि + उदग्रमहिमा – यण्, स्वरसन्धिः।

मान्येऽवमान्ये – मान्ये + अवमान्ये – पूर्वरूपम्, स्वरसन्धिः।

उज्ज्वलम् – उत् + ज्वलम् – जश्त्वम्, श्चुत्वम्, हल्सन्धिः।

यस्योज्ज्वलम् – यस्य + उज्ज्वलम् – गुणः, स्वरसन्धिः।

नरोत्तमः – नर + उत्तमः – गुणः, स्वरसन्धिः।

देशेऽखिले – देशे + अखिले – पूर्वरूपम्, स्वरसन्धिः।

धिक्कृताश्चिरम् – धिक् + कृताः+ चिरम् – सत्वम्, श्चुत्वम्, विसर्गसन्धिः।

निर्दलिताः – निः+दलिताः – रुत्वम्, विसर्गसन्धिः।

शश्वन्निर्दलिताः – शश्वत् + निर्दलिताः – अनुनासिकपरसवर्णः, हल्सन्धिः।

तेऽमी – ते + अमी – पूर्वरूपम्, स्वरसन्धिः।

व्यालुप्तम् – वि + आलुप्तम् – यण्, स्वरसन्धिः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ज्योतिर्मयम् – ज्योतिः + मयम् – रुत्वम्, विसर्गसन्धिः।

मन्वादिभिः – मनु + आदिभिः – यण्, स्वरसन्धिः।

आद्यवागनुगतैः – आद्यवाक् + अनुगतैः – जश्त्वम्, हल्सन्धिः।

योऽग्र्यजन्मा – यः + अग्रजन्मा – रुत्वम्, उत्वम्, पूर्वरूपम्, विसर्गसन्धिः।

समादरान्मे – समादरात् + मे – अनुनासिकपरसवर्णः, हल्सन्धिः।

**समासपरिचयः –**

अस्पृश्यकुले – अस्पृश्यं च तत् कुलम् इति तस्मिन् अस्पृश्यकुले (कर्मधारयः)। विपत्तिविकले – विपत्तिभिः विकले इति विपत्तिविकले (तृ. तत्पु.)।

नानानिषेधाकुले – नानानिषेधैः आकुलम् इति नानानिषेधाकुलम्, तस्मिन् (तृ.तत्पु.)।

विद्यामन्दिरम् – विद्यायाः मन्दिरम् इति विद्यामन्दिरम् (ष. तत्पु.)।

विद्यामन्दिरसम्प्रवेशनम् – विद्यामन्दिरे सम्प्रवेशनम् इति विद्यामन्दिरसम्प्रवेशनम् (स.तत्पु.)।

उदग्रमहिमा – उदग्रः च असौ महिमा इति उदग्रमहिमा (कर्मधारयः)।

बलजन्म – बलं च जन्म च इत्यनयोः समाहारद्वन्द्वः।

दैवनियतम् – दैवेन नियतम् इति दैवनियतम् (तृ.तत्पु.)।

निःसंशयम् – निर्गतः संशयः यस्माद् इति तत् (विशेषणपदं) बहुव्रीहिः

धीरोदात्तनरोत्तमाय – धीरोदात्तः च असौ नरोत्तमः इति तस्मै धीरोदात्तनरोत्तमाय (कर्मधारयः)।

मिथ्याधर्ममताभिमानकृपणैः – मिथ्याधर्ममतानाम् अभिमानेन कृपणः इति मिथ्याभिमानकृपणः तैः इति (तृ.तत्पु.)।

अस्पृश्याः – न स्पृश्याः इति – नञ् – तत्पुरुषः।

अज्ञानोपहतात्मनाम् – अज्ञानेन उपहतः आत्मा येषाम् इति अज्ञानोपहतात्मानः तेषाम् इति अज्ञानोपहतात्मनाम् (ब.व्री.)।

व्यालुप्तसत्कर्मणाम् – व्यालुप्तानि सत्कर्माणि यस्य इति व्यालुप्तसत्कर्मा, तेषाम् इति व्यालुप्तसत्कर्मणाम् (ब.व्री.)।

विद्यायाः आराधनम् इति विद्याराधनम् – षष्ठीतत्पुरुषः।

प्रबुद्धात्मना – प्रबुद्धः आत्मा यस्य इति प्रबुद्धात्मा, तेन इति प्रबुद्धात्मना (ब.व्री.)। विद्याराधन नैष्ठिकाय – विद्याराधनाय नैष्ठिकः इति विद्याराधननैष्ठिकः तस्मै आद्यवागनुगतैः – आद्या च असौ वाक् इति आद्यवाक् – कर्मधारयः। आद्यवाचम् अनुगतः इति आद्यवागनुगतः तैः इति आद्यवागनुगतैः (द्वि.त.)।

सश्रद्धम् – श्रद्धया सहितम् इति सश्रद्धम् (अव्ययीभावः)।

नवसंविधानऋषये – नवसंविधानस्य ऋषिः इति नवसंविधानऋषिः, तस्मै इति नवसंविधानऋषये (ष.तत्पु.)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

धर्मधुरन्धराय – धर्मे (धर्माचरणे) धुरन्धरः इति धर्मधुरन्धरः, तस्मै धर्मधुरन्धराय (स.तत्पु.)।

अन्यायप्रतिरोधिने – न न्यायः इति अन्यायः – नञ्तत्पुरुषः, अन्यायस्य प्रतिरोधिने इति षष्ठीतत्पुरुषः।

अग्रजन्मा – अग्रे जन्म यस्य सः इति अग्रजन्मा (ब.व्री.)।

अनग्रजन्मा – न अग्र्यजन्मा इति अनग्रजन्मा (नञ्–तत्पु.)।

निषिद्धधर्मा – निषिद्धः धर्मः यस्मै सः इति निषिद्धधर्मा (ब.व्री.)।

धर्म्यकर्मा – धर्म्याणि कर्माणि यस्य सः इति (ब.व्री.)।

अभीमधामा – न भीमं धाम यस्य सः इति (ब.व्री.)।

भीमनामा – भीमः इति नाम यस्य सः इति (ब.व्री.)।

**प्रकृतिप्रत्ययानां परिचयः –**

विरोधः – वि + रुध् (धातुः) + घञ् (प्रत्ययः) पुं.प्र.ए.व.।

प्रेरणा – प्र + ईर् (धातुः) + युच् (प्रत्ययः) स्त्री प्र.ए.व.।

अवमान्ये – अव + मन् (धातुः) + ण्यत् (प्रत्ययः) भावे नपुं. स.ए.व.।

निदर्शनम् – नि + दृश् (धातुः) + ल्युट् (प्रत्ययः) नपुं.प्र.ए.व.।

उज्ज्वलम् – उत् + ज्वल् (धातुः) + अच् (प्रत्ययः) विशेषणम्– नपुं.प्र.ए.व.।

दृढतरम् – दृढ (शब्दः) + तरप् (प्रत्ययः) नपुं.प्र.ए.व.।

निर्दलिताः – निर् + दल् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ब.व.।

उपेक्षिततमाः– उप + ईक्ष् (धातुः) क्त (प्रत्ययः) + तमप् (प्रत्ययः) पुं.प्र.ब.व.।

वञ्चिताः – (वचि) वञ्च् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ब.व.।

क्षुण्णः – क्षुद् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

उपहतः – उप + हन् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

संस्कृतः – सम् (सुट्) + कृ (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

भक्त्या – भज् (धातुः) + क्तिन् (प्रत्ययः) स्त्री.तृ.ए.व.।

सञ्जीवितः – सम् + जीव् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

प्रणामाः – प्र + नम् (धातुः) + घञ् (प्रत्ययः) पुं.प्र.ब.व.।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्थः पाठः

## नीतिश्लोकाः

(नीतिशतकात्)

**भर्तृहरिः**

### परिचयः

सूक्तिः सदुक्तिः वा सुभाषितमिति कथ्यते। सुभाषितानां प्रतिपाद्यवस्तुनः क्षेत्रं सुविशालं भवति, यद् वा अपरिमितं निस्सीममेव भवतीति। काव्यशास्त्रविनोदः, लोकोक्तयः, काव्यात्मक– सौन्दर्ययुक्ताः उपदेशाः, वक्रोक्तिवचनानि, अन्योक्तिवचनानि, भावानां मनोवैज्ञानिकं निरूपणम्, आध्यात्मिकं दार्शनिकं च चिन्तनम्, जीवनदिशा–निर्देशकानि नीतिवचननानि चेति अनेके विषयाः सुभाषितेषु समाविष्टाः सन्ति। तथापि नीतिवचनानामेव प्राधान्यं मुख्यरूपेण सुभाषितेषु दृश्यते। एतस्मिन् पाठेऽपि नीतिवचनानि एव सङ्गृहीतानि सन्ति। एतानि नीतिवचनानि विभिन्नेभ्यः ग्रन्थेभ्यः न सङ्कलितानि, अपितु श्रीभर्तृहरिविरचित 'नीतिशतक' नामधेयात् ग्रन्थाद् एव पद्यरूपाणि सङ्कलितानि सन्ति। एतेषां नीतिपरकपद्यानाम् अङ्गीकरणेन अस्माकं जीवने बहुविधः लाभः भवितुमर्हति। एतदर्थमेव यानि महत्त्वपूर्णानि पद्यानि सन्ति, तेषामेव सङ्ग्रहः अत्र विद्यते।

सुभाषितैरलङ्कृतस्य 'नीतिशतक' नामधेयस्य ग्रन्थविशेषस्य रचयिता महाकविः भर्तृहरिः विद्यते। अस्य महाकवेः शतकत्रयं संस्कृतकाव्यजगति सुविख्यातं वर्तते। तेषां नामानि इमानि सन्ति – (1) नीतिशतकम् (2) शृङ्गारशतकम् (3) वैराग्यशतकम्। अस्य महाकवेः जन्मदेश–कालादि विषये पर्याप्तं प्रामाणिकं तथ्यं न उपलभ्यते। तथापि दन्तकथानुसारेण अयं महाकविः महाराजस्य विक्रमादित्यस्य अग्रजः आसीदिति स्वीक्रियते। एतदर्थम् अस्य स्थितिकालः ईसा–पूर्व–प्रथम–शताब्दी मन्यते।

### नीतिश्लोकाः

**अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं, ब्रह्माऽपि तं नरं न रञ्जयति ।। 1 ।।**

**पदच्छेदः –** अज्ञः सुखम् आराध्यः सुखतरम् आराध्यते विशेषज्ञः। ज्ञानलवदुर्विदग्धम्, ब्रह्मा अपि तम् नरम् न रञ्जयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** – अज्ञः सुखम् आराध्यः विशेषज्ञः सुखतरम् आराध्यते। (किन्तु) ज्ञानलवदुर्विदग्धं तं नरं ब्रह्मा अपि न रञ्जयति।

**प्रसङ्गः** – अत्र कविः मानवप्रकृतिं त्रिषु भागेषु विभज्य मूर्खस्य हठवादितां वर्णयति।

**व्याख्या** – अज्ञः जानातीति ज्ञः, न जानातीति अज्ञः अर्थात् – मूर्खः ज्ञानहीनः अज्ञानी वा। सुखम् सूखपूर्वकं सरलतापूर्वकं वा। आराध्यः – आराधयितुं योग्यः बोधयितुं योग्यः वा। विशेषज्ञः विशेषं जानातीति विशेषज्ञः, अर्थात् विशेषज्ञाता विज्ञः वा। सुखतरम् सरलतररूपेण। आराध्यते – बोध्यते, बोधयितुं शक्यते वा। ज्ञानलवदुर्विदग्धम् – स्वल्पमात्रज्ञानेन पण्डितम्मन्यः इति। तम् – तादृशम्, नरम् – पुरुषम्, ब्रह्मा अपि–साक्षात् पितामहः अपि, विधाता अपि वा। न – नहि, रञ्जयति प्रसादयति, सन्तोषयति वा। अत्र अर्थापत्तिः अलङ्कारो वर्तते।

**भावार्थः** – अज्ञः जनः अल्पेन प्रयासेन प्रसादयितुं शक्यः भवति विशेषज्ञस्तु नितान्तमनायासेन प्रसादनीयः भवति, परन्तु पण्डितमानिनं मूर्खजनं स्वयं ब्रह्मा (विधाता) अपि प्रसादयितुं न शक्नोति।

## व्याकरणम् –

अज्ञः–न जानातीति अज्ञः। आराध्यः – आङ्. (आ) + राध् + ण्यत् (य) + सु। ज्ञानलवदुर्विदग्धम् – ज्ञानस्य लवः इति ज्ञानलवः, तेन दुर्विदग्ध इति ज्ञानलवदुर्विग्धः, तम्। रञ्जयति – रञ्ज् + णिच् + लट्–तिप्।

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति।। 2 ।।**

**पदच्छेदः** – दानम् भोगः नाशः तिस्रः गतयः भवन्ति वित्तस्य, यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति।

**अन्वयः** – वित्तस्य दानं, भोगः नाशः (इति) तिस्रः गतयः भवन्ति। यः (धनं) न ददाति न (च) भुङ्क्ते, तस्य तृतीया गतिः भवति।

**प्रसङ्गः** – अस्मिन् श्लोके कृपणानां वित्तस्य का गतिः भवतीति कविः निरूपयति।

**व्याख्याः** – वित्तस्य – धनस्य अर्थस्य वा, दानम् – प्रदानं, वितरणं वा, भोगः – उपभोगः, ऐश्वर्यसुखादिप्राप्तिः वा, नाशः – विनाशः, विघ्नं वा, तिस्रः त्रिसंख्याकाः, गतयः परिणामाः, दशाः वा, भवन्ति – जायन्ते। यः – जनः, न ददाति – दानं न करोति, न च भुङ्क्ते – न च उपभोगं करोति, तस्य – धनस्य, वित्तस्य वा, तृतीया – अवशिष्टा विनाशरूपा तृतीयसंख्याका, गतिः – अवस्था परिणामो वा भवति – जायते। अत्र आर्यानामच्छन्दः वर्तते।

**भावार्थः** – वित्तस्य (धनस्य) सत्पात्रेभ्यः वितरणम्, आत्मनः कृते सुखाद्युपभोगः विनाशश्च–एताः तिस्रः गतयः भवन्ति। यः पुरुषः धनस्य दानं न करोति, स्वयम् उपभोगं न करोति तस्य पुरुषस्य अवशिष्टमखिलं धनं विनश्यति।

## व्याकरणम् –

गतयः – गम् + क्तिन् (ति) + जस्। नाशः – नश् + घञ् (अ) + सु। भोगः – भुज् – घञ् (अ)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

+ सु। दानम् – दा + ल्युट् (यु – अन) + सु – अम्)

**सिंहः शिशुरपि निपतति, मदमलिनकपोलभित्तिषु गजेषु।**

**प्रकृतिरियं सत्त्ववतां, न वयस्तेजसां हेतुः।। 3 ।।**

**पदच्छेदः –** सिहः शिशुः अपि निपतति मदमलिनकपोलभित्तिषु गजेषु। प्रकृतिः वयः तेजसः हेतुः न खलु (भवति)।

**प्रसङ्गः –** अस्मिन् श्लोके कविः बलशालिनां स्वभावं वर्णयति।

**व्याख्या –** शिशुः अपि –अल्पवयस्कोऽपि, बालोऽपि वा, सिंहः केसरी मृगेन्द्रः वा, मदमलिनकपोलभित्तिषु – मदजलदानजलेन समलगण्डपटलेषु, गजेषु – हस्तिषु करिषु वा, निपतति – आक्रमणं करोति, प्रहरति वा, इयम् – एषा, सत्ववताम् – बलशालिनां प्रतापशालिनां वा, प्रकृतिः, स्वभावः, मूलप्रवृत्तिः वा, वयः – अवस्था, आयुः वा, तेजसः प्रतापस्य वर्चसः वा, हेतुः –कारणं निमित्तं वा, न –नहि, खलु – निश्चयेन , भवति – जायते। अत्र अर्थान्तरन्यासः अलङ्कारः वर्तते।

**भावार्थः –** तेजस्विनः स्वभावाद् एव प्रतापं प्रकटयन्ति, तत्र आयुः कारणं न भवति। यथा सिंहः शिशुरपि गजराजस्य गण्डस्थलं विदारयति।

### व्याकरणम् –

**मदमलिनकपोलभित्तिषु –** मदेन मलिनाः कपोलभित्तयः येषां तेषु मदमलिनकपोलभित्तिषु। सत्ववताम् – सत्व + मतुप् + आम्, गजेषु – गज + सुप् (स.+ ब.)

**येषां न विद्या न तपो न दानम्,**

**ज्ञानं न शीलं न गुणो न धर्मः**

**ते मर्त्यलोके भुवि भारभूताः,**

**मनुष्यरूपेण मृगाश्चरन्ति।। 4 ।।**

**पदच्छेदः –** येषाम् न विद्या न तपः न दानम् ज्ञानम् न शीलम् न गुणः न धर्मः ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।

**अन्वयः –** येषां विद्या न तपः न, दानं न, शीलं न, गुणो न, धर्मः न, ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।

**प्रसङ्गः**–अस्मिन् पद्ये कविः विद्यातपसादिहीनः जनः पशुवद् भवतीति प्रतिपादयति।

**व्याख्या –** येषाम् – येषां मनुष्याणां जनानां वा, न–नैव, विद्या – शास्त्रादिज्ञानम् न – नैव, तपः – तपश्चर्या, न – नैव, दानम् – दानवृत्तिः, समर्पणं वा, न – नैव, शीलम् – चरित्रं श्रेष्ठाचरणं वा, न – नैव, गुणः – दयादाक्षिण्यादिगुणविशेषः, न – नैव, धर्मः – आस्था प्रवृत्तिः, कर्तव्यनिष्ठा वा, ते – ते जनाः, मर्त्यलोके – मानवलोके, भुवि – धरायां पृथिव्यां वा, भारभूताः – भारस्वरूपाः, मनुष्यरूपेण – मानवरूपेण, मनुष्यशरीरेण वा, मृगाः – पशवः– जन्तवः वा, चरन्ति – सञ्चरन्ति विचरन्ति वेति। अत्र मनुष्येषु मृगत्वारोपाद् रूपकालङ्कारोऽस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भावार्थः** – अस्मिन् लोके येषां मनुष्याणां समीपे विद्या, तपः, ज्ञानं दानं शीलं गुणः धर्मश्चेति न विद्यन्ते ते अस्यां धरायां भारस्वरूपाः पशव इव मनुष्याकारेण इतस्ततः भ्रमन्ति।

**व्याकरणम् –**

मर्त्यानां लोकः मर्त्यलोकः तस्मिन् मर्त्यलोके (ष.त.) मनुष्यरूपेण – मनुष्याणां रूपं मनुष्यरूपं, तेन मनुष्यरूपेण (ष.त.), विद्या – विद् + यत् + टाप् + सु,

भारभूताः – भारभू + क्त + जस्।

**साहित्यसङ्गीतकलाविहीनः,**
**साक्षात् पशुः पुच्छविषाणहीनः।**
**तृणं न खादन्नपि जीवमानः,**
**तद्भागधेयं परमं पशूनाम्।। 5 ।।**

**पदच्छेदः –** साहित्यसंगीतकलाविहीनः (जनः) साक्षात् पशुः पुच्छविषाणहीनः, तृणम् न खादन् अपि जीवमानः तद् भागधेयं परमं पशूनाम्।।

**अन्वयः –** साहित्यसंगीतकलाविहीनः पुच्छविषाणहीनः साक्षात् पशुः, तृणं न खादन् अपि जीवमानः तत् पशूनां परमं भागधेयम्।

**प्रसङ्गः –** अत्र यः जनः साहित्य–संगीत–कला–विहीनः भवति तस्य स्थितिः पशुवत् भवतीति वर्णयति कविः।

**व्याख्या –** साहित्यसंगीतकलाविहीन – काव्यनृत्यगीतशिल्पादिरहितः शून्यो वा, (जनः मनुष्यः), पुच्छविषाणहीनः – लाङ्.गूलविषाणरहितः, साक्षात् – प्रत्यक्षमेव, स्फुटमेव वा, पशुः – जन्तुः मृगः वा, तृणम् – घासादिकम्, न–नैव, खादन्–भक्षयन् चरन् वा, अपि जीवमानः, – अपि जीवति, जीवनं धारयति वा, तत् पशूनाम्–वास्तविकगवादिजन्तूनाम्, परमम्–उत्तमं श्रेष्ठं वा, भागधेयम्–सौभाग्यम् (अस्ति)। अत्र रूपकालङ्.कारः वर्तते।

भावार्थः – साहित्यसंगीतादिविषयेभ्यः अनभिज्ञः मनुष्यः पशुसदृशः भवति। एतादृशः जनः तृणं न खादतीति पशूनां सौभाग्यमस्ति।

**व्याकरणम् –**

साहित्यसंगीतकलाविहीनः – साहित्यञ्च संगीतञ्च कलाः च साहित्यसंगीतकलाः, ताभिः विहीनः साहित्यसंगीतकलाविहीनः। पुच्छ–विषाणहीनः पुच्छं च विषाणे च पुच्छ–विषाणानि तेषां समाहारः पुच्छविषाणम् तेन हीनः – पशुः पुच्छविषाणहीनः, जीवमानः–जीव् + शानच् (आन) + सु।

**रत्नैर्महार्हैस्तुतुषुर्न देवाः,**
**न भेजिरे भीमविषेण भीतिम्।**
**सुधां विना न प्रययुर्विरामम्,**
**न निश्चितार्थाद्विरमन्ति धीराः।। 6 ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**पदच्छेदः** – रत्नैः महार्हैः तुतुषुः न देवाः न भेजिरे भीमविषेण भीतिम्, सुधां विना न प्रययुः विरामम् न निश्चितार्थाद् विरमन्ति धीराः।

**अन्वयः** – देवाः महार्हैः रत्नैः न तुतुषुः भीमविषेण (अपि) भीतिं न भेजिरे, सुधां विना विरामं न प्रययुः। (हि) धीराः निश्चितार्थात् न विरमन्ति।

**प्रसङ्गः** – धीराः पुरुषाः निश्चितार्थात् न विरमन्ति, ते तत् कार्यं पूर्णमेव कुर्वन्तीति।

**व्याख्या** – देवाः – सुराः अमरा वा, महार्हैः – बहुमूल्यैः, मूल्याधिक्यैः वा, रत्नैः–मणिविशेषैः, न – नैव, तुतुषुः – सन्तुष्टाः अभवन्, सन्तोषं प्राप्तवन्तः वा, भीमविषेण – भयङ्करहलाहलेन, भयङ्करकालकूटेन वा, भीतिम् – भयम्, त्रासं वा, न–नैव भेजिरे–लेभिरे, प्राप्तवन्तः वा, सुधाम् – अमृतम्, पीयूषं, विना–अन्तरेण, विरामम् – विरतिम्, कार्यावसानं वा, न–नैव, प्रययुः–गतवन्तः, धीराः–धैर्यशालिनः धीरपुरुषाः, निश्चितार्थात्–प्रधानोद्देश्यात् प्रतिज्ञातार्थात्, न – नैव, विरमन्ति–पराङ्मुखाः भवन्ति, विरताः जायन्ते। अत्र अर्थान्तरन्यासोऽलङ्कारः वर्तते।

**भावार्थः** – धैर्यशालिनः पुरुषाः लक्ष्यप्राप्तिपर्यन्तं सततं प्रयत्नशीलाः भवन्तीति।

**व्याकरणम्** – महार्हैः महान् अर्हः यस्य सः महार्हः तैः महार्हैः (ब.व्री.) भीमविषम्–भीमं च तत् विषमिति भीमविषम्, तेन (कर्मधा.) निश्चितार्थात् – निश्चितः चासौ अर्थः निश्चितार्थः, तस्मात् निश्चितार्थात् (कर्मधा.)

> **भवन्ति नम्रास्तरवः फलोद्गमैः,**
> **नवाम्बुभिर्दूरविलम्बिनो घनाः।**
> **अनुद्धताः सत्पुरुषाः समृद्धिभिः,**
> **स्वभाव एवैष परोपकारिणाम्।। 7 ।।**

**पदच्छेदः** – भवन्ति नम्राः तरवः फलोद्गमैः नवाम्बुभिः दूरविलम्बिनः घनाः। अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभावः एव एषः परोपकारिणाम्।

**अन्वयः** – तरवः फलोद्गमैः नम्राः भवन्ति घनाः नवाम्बुभिः दूरविलम्बिनः (भवन्ति)। सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति), एषः परोपकारिणां स्वभाव एव।

**प्रसङ्गः**– अत्र परोपकारिणां जनानां स्वभावं कविः वर्णयति।

**व्याख्या** – तरवः– वृक्षाः, शाखिनः वा, फलोद्गमैः – फलप्रादुर्भावैः, फलागमैः वा, नम्राः – अवनताः भवन्ति – जायन्ते, घनाः – मेघाः जलदाः वा, नवाम्बुभिः – नूतनजलैः, अभिनतवारिभिः वा दूरविलम्बिनः दूरं भूमिपर्यन्तं लम्बमानाः (भवन्ति), सत्पुरुषाः सज्जनाः साधुजनाः वा, समृद्धिभिः – सम्पत्तिभिः ऐश्वर्यैः वा, अनुद्धताः –निरभिमानाः, (भवन्ति), एषः –अयमेव, उपरिनिर्दिष्टः परोपकारिणाम् –परसेवायां तत्पराणाम्, परहितरतानां सज्जनानां वा, स्वभावः– प्रकृतिः जन्मजातगुणो वा, एव– नूनमस्ति।

**भावार्थः** – वृक्षाः फलोद्गमैः, जलदाः नूतनवर्षाजलैः सत्पुरुषाः च विभवैः नम्राः भवन्ति। यतो हि एषः परोपकारिणां नैसर्गिकः गुणः वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम् –**

**फलोद्गमैः –** फलानाम् उद्गमः फलोद्गमः तैः फलोद्गमैः (ष.त.) नवं च तद् अम्बु इति नवाम्बु तैः नवाम्बुभिः (कर्मधा.), दूरविलम्बिनः – दूरं विलम्बितं शीलम् अस्य इति दूरविलम्बी, ते–दूर–विलम्बिनः (उपपदसमासः)।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः,**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः,**
**प्रारब्धमुत्तमजना न परित्यजन्ति।। 8 ।।**

**पदच्छेदः –** प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्न–विहताः विरमन्ति मध्याः, विघ्नैः मुहुः मुहुः अपि प्रतिहन्यमानाः प्रारब्धम् उत्तमजनाः न परित्यजन्ति।

**अन्वयः –** नीचैः विघ्नभयेन न प्रारभ्यते खलु, मध्याः प्रारभ्य, विघ्नविहताः विरमन्ति, उत्तमजनाः विघ्नैः मुहुः मुहुः प्रतिहन्यमानाः प्रारब्धं न परित्यजन्ति।

**प्रसङ्गः–** अस्मिन् पद्ये कर्तव्यनिर्वाहकाले जनानां प्रवृत्तिः पृथक्–पृथक् भवतीति कविः वर्णयति।

**व्याख्या –** नीचैः – अधमैः क्षुद्रैः वा, विघ्नभयेन – बाधाभयेन, न – नहि, प्रारभ्यते – समारभ्यते प्रवर्त्यते वा, खलु–निश्चयेन, मध्याः – मध्यम–स्वभावाः, प्रारभ्य–कार्यारम्भं कृत्वा, विघ्नविहताः – अन्तरायव्याकुलाः प्रत्यूहपीड़िताः वा, विरमन्ति – कार्यं परित्यजन्ति, उत्तमजनाः – श्रेष्ठपुरुषाः उदात्तगुणसम्पन्नाः जनाः वा, विघ्नैः – बाधादिभिः, मुहुः मुहुः अपि–पुनः पुनः अपि, प्रतिहन्यमानाः – विचाल्यमानाः, समाक्रान्ताः वा, प्रारब्धम् – आरब्धं कृतारम्भं वा न – नैव, परित्यजन्ति – मुञ्चन्ति त्यागं (कुर्वन्ति) वा।

**भावार्थः –** नीचाः (अधमाः) जनाः विघ्नभयेन कार्यारम्भमेव न कुर्वन्ति, मध्यमाः जनाः कार्यं प्रारभन्ते परन्तु विघ्नेषु समागतेषु तत्कार्यं परित्यजन्ति। उत्तमजनाः विघ्नैः वारं वारमभिभूयमानाः सन्तः प्रारब्धं कार्यं कदापि न त्यजन्ति।

**व्याकरणम् –** विघ्नभयेन–विघ्नाद् भयमिति विघ्नभयम्, तेन–विघ्नभयेन (पं.त.) विघ्नविहताः – विघ्नैः विहता इति विघ्नविहताः ते विघ्नविहताः (तृ.त.), प्रारभ्य – प्र + आङ् (आ) रभ् + ल्यप् (प) विघ्नः वि+हन् + क्त + सु। प्रतिहन्यमानाः – प्रति+हन्+यक् (य) शानच् (आन) + जस्।

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा,**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।। 9 ।।**

**पदच्छेदः –** निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्, अद्य एव मरणम् अस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।

**अन्वयः –** नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु वा यथेष्टं गच्छतु। अद्यैव मरणमस्तु वा युगान्तरे अस्तु, तथापि धीराः न्याय्यात् पथः पदम् अपि न प्रविचलन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – अस्मिन् पद्ये कविः धीरपुरुषाणां दृढनिष्ठां वर्णयन् कथयतीति यत् धैर्यशालिनः कदापि नीतिमार्गं न त्यजन्ति।

**व्याख्या** – नीतिनिपुणाः – नीतिशास्त्रविशारदाः, निन्दन्तु–निन्दां कुर्वन्तु, यदि वा–अथवा, स्तुवन्तु–स्तुतिं कुर्वन्तु प्रशंसन्तु वा, लक्ष्मीः – सम्पत्तिः, ऐश्वर्यं वा, समाविशतु–आगच्छतु, समीपम् आयातु वा, गच्छतु–अपसरतु, व्रजतु वा, वा – अथवा, यथेष्टम् – इच्छानुसारम्, यथाऽभीष्टम्, अद्य एव – अधुना एव साम्प्रतमेव, मरणम् – निधनम्, मृत्युः युगान्तरे–अन्यस्मिन् युगे, कालान्तरे वा, अस्तु – भवतु वा – अथवा, न्याय्यात् – शास्त्रोचितमार्गात्, न्यायोचितात्, पथः – मार्गात् पद्धतेः वा, प्रविचलन्ति–विचलिताः भवन्ति, इतस्ततः भवन्ति वा, पदम् – एकपदमपि, न – नैव धीराः – धैर्यशालिनः, धैर्यवन्तः।

**भावार्थः** – मनस्विनः पुरुषाः अन्येषां कृतां निन्दां स्तुतिं वा न गणयन्ति, सम्पत्तिः आयातु गच्छतु वा इत्यपि ते न अभिलषन्ति, मृत्युमपि उपेक्ष्यन्ते, परन्तु न्यायमार्गं कदापि न त्यजन्ति।

**व्याकरणम्** – नीतिनिपुणाः – नीतौ निपुणाः इति नीतिनिपुणाः (स.त.) समाविशतु–सम्+ आङ् (आ) + विश् + लोट् (तिप्)। यथेष्टम् – यथा + इष्टम् (गुण–सन्धिः)

**ज़ाड्यं धियो हरति सिञ्चति वाचि सत्यं,**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं,**
**सत्सङ्.गतिः कथय किं न करोति पुंसाम्।। 10 ।।**

**पदच्छेदः** – जाड्यं धियः हरति सिञ्चति वाचि सत्यम्, मानोन्नतिम् दिशति, पापम् अपाकरोति, चेतः प्रसादयति दिक्षु तनोति कीर्तिम् सत्सङ्.गतिः कथय किम् न करोति पुंसाम्।

**अन्वयः** – (सत्सङ्गतिः) धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति, कथय सत्सङ्गतिः पुंसाम् किं न करोति।

**प्रसङ्गः** – अस्मिन् पद्ये कविः सत्सङ्.गतेः महिमानं साधु वर्णयति।

**व्याख्या** – धियः–बुद्धेः, मतेः वा, जाड्यम् – जडत्वं, जडतां वा, हरति–दूरीकरोति निवारयति वा, वाचि–वचसि, वाण्यां वा, सत्यम्–तथ्यं वस्तुतत्त्वं वा, सिञ्चति–पल्लवयति प्रतिपादयति वा, मानोन्नतिम् – सम्मानवृद्धिं सम्मानोत्कर्षं वा, दिशति–सम्पादयति निर्दिशति वा, पापम्–कल्मषं पातकं वा, अपाकरोति–दूरीकरोति विनाशयति वा, चेतः – चित्तम् अन्तःकरणं वा, प्रसादयति–आनन्दयति, हर्षयति वा, दिक्षु–काष्ठासु, दिशासु वा, कीर्तिम् – यशः, तनोति – विस्तारयति, प्रसारयति, कथय – ब्रूहि, वद वा, सत्सङ्गतिः सज्जनसङ्गमः, साधुसङ्गः, पुंसाम्–नराणां जनानां वा, किं न करोति–किं किं कार्यं न सम्पादयति साधयति वा। अत्र समुच्चयालङ्कारः वर्तते।

**भावार्थः** – मनुष्याणां सज्जनैः सह संसर्गः सर्वविधं कल्याणं सम्पादयति, तद्यथा सत्सङ्.तिः बुद्धेः मान्द्यं नाशयति, वाण्यां सत्यतां स्थापयति, सम्मानं वर्धयति, चेतः आह्लादयति, कीर्तिं च विस्तारयति।

**व्याकरणम्** : मानोन्नतिम्–मानस्य उन्नतिः मानोन्नतिः, ताम्–मानोन्नतिम् (ष.त.), सत्सङ्.गतिः – सतां सङ्गतिः – सत्सङ्गतिः (ष.त.)। प्रसादयति – प्र + सद् + णिच् + लट् (तिप्)। सत्सङ्.गति : सत् + सम् + गम् + क्तिन् (ति) + सु।

**पापान्निवारयति योजयते हिताय,**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।। 11।।**

**पदच्छेदः –** पापात् निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति, आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणम् इदं प्रवदन्ति सन्तः।

**अन्वयः –** पापात् निवारयति हिताय योजयते, गुह्यं निगूहति गुणान् प्रकटीकरोति, आपद्गतं च न जहाति, काले च ददाति, सन्तः इदं सन्मित्रलक्षणं प्रवदन्ति।

**प्रसङ्गः** – अस्मिन् पद्ये कविः सन्मित्रस्य यथार्थं लक्षणं प्रतिपादयति।

**व्याख्या –** पापात् – पापकर्मणः, पातकात् वा, निवारयति–अपसारयति दूरीकरोति वा, हिताय–श्रेयसे कल्याणाय वा, योजयते–प्रवर्तयति प्रेरयति वा, गुह्यम् – गोपनीयं गोप्यं वा, निगूहति–गोपायति, गोपनं करोति वा, गुणान् – दयादाक्षिण्यादिगुणान् उत्कर्षधर्मान् वा, प्रकटीकरोति – प्रकटयति सम्मुखम् आनयति वा, आपद्गतम् – सङ्कटापन्नं विपत्तिग्रस्तः, च – तथा, न – नैव, जहाति–परित्यजति उपेक्षते वा, काले–समये अवसरे वा, च तथा ददाति – प्रयच्छति, वितरति वा, इदम् – एतत् सन्तः सज्जनाः सत्पुरुषाः वा, सन्मित्रस्य – महनीयमित्रस्य, श्रेष्ठसुहृदः लक्षणाम्–चिह्नं परिज्ञानं वा, प्रवदन्ति कथयन्ति दिशन्ति वा।

**भावार्थः** – सज्जनाः सन्मित्रं तदेव कथयन्ति यत् स्वमित्रं दुष्कर्मणः निवारयति सत्कर्माण्यनुष्ठातुं प्रवर्तयते, तस्य रहस्यं कुत्रचित् न वदति, गुणान् च प्रख्यापयति, यथावसरं साहाय्यं च करोति इति।

## व्याकरणम् –

सत् च तत् मित्रम् इति सन्मित्रम्, तस्य लक्षणम्–सन्मित्र–लक्षणम् (कर्मधा), आपद्गतम् – आपदं गतः इति आपद्गतः, तम् – आपद्गतम् (द्वि.त.पु.)। निवारयति–नि+वृ+णिच्+लट् (तिप्)। योजयते – युज् + णिच् + लट् (त)। गुह्यम्– गुह् + क्यप् (य) + सु (अम्)।

**मनसि वचसि काये पुण्यपीयूषपूर्णाः,**

**त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**

**परगुणपरमाणून् पर्वतीकृत्य नित्यम्,**

**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।। 12।।**

**पदच्छेदः –** मनसि वचसि काये पुण्यपीयूषपूर्णाः, त्रिभुवनम् उपकार–श्रेणिभिः प्रीणयन्तः, परगुणपरमाणून् पर्वतीकृत्य नित्यम् निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।

**अन्वयः** – मनसि वचसि काये च पुण्यपीयूषपूर्णाः उपकारश्रेणिभिः त्रिभुवनं प्रीणयन्तः परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्तः कियन्तः सन्ति ?

**प्रसङ्गः** – अस्मिन् पद्ये कविः सज्जनानां वैशिष्ट्यं विरलतां च सूचयति।

**व्याख्याः –** मनसि – हृदये चेतसि वा, वचसि–वचने वाण्यां वा, काये–शरीरे देहे वा, पुण्यपीयूषपूर्णाः – सत्कृत्यसुधाप्रपूरिताः, उपकारश्रेणिभिः – अनुग्रहसमूहैः, त्रिभुवनम् – लोकत्रयम्, जगत्त्रयीं वा, प्रीणयन्तः – प्रसादयन्तः, मोदयन्तः वा, परगुणपरमाणून् – अन्येषां सूक्ष्मगुणान्, अपरेषां, स्वल्पमात्रान् गुणान्, पर्वतीकृत्य – शैलान् इव वृद्धाकारान् विज्ञाय, नित्यम्– सततं, सर्वदा, निजहृदि–निजहृदये स्वान्तःकरणे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वा विकसन्तः–विकासं प्राप्नुवन्तः, सन्तः–सज्जनाः सत्पुरुषाः, कियन्तः – कियत्संख्याकाः कति वा, सन्ति – विद्यन्ते वर्तन्ते वा। अत्र अनुप्रासः अलंकारः वर्तते।

**भावार्थः –** मनसा, वाचा, कर्मणा धर्ममाचरन्तः उपकारेण लोकत्रयं तर्पयन्तः अन्येषां क्षुद्रान् अपि गुणान् महत्तरान् विधाय वर्णयन्तः सर्वदा स्वचेतसि हर्षमनुभवन्तः सज्जनाः दुर्लभाः एव सन्ति।

**व्याकरणम् –**

**पुण्यपीयूषपूर्णाः –** पुण्यम् एव पीयूषम् इति पुण्यपीयूषम्, तेन पूर्णः इति पुण्यपीयूषपूर्णाः। उपकारश्रेणिभिः – उपकाराणां श्रेणिः इति उपकारश्रेणिः, ताभिः उपकारश्रेणिभिः (ष.त.)। परगुणपरमाणून् परेषां गुणाः इति परगुणाः ते एव परमाणवः इति परगुणपरमाणवः, तान् परगुणपरमाणून् (ष.त.)। प्रीणयन्तः – प्री + णिच ् + शतृ (अत्) + जस्। विकसन्तः – वि + कस् + शतृ + जस्। कियन्तः – कियत् + जस्।

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,**
**न स्नानं न विलेपनं न कुसुमं नालङ्.कृता मूर्धजाः।**
**वाण्येका समलङ्.करोति पुरुषं या संस्कृता धार्यते,**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।। 13 ।।**

**पदच्छेदः –** केयूराणि न भूषयन्ति पुरुषम् हाराः न चन्द्रोज्ज्वलाः, न स्नानं न विलेपनम् न कुसुमम् न अलङ्.कृताः मूर्धजाः, वाणी एका सम् अलङ्करोति पुरुषम् या संस्कृता धार्यते, क्षीयन्ते खलु भूषणानि सततम् वाग्भूषणम् भूषणम्।

**अन्वयः –** केयूराणि पुरुषं न भूषयन्ति, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्.कृताः मूर्धजाः न (पुरुषं भूषयन्ति), एका वाणी पुरुषं समलङ्.करोति, या संस्कृता धार्यते भूषणानि खलु क्षीयन्ते, वाग्भूषणं सततं भूषणं (भवति)।

**प्रसङ्गः –** प्रस्तुतश्लोके कविः मनुष्यस्य वास्तविकम् आभूषणं किम् अस्तीति प्रतिपादयति।

**व्याख्या –** केयूराणि–भुजभूषणानि, बाहुबन्धाभूषणानि वा, पुरुषम् – नरं मनुष्यं वा, न–नैव, भूषयन्ति – अलङ्.कुर्वन्ति शोभयन्ते वा, चन्द्रोज्ज्वलाः, चन्द्रः इव देदीप्यमानाः विधुः इव प्रकाशमानाः वा, हाराः – माल्यानि, न – नैव, स्नानम् – जलावगाहनं जलादिभिः देहशुद्धिः वा, न–नैव, विलेपनम् – लेपविधानं, सुगन्धितलेपविशेषो वा, न–नैव, कुसुमम्–पुष्पं सुमनं वा, अलङ्.कृताः – सुशोभिताः, सुसज्जिताः वा, मूर्धजाः–केशाः, शिरोरुहाः वा, न–नैव (पुरुषं भूषयन्ति)। एका–केवला एकसंख्याका वा वाणी–वाक्, गीः वा, पुरुषम् – नरं मनुष्यं वा, समलङ्.करोति – विभूषयति सम्यग् अलङ्करोति वा, या–वर्ण्यमाना, सस्कृता–संस्कारवती संस्कारयुक्ता वा, धार्यते–स्वीक्रियते, अङ्गीक्रियते वा, भूषणानि – आभूषणानि, मण्डनानि वा, खलु – निश्चयेन, क्षीयन्ते–नश्यन्ति क्षयं प्राप्नुवन्ति वा, वाग्भूषणम् – वाणीरूपः, अलङ्कारः सततम् – निरन्तरम् अविरतं वा, भूषणम् – विभूषणं मण्डनं वा (भवति)। अत्र उपमालंकारः वर्तते।

**भावार्थः –** अङ्गदाद्याभूषणं, चन्दनं केशसज्जा च नरं तथा न भूषयन्ति यथा व्याकरणादिपरिष्कृता वाणी तु समलङ्.करोति। अन्यानि च आभूषणानि कालक्रमेण नश्यन्ति, वस्तुतः वाग्भूषणं सततम् आभूषणम् अस्ति।

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विद्या बन्धुजनो विदेशगमने विद्या परा देवता,**

**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।। 14 ।।**

**पदच्छेदः –** विद्या नाम नरस्य रूपम् अधिकम् प्रच्छन्नगुप्तम् धनम्, विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः, विद्या बन्धुजनः विदेशगमने विद्या परा देवता, विद्या राजसु पूज्यते न तु धनम् विद्याविहीनः पशुः।

**अन्वयः –** विद्या नाम नरस्य अधिकं रूपं (विद्यते) प्रच्छन्नगुप्तं धनं (विद्यते) विद्या भोगकरी यशःसुखकरी (च) (विद्यते) विद्या गुरूणां गुरुः विद्या विदेशगमने बन्धुजनः (भवति) विद्या परा देवता वर्तते विद्या राजसु पूज्यते न तु धनम् विद्याविहीनः पशुः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः विद्यायाः वैशिष्ट्यं प्रतिपादपति।

**व्याख्या –** विद्या–ज्ञानविशेषः, शास्त्राधिगमः वा, नाम–नामधेयम्, इत्याख्यं वा, नरस्य–पुरुषस्य मानवस्य वा, अधिकम् – अतिरिक्तम् उन्नतं वा, रूपम् – स्वरूपम् सौन्दर्यं वा (विद्यते–वर्तते), प्रच्छन्नगुप्तम् – निगूढरक्षितं निर्भयस्थानस्थितं वा, धनम् – वित्तम्, अर्थः वा (विद्यते) विद्या–ज्ञानविशेषः भोगकरी – सुखोपभोगः समृद्धिसुखानुभूतिः वा, यशः – कीर्तिः, प्रतिष्ठा वा, सुखकरी – आनन्दकरी (विद्यते), विद्या–ज्ञान विशेषः, गुरूणां गुरुः – गुरुजनानां गुरुः (अग्रणी) (विद्यते)। विद्या–विशिष्टज्ञानम् विदेशगमने–परदेशप्रस्थाने, अन्यद्देशव्रजने, बन्धुजनः–आत्मीयजनः, स्वकीयजनः वा, (भवति), विद्या–विशिष्टज्ञानम्, राजसु–नृपेषु, भूपतिषु वा, पूज्यते–अर्च्यते, आद्रियते वा, न तु धनम्–न तु ऐश्वर्यं वैभवं वा, विद्याविहीनः, विद्याशून्यः विद्यारहितो वा पशुः – जन्तुः पशुप्रायः (भवति)। अत्र अनुप्रासः अलड्.कारः वर्तते।

**भावार्थः –** विद्या मानवस्य श्रेष्ठं रूपं, गोपनीयं धनं, सुखसाधनप्रदायिका, यशः – आनन्दवर्धिका, विदेशगमने बन्धुरिव हितकारिका राजसम्मानदायिका च वर्तते। एतादृश्या विद्यया शून्यः मानवः साक्षात् पशुरिव भवतीति।

### व्याकरणम् –

**प्रच्छन्नगुप्तम् –** प्रच्छन्नं च गुप्तं च इति प्रच्छन्नगुप्तम् (कर्मधा0)। यशःसुखकरी–यशः सुखं चेति यशःसुखे ते करोतीति यशःसुखकरी (द्वन्द्वः)। विदेशगमने – विदेशस्य गमनमिति–विदेशगमनम् तस्मिन्–विदेशगमने (ष.त..)। विद्या–विद्+क्यप् (य) + टाप् + सु, देवता – देव + तल् (त) + टाप् + सु।

**रे रे चातक ! सावधानमनसा मित्र! क्षणं श्रूयताम्,**

**अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**

**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**

**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।। 15 ।।**

**पदच्छेदः** – रे रे चातक ! सावधानमनसा मित्र ! क्षणम् श्रूयताम्, अम्भोदाः बहवः हि सन्ति गगने सर्वे अपि न एतादृशाः। केचिद् वृष्टिभिः आर्द्रयन्ति वसुधाम् गर्जन्ति केचिद् वृथा, यम् यम् पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः।।

**अन्वयः –** रे रे मित्र ! चातक ! सावधानमनसा क्षणं श्रूयताम्, गगने हि बहवः अम्भोदाः सन्ति, सर्वे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अपि एतादृशाः न (सन्ति), केचिद् (अम्भोदाः) वृष्टिभिः वसुधाम् आर्द्रयन्ति, केचित् (च) वृथा गर्जन्ति, (अतः) यं यं पश्यसि तस्य तस्य पुरः दीनं वचः मा ब्रूहि।

**प्रसङ्गः –** धनाभिलाषया याचकेन सर्वेषां पुरतः न याचनीयम् इति चातकस्य व्याजेन कविरत्र निर्दिशति।

**व्याख्याः –** रे रे – अरे, भोः। मित्र ! – सखे, बन्धो ! वा, चातक ! सारङ्ग ! सावधानमनसा – एकाग्रचित्तेन, अवहितेन चेतसा वा, क्षणम् – क्षणमात्रं, पलमात्रं वा, श्रूयताम् – निशम्यताम्, अवधार्यतां वा, गगने – नभसि, आकाशे वा, बहवः – अनेके, भूयांशः वा, अम्भोदाः, जलदाः, मेघाः वा, सन्ति – वर्तन्ते, सर्वेऽपि–सकलाः अपि, अखिला अपि वा, एतादृशाः – एवंविधाः, ईदृशाः वा, न – नैव, केचित् – केचन, कतिपये वा, वृष्टिभिः – वर्षाभिः, वृष्टिजलैः वा, वसुधाम् – पृथिवीं, भूमिं वा, आर्द्रयन्ति – क्लेदयन्ति, आर्द्रां कुर्वन्ति वा, केचित्, केचन, अपरे वा, वृथा–व्यर्थमेव, निरर्थकमेव, वृथैव वा, गर्जन्ति–नदन्ति, गर्जनां कुर्वन्ति वा, यं यम् – कमपि मेघम्, पश्यसि–वीक्षसे, अवलोकयसि वा, तस्य तस्य पुरतः – तस्य अभिमुखम्, तत् समक्षे वा, दीनं वचः – दैन्यपूर्णवचनम्, याचनास्पदं वचनं वा, मा ब्रूहि–न वद, न कथय इति। अत्र अप्रस्तुतप्रशंसा अलङ्कारः वर्तते।

**भावार्थः –** आकाशे बहवः जलदाः दृश्यन्ते, परं तेषां विषये केचन एवं कथयन्ति यत् भो चातक ! आकाशे ये केचन मेघाः सन्ति सर्वे न प्रार्थनीयाः अपितु जलदो मेघ एव प्रार्थनीयः। इत्थमेव अर्थेच्छुकैः जनैः सर्वे नराः न प्रार्थनीयाः अपितु सम्यक् परीक्ष्य दातुः पुरतः एव याचकैः स्वाशयः प्रकटनीय इति।

### व्याकरणम् –

सावधानमनसा – सावधानं च तद्मनः इति सावधानमनः, तेन सावधानमनसा (कर्मधा0। अम्भोदाः – अम्भस् + दा + क (अ) + जस् (अस्)। वसुधाम् – वसु + धा + क + (अ) + टाप् (आ) + अम्। पुरतः – पुर + तसिल् (तस्) आर्द्रयन्ति – आर्द्र + णिच् + लट् + झि।

## अभ्यास–प्रश्नाः

### 1. बहुविकल्पात्मकाः प्रश्नाः –

**निर्देशः – समुचितविकल्पस्य क्रमाक्षरं कोष्ठके निर्दिशत इति।**

1. वित्तस्य तृतीया गतिः इयं खलु –

   (क) दानम् (ख) भोगः

   (ग) नाशः (घ) वृद्धिः

2. गजेषु कीदृशः सिंहः निपतति –

   (क) वृद्धावस्थः (ख) युवावस्थः

   (ग) मृतः (घ) शिशुरपि

3. धीराः कस्माद् न विरमन्ति –

   (क) भीमविषात् (ख) निश्चितार्थात्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) अमृतात् (घ) अनिश्चितार्थात्

4. नवाम्बुभिः घनाः भवन्ति –
(क) दूरविलम्बिनः (ख) पतिताः
(ग) एकत्रिताः (घ) भारभूताः

5. धीराः पदमपि न प्रविचलन्ति –
(क) कण्टकयुक्तात् पथः (ख) उच्चावचात् पथः
(ग) न्याय्यात्पथः (घ) कर्दमात् पथः

6. मनसि वचसि काये सन्तः भवन्ति –
(क) चञ्चलतापूर्णाः (ख) पुण्यपीयूषपूर्णाः
(ग) ईर्ष्याकलुषिताः (घ) लोभाकुलाः

7. विद्या केषां गुरुः अस्ति –
(क) मूर्खाणाम् (ख) शत्रूणाम्
(ग) विदुषाम् (घ) गुरूणाम्

8. सततं किं भूषणम् अस्ति –
(क) रत्नाभूषणम् (ख) वस्त्राभूषणम्
(ग) वाग्भूषणम् (घ) रजताभूषणम्

## अतिलघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य एकवाक्यात्मकम् उत्तरं प्रदेयम् –**

1. कं नरं ब्रह्माऽपि रञ्जयितुं न शक्नोति ?
2. वित्तस्य काः तिस्रः गतयः सन्ति ?
3. साहित्यसंगीतकलाविहीनः पुरुषः केन नाम्ना उच्यते ?
4. धीराः कस्माद् न विरमन्ति ?
5. फलोद्गमैः के नम्राः भवन्ति ?
6. समृद्धिभिः सत्पुरुषाः कीदृशाः भवन्ति ?
7. प्रारब्धं कार्यं के न परित्यजन्ति ?
8. विघ्नविहताः के विरमन्ति ?
9. दिक्षु कीर्तिं का तनोति ?
10. विद्या बन्धुजनः कदा भवति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## लघूत्तरात्मकप्रश्ना

### निर्देशः – प्रतिप्रश्नं पंक्तिचतुष्टयात्मकम् उत्तरं लेखनीयम् –

1. ज्ञानलवदुर्विदग्धः कः उच्यते ?
2. **'न वयस्तेजसां हेतुः'** इति पङ्.क्तेः कः अभिप्रायः ?
3. के जनाः मनुष्यरूपेण मृगाश्चरन्ति ?
4. पशूनां परमं भागधेयं किम् उच्यते ?
5. देवेषु महार्हरत्नानां भीमविषस्य च कः कः प्रभावः अजायत ?
6. कीदृशः स्वभावः भवति परोपकारिणाम् ?
7. अधम–मध्यम–उत्तमजनानां कार्यप्रवृत्तिः कीदृशी भवति ?
8. सत्सङ्गतेः कानिचन चत्वारि फलानि लिखत।
9. कानि–कानि भूषणानि सततं क्षीयन्ते ?
10. **'यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः'** इति पङ्.क्तेराशयः सम्यक् प्रदर्शनीयः।

## निबन्धात्मकाः प्रश्नाः

### निर्देशः – प्रत्येकस्य प्रश्नस्य उत्तरं दशपंक्तिषु लेखनीयम् –

1. विद्यायाः विभिन्नानि रूपाणि कानि सन्ति ?
2. **'रे रे चातक सावधानमनसा'** इति पङ्क्तेरभिप्रायं प्रदर्शयत।
3. **'केयूराणि न भूषयन्ति पुरुषम्'** इति श्लोकस्य आशयं प्रदर्शयत।
4. **'न्याय्यात् पथः प्रविचलन्ति पदं न धीराः'** इति पद्यस्य भावं स्पष्टयत।
5. **'न वयस्तेजसां हेतुः'** इत्यस्य आशयं प्रतिपादयत।

## व्याकरणपल्लवनम्

### सन्धि –परिज्ञानम्

नाशस्तिस्रः – नाशः + तिस्रः – नाशस्तिस्रः – सत्वम्, विसर्गसन्धिः।

शिशुरपि – शिशुः + अपि – शिशुरपि – सत्वम्, विसर्गसन्धिः।

गतिर्भवति – गतिः + भवति – गतिर्भवति – सत्वम् – विसर्गसन्धिः।

मृगाश्चरन्ति – मृगाः + चरन्ति – मृगाश्चरन्ति – सत्वं, श्चुत्वम्, विसर्गसन्धिः।

खादन्नपि – खादन् + अपि – खादन्नपि – नकारद्वित्वम्, हल्सन्धिः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

निश्चितार्थाद्विरमन्ति–निश्चितार्थात् +विरमन्ति–निश्चितार्थाद्विरमन्ति–जश्त्वम् हल्सन्धिः

फलोद्गमैः – फल + उद्गमैः – फलोद्गमैः गुणः, स्वरसन्धिः।

एवैषः – एव + एषः – एवैषः – वृद्धिः, स्वरसन्धिः।

पुनरपि – पुनः + अपि – पुनरपि – रुत्वम्, विसर्गसन्धिः।

अद्यैव – अद्य + एव – अद्यैव – वृद्धिः, स्वरसन्धिः।

सन्मित्रम् – सत् + मित्रम् – सन्मित्रम् – अनुनासिकपरसवर्णः, हल्सन्धिः।

वाण्येका – वाणी + एका – वाण्येका – यण्, स्वरसन्धिः।

क्षीयन्तेऽखिलभूषणानि–क्षीयन्ते+अखिलभूषणानि–क्षीयन्तेऽखिलभूषणानि पूर्वरूपम्,स्वरसन्धिः।

चन्द्रोज्ज्वलाः – चन्द्र + उज्ज्वलाः – गुणः, स्वरसन्धिः।

## समास–परिचयः –

ज्ञानलवदुर्विदग्धम् – ज्ञानस्य लवम् इति ज्ञानलवम्, (ष.त.), ज्ञानलवेन दुर्विदग्धः इति ज्ञानलवदुर्विदग्ध ाम् (तृ.त.)।

मदमलिनकपोलभित्तिषु – मदेन मलिना कपोलभित्तिः यस्य सः, इति मदमलिनकपोलभित्तिः, तेषु इति मदमलिनकपोलभित्तिषु (तत्पुरुषगर्भः बहुव्रीहिः)।

साहित्यसङ्गीतकलाविहीनः – साहित्यं च सड्.गीतं च कलाश्चेति साहित्यसङ्गीतकलाः इति (इतरेतरद्वन्द्वः), साहित्यसङ्गीतकलाभिः विहीनः इति साहित्यसङ्गीतकलाविहीनः इति (द्वन्द्वगर्भ–तृतीया–तत्पुरुषः)।

फलोद्गमैः– फलानाम् उद्गमः इति फलोद्गमः तैः इति फलोद्गमैः (तृ.त.)

नवाम्बुभिः – नवं च तद् अम्बु इति नवाम्बु, तैः इति नवाम्बुभिः (कर्मधारयः)

अनुद्धताः – न उद्धताः इति अनुद्धताः (नञ्–तत्पुरुषः)।

विघ्नभयेन – विघ्नाद् भयम् इति विघ्नभयम्, तेन विघ्नभयेन इति (पं.तत्पु.)।

विघ्नविहताः – विघ्नैः विहताः इति विघ्नविहताः (तृ. तत्पु.)।

उत्तमजनाः – उत्तमाः च ते जनाः इति उत्तमजनाः (कर्मधारयः)।

नीतिनिपुणाः – नीतौ नीतिषु वा निपुणाः इति नीतिनिपुणाः (स. तत्पु.)।

यथेष्टम – इष्टम् अनतिक्रम्य इति यथेष्टम् (अव्ययीभावः)।

आपद्गतम् – आपदं गतः इति आपद्गतः तम् आपद्गतम् (द्वि. तत्पु.)।

सन्मित्रम् – सत् च मित्रं च इति सन्मित्रम् (कर्मधारयः)।

पुण्यपीयूषपूर्णाः – पुण्यपीयूषेण पूर्णाः इति पुण्यपीयूषपूर्णाः (तृ.तत्पु.)।

## प्रकृतिप्रत्ययानां परिचयः

आराध्यः – आड्. + राध् + ण्यत् (य) पुं. प्रथमैकवचनम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सुखतरम् – सुख + तरप् (तर) + सु प्र.वि.ए.व. क्रियाविशेषणम्।

गतिः – गम् + क्तिन् (ति) + सु – प्र0वि.ए.व.।

खादन् – खाद + शतृ (अत्) + सु – पुं.प्र.वि.ए.व.।

जीवमानः – जीव् + शानच् (आन) + सु – पुं.प्र.वि.ए.व.।

प्रमार्ष्टुम् – प्र + मृज् + तुमुन् (तुम्) अव्यय–प्रत्ययः।

दूरविलम्बिनः – दूर + वि + लम्ब् + णिनि (इन्) + जस् – प्र.वि.ब.व.।

प्रविहन्यमानः – प्र + वि + हन् + यक् + शानच् + सु – प्र.वि.ए.व.।

प्रारब्धम् – प्र + आङ् + रभ् + क्त + अम् – नपुं. द्वि.वि.ए.व.।

न्याय्यात् – न्याय + यत् + ङसि + – पुं.प.वि.ए.व.।

गुह्यम् – गुह + क्यप् (य) + अम् – नपुं.द्वि.वि.ए.व.।

पर्वतीकृत्य – पर्वत + च्वि + कृ + (तुक्) ल्यप् (य) – अव्ययप्रत्ययः।

प्रच्छन्नम् – प्र + छद् + क्त + सु – नपुं.प्र.वि.ए.व.।

## धातुसङ्ग्रहः

प्रतिश्लोकं क्रियापदं चित्वा धातूनां सङ्.ग्रहः करणीयः। तेषां लकारादिप्रयोगविषये च ज्ञानं करणीयम्। ततः तेषां क्रियापदानां यथाशक्ति वाक्ये प्रयोगः कर्तव्यः। यथा–प्रथमे श्लोके रञ्जयति–बालकः मोदकं दृष्ट्वा रञ्जयति। भुङ्क्ते–रामः स्वकीयं धनं स्वयं न भुङ्क्ते। भवति – प्रातःकालीनः भास्करः ताम्रवर्णः भवति। निपतति–श्वानः विडालोपरि निपतति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पञ्चमः पाठः
# पर्यावरणम्

**पं. प्रभुदत्तशर्मा 'आत्रेयः'**

## परिचयः

पर्यावरणविषयम् अधिकृत्य विरचितात् पर्यावरणशतकात् कानिचित् पद्यानि सञ्चित्य अयं पाठः 'पर्यावरणम्' इति सङ्कलितोऽस्ति। अत्र पर्यावरणस्वरूपं निरूप्य तत्प्रदूषणस्य कारणानि प्रदर्शितानि सन्ति। सङ्क्षेपतः प्रदूषणोपशमनस्य उपाया अपि निरूपिताः।

एकादश–पद्यात्मकपाठस्य प्रारम्भे श्लोकद्वये पर्यावरणस्वरूपं स्पष्टीकृतम्। तृतीये चतुर्थे च पद्ये प्रकृतेः स्वरूपम् उपलभ्यते। अग्रे एतत् प्रतिपादितमस्ति यत् इयं प्रकृतिः सेवनयोग्या सुखदायिनी तु विद्यते किन्तु अस्याः दोहनम् अतिशयेन भवतीति चिन्तनीयम्। अस्याः अतिशयदोहनात् एव प्राकृतिकप्रकोपाः जायन्ते। एतत् सर्वं विविच्य अन्ते सर्वेभ्यः मङ्गलकामना कृता अस्ति।

अस्य रचयिता पं. प्रभुदत्तशर्म–आत्रेय–महोदयः वर्तते। झुंझुँनूमण्डलस्य खेतडीनगरसमीपे प्रपूर्णग्रामवास्तव्यानां षट्शास्त्रकेसरिणां परमकारणाद्वैतसिद्धान्त– प्रतिष्ठापकाचार्यवर्याणां श्रीबदरिप्रसादशास्त्रिणां पुत्रत्वेन लब्धजन्मा प्रभुदत्तमहाभागः व्याकरण–साहित्य–दर्शन विषयेषु आचार्योऽस्ति। विद्वत्कवेरस्य संस्कृतभाषायां विरचिता इमाः कृतयः सन्ति –

(1) श्रीरामेश्वरचरितम् – पद्यमयं खण्डकाव्यम् (2) सुस्तबकः – पद्यसङ्ग्रहः (मुक्तकानाम् इति) (3) भट्टारिका–गद्यकाव्यम्।

हिन्दीभाषायाम् अपि सजग प्रहरी, पत्रवेदना, विरह–सरित्, माता (उपन्यासः) इत्येताः रचनाः वर्तन्ते। सम्पादन– समीक्षात्मकादिकर्मणि अपि पण्डितप्रवरस्य प्रभुदत्तमहोदयस्य पर्याप्तकर्तृत्वम् अवलोक्यते।

अयं महानुभावो जैनविश्वभारतीलाडनूँ–संस्थाने प्राध्यापकपदम् अलङ्कृत्य साम्प्रतं जयपुरस्थे श्रीदिगम्बरजैनसंस्कृतमहाविद्यालये प्राध्यापकपदात् सेवानिवृत्तः सततं संस्कृतसाहित्यश्रीसंवर्धने संलग्नो वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पर्यावरणम्

**आद्या सृष्टिरियं स्रष्टुश्चेतनाऽचेतनात्मिका।**
**पुरुषस्योपकाराय पर्यावरणताङ्गता।। 1 ।।**

**पदच्छेदः :–** आद्या सृष्टिः इयम् स्रष्टुः चेतन + अचेतन + आत्मिका। पुरुषस्य उपकाराय पर्यावरणताम् गता।

**अन्वयः :–** स्रष्टुः चेतनाचेतनात्मिका इयम् आद्या सृष्टिः (एव) पुरुषस्य उपकाराय पर्यावरणतां गता।

**व्याख्या –** स्रष्टुः – विधातुः, ब्रह्मणः, सृष्टिकर्तुः इत्यर्थः। चेतनाचेतनात्मिका, चराचरात्मिका, चेतनरूपा अचेतनरूपा च। इयम् – एषा, दृश्यमाना वर्तमाना वा। आद्या – प्रथमा। सृष्टिः – सर्जनम्, रचना, प्रकृतिः इत्यर्थः। एव। पुरुषस्य – मानवस्य, उपलक्षणमात्रमिदं सर्वेषामपि प्राणिनाम् इत्यर्थः ग्राह्यः। उपकाराय – कल्याणाय। पर्यावरणताम् – पर्यावरणस्वरूपम्, गता – प्राप्ता।

**भावार्थः –** ब्रह्मणः चेतनरूपा अचेतनरूपा च एषा प्रथमा सृष्टिः प्रकृतिरस्ति, सैव प्रकृतिः सर्वेषां प्राणिनां कल्याणाय पर्यावरणस्वरूपं धारयति।

**व्याकरणम् –** पुरुषस्योपकाराय – पुरुषस्य + उपकाराय, स्वरसन्धिः ,गुणः। स्रष्टुश्चेतनाचेतनात्मिका – स्रष्टुः + चेतनाचेतनात्मिका, विसर्गसन्धिः सत्व–श्चुत्वम्। पर्यावरणताङ्गता – पर्यावरणताम् + गता, व्यञ्जन–सन्धिः, अनुस्वार–परसर्वणः। सृष्टिरियम् – सृष्टिः + इयम्, विसर्गसन्धिः रुत्वम्।

चेतनाचेतनात्मिका – चेतनं च अचेतनं च इति चेतनाचेतने, चेतनाचेतने आत्मा यस्याः सा चेतनाचेतनात्मिका (क–प्रत्ययः) द्वन्द्वगर्भबहुव्रीहिः।

सृष्टिः –सृज् + क्तिन्। स्रष्टुः –सृज् + तृच् (ङस्)। उपकाराय–उप + कृञ् + घञ् (ङे.)।

**ब्रह्माण्ड–प्राणभूता या विश्वं वृत्वाऽवतिष्ठते।**
**पर्यावरण–नाम्ना सा कथ्यते प्रकृतिः परा।। 2।।**

**पदच्छेदः –** ब्रह्माण्ड–प्राणभूता या विश्वं वृत्वा अवतिष्ठते। पर्यावरण–नाम्ना सा कथ्यते प्रकृतिः परा।

**अन्वयः –** बह्माण्ड–प्राणभूता या परा प्रकृतिः विश्वं वृत्वा अवतिष्ठते सा पर्यावरणनाम्ना कथ्यते।

**व्याख्या –** ब्रह्माण्डप्राणभूता – समस्तभुवनजीवरूपा। या – दृश्यमाना। परा प्रकृतिः –प्रकटरूपा प्रकृतिः, ब्रह्मणः द्वे प्रकृती परा प्रकटरूपा, अपरा निगूढरूपा च। विश्वं – संसारम्, सकललोकं वा। वृत्वा – आवरणं कृत्वा। अवतिष्ठते सुष्ठु व्यवस्थिता वर्तते। सा–पूर्वोक्ता प्रकटरूपा प्रकृतिः। पर्यावरणनाम्ना – 'पर्यावरणम्' इति नामद्वारा। कथ्यते–उच्यते। पृथ्वी–जल–तेज–वायु–आकाशरूपा प्रकृतिः एव पर्यावरणम् इत्युच्यते।

**भावार्थः –** पृथ्वी–जल–तेज–वायु–आकाशरूपा समस्तभुवनस्य जीवनरक्षा च प्रकृतिः संसारम् आवृत्य व्यवस्थिता अस्ति, सा प्रकटरूपा प्रकृतिः एव पर्यावरणनाम्ना ज्ञायते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्** – वृत्वाऽवतिष्ठते–वृत्वा + अवतिष्ठते, स्वरसन्धिः, सवर्णदीर्घः। ब्रह्माण्डप्राणभूता – ब्रह्माण्डस्य प्राणभूता, षष्ठीतत्पुरुषः। अवतिष्ठते – अव + स्था + लट् (प्रथमपुरुषः एकवचनम्) वृत्वा – वृञ् + क्त्वा। पर्यावरणम् – परि + आङ् + वृञ् + ल्युट्।

**चेतनाऽचेतने शक्ती विद्येते पुरुषस्य वै।**
**अतस्ते स्वस्वभावेन सञ्जोषेते परस्परम्।। 3 ।।**

**पदच्छेदः** – चेतन + अचेतने शक्ती विद्येते पुरुषस्य वै। अतः ते स्वस्वभावेन सञ्जोषेते परस्परम्।

**अन्वयः** – पुरुषस्य वै चेतनाऽचेतने शक्ती विद्येते। अतः ते स्वस्वभावेन परस्परं सञ्जोषेते।

**व्याख्या** – पुरुषस्य – ब्रह्मणः, सृष्टिकर्तुः इत्यर्थः। वै–निश्चयेन। चेतनाऽचेतने–चैतन्ययुक्ता चैतन्यरहिता च। शक्ती – शक्तिद्वयी, सत्ताद्वयी वा। विद्येते – वर्तेते, विद्यमाने स्तः। अतः – एतस्मात् कारणात्। ते–चेतनाचेतने शक्ती, स्वस्वभावेन–स्वस्य स्वभावेन अर्थात् चैतन्यस्वभावेन अचैतन्यस्वभावेन च। परस्परम् – मिथः। सञ्जोषेते – संसेवेते, सापेक्षे स्तः इत्यर्थः।

**भावार्थः** – ब्रह्मणः शक्तिस्वरूपं वर्णयति कविः – परमपुरुषस्य ब्रह्मणः

चेतनरूपा अचेतनरूपा च द्वे शक्ती वर्तेते। ते चेतनाचेतने शक्ती निजस्वभावेन अर्थात् चैतन्यस्वभावेन अचैतन्यस्वभावेन च परस्परं सापेक्षे वर्तेते, सेवां कुरुतः इत्याशयः।

**व्याकरणम्** – सञ्जोषेते – सम् + जोषेते, व्यञ्जनसन्धिः, अनुस्वार–परसवर्णः। चेतनाऽचेतने – चेतना च अचेतना च इति द्वन्द्वः। स्वस्वभावेन – स्वस्य स्वभावः तेन–षष्ठी तत्पुरुषः। शक्तिः शक् + क्तिन्। विद्येते – विद् + लट् (प्रथमपुरुषः द्विवचनम्)

**जडे जडात्मिका शक्तिः चेतने चेतनात्मिका।**
**समाराध्या सदा सद्भिरक्षुब्धा सुखदाऽस्ति सा।। 4 ।।**

**पदच्छेदः** – जडे जडात्मिका शक्तिः चेतने चेतनात्मिका। समाराध्या सदा सद्भिः अक्षुब्धा सुखदा अस्ति सा।

**अन्वयः** – जडे जडात्मिका चेतने (च) चेतनात्मिका शक्तिः सद्भिः सदा समाराध्या। अक्षुब्धा सा सुखदा अस्ति।

**व्याख्याः** – जडे – जडपदार्थे, अचेतने इत्यर्थः। जडात्मिका – जडत्वरूपा। चेतने – चेतनभूतेषु, जीववनस्पत्यादिषु इत्यर्थः। चेतनात्मिका – चैतन्यरूपा। शक्तिः – ब्रह्माण्डप्राणभूता सा प्रकटरूपा प्रकृतिः। सद्भिः – सत्पुरुषैः, साधुजनैः। सदा – नित्यम्, सततम्। समाराध्या – आराधनीया, अनुकूलनार्थं प्रयतनीया। अक्षुब्धा – क्षोभरहिता, अविकारिता। सा – परा प्रकृतिशक्तिः। सुखदा – आनन्दप्रदायिनी, कल्याणकारिणी। अस्ति– भवति, वर्तते इत्यर्थः।

**भावार्थः** – प्रकृतिशक्तिं प्रति अस्माकं कर्तव्यं वर्णयति कविः – जडपदार्थेषु जडत्वरूपा शक्तिः तथैव चेतनभूतेषु चैतन्य–युक्ता ब्रह्माण्डप्राणभूता सा प्रकृतिशक्तिः अस्माभिः सदैव आराधनीया, अर्थात् अस्माभिः सदैव प्रकृतेः अनुकूलनार्थं प्रयासाः करणीयाः। सन्तुलिता प्रकृतिः सदा कल्याणकारिणी भवति।

**व्याकरणम्** – जडात्मिका–जड + आत्मिका, स्वरसन्धिः सवर्णदीर्घः। सद्भिरक्षुब्धा–सद्भिः + अक्षुब्ध ा, विसर्गः रुत्वम्। अक्षुब्धा – न क्षुब्धा, नञ्तत्पुरुषः। सुखदा – सुखं ददाति (उपपदसमासः) आराध्या



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

– आङ्. + राध् + ण्यत् + टाप्। क्षुब्धा –क्षुभ्+क्त+टाप्।

**मातेव सेवनीया स्यादचिच्छक्तिश्चिदाश्रया।**

**सेविता सर्वसौख्यानां जनयित्री भवेद् हि नः।। 5 ।।**

**पदच्छेदः** – माता इव सेवनीया स्यात् अचित् शक्तिः चित् + आश्रया। सेविता सर्वसौख्यानाम् जनयित्री भवेत् हि नः।

**अन्वयः** – चिदाश्रया अचित् शक्तिः माता इव सेवनीया स्यात्। सेविता हि सा नः सर्वसौख्यानां जनयित्री भवेत्।

**व्याख्या** – चिदाश्रया – चेतनशक्तिं समाश्रिता। अचित् – अचेतनात्मिका। शक्तिः – प्रकृतिः। माता–जननी, जन्मदात्री इत्यर्थः। इव – यथा। सेवनीया स्यात् – सेवितव्या सेव्या वा स्यात्। सेविता – जुष्टा। हि – निश्चयेन। सा – अचित् शक्तिः। नः अस्माकम्, सर्वेषामपि प्राणिनाम्। सर्वसौख्यानाम् – सकलविधकल्याणानाम्, आनन्दानाम् इत्यर्थः। जनयित्री – उत्पादनकर्त्री, उत्पादयित्री वा। भवेत् – वर्तेत स्यात् वा।

**भावार्थः** – पर्यावरणरूपायाः प्रकृतिशक्तेः सेवनप्रकारं निरूपयति कविः – सा अचेतनशक्तिः चेतनशक्तिम् एव अवलम्बते। अतः अस्माभिः तस्याः शक्तेः माता इव सेवा करणीया। सेव्यमाना सा अस्माकं सर्वसुखानां जन्मदायिनी भवेत्।

**व्याकरणम्** – मातेव – माता + इव, स्वरसन्धिः गुणः। अचिच्छक्तिः – अचित् + शक्तिः, व्यञ्नसन्धिः श्चुत्वम्, छत्वम्। स्यादचित् – स्यात् + अचित्, व्यञ्नसन्धिः, जश्त्वम्। सर्वसौख्यानाम् – सर्वाणि च तानि सौख्यानि तेषाम् (कर्मधारयः) अचित् – न चित् (नञ्– तत्पुरुषः) सेवनीया – सेव् + अनीयर् + टाप्। सेविता – सेव + क्त + टाप्। सौख्यम् – सुख + ष्यञ्। जनयित्री – जन् + तृच् + ङीप्। आश्रया – आङ्. + श्रि + अच् + टाप्।

**यदि सोद्वेलिताऽस्माभिः भवतीह कदाचन।**

**तदा तनोति जालं सा दुःखानां परमार्त्तिदम्।। 6 ।।**

**पदच्छेदः** – यदि सा उद्वेलिता अस्माभिः भवति इह कदाचन। तदा तनोति जालम् सा दुःखानाम् परम + आर्तिदम्।

**अन्वयः** – यदि सा इह अस्माभिः कदाचन उद्वेलिता भवति, तदा सा परमार्त्तिदं दुःखानां जालं तनोति।

**व्याख्या** – यदि – चेत्। सा – प्रकृतिशक्तिः। इह – अत्र, अस्मिन् लोके। अस्माभिः मनुष्यैः। कदाचन – कदाचिदपि। उद्वेलिता–विकारिता, असन्तुलिता इत्यर्थः। भवति–जायते। तदा–तर्हि। सा – पूर्वोक्ता प्रकृतिः। परमार्त्तिदम् – परमकष्टकारकम्, अत्यन्तपीडादायकम्। दुःखानाम् – कष्टानाम्। जालम् पाशम्। तनोति–प्रथयति, विस्तरं करोति।

**भावार्थः** – प्रकृतिशक्तेः उद्वेलनस्य दुष्परिणाममाह– यदि वयं प्रकृतिशक्तिम् उद्वेलितवन्तः तदा असन्तुलिता सा अत्यन्तपीड़ादायकं दुःखसमूहं विस्तारयति। अतः प्रकृतिशक्तेः उद्वेलनं नैव करणीयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्** – सोद्वेलिता – सा + उद्वेलिता, स्वरसन्धिः गुणः। भवतीह – भवति + इह स्वरसन्धिः, सवर्णदीर्घः।

परमार्त्तिदम् – परमा चासौ आर्त्तिः परमार्त्तिः, तां ददाति इति परमार्त्तिदः, तम् (कर्मधारय– गर्भ–उपपदसमासः)। तनोति – तन् + लट् (प्रथमपुरुषः एकवचनम्)

**प्रकृतेर्दोहनं मा भूत्, दोहनं दुःखदं स्मृतम्।**
**पश्यन्त्वाणविकस्फोटाज्जीर्यमाणमभून्नभः।। 7 ।।**

**पदच्छेदः** – प्रकृतेः दोहनम् मा भूत् दोहनम् दुःखदम् स्मृतम्। पश्यन्तु आणविकस्फोटात् जीर्यमाणम् अभूत् नभः।

**अन्वयः** – प्रकृतेः दोहनं मा भूत्। दोहनं दुःखदं स्मृतम्। पश्यन्तु आणविकस्फोटात् नभः जीर्यमाणम् अभूत्।

**व्याख्या** – प्रकृतेः – प्रकृतिशक्तेः ब्रह्माण्डप्राणरूपायाः इत्यर्थः। दोहनम्–उद्वेलनम्। मा भूत्–न स्यात्। दोहनम् – आलोडनम्, उद्वेलनम्। दुःखदम् – पीडाकारकम्, कष्टदायकम् वा। स्मृतम् – कथितम्। पश्यन्तु–विलोकयन्तु। आणविकस्फोटात् – अणुजन्यविस्फोटात्, परमाणुविस्फोटादिभ्यः इत्यर्थः। नभः – अन्तरिक्षम्। जीर्यमाणम् – क्षीयमाणम्। अभूत् – सञ्जातम्।

**भावार्थः** – प्रकृतेः दोहनस्य दुष्परिणामं दर्शयति कविः यत् प्रकृतेः दोहनं नैव करणीयम्। पर्यावरणविदः स्वीकुर्वन्ति यत् अस्याः दोहनं पीडादायकं भवति। परमाणुविस्फोटेन अन्तरिक्षं जीर्यमाणं सञ्जातम्। अत्र ओजोन – आस्तरणस्य क्षीयमाणस्थितिः निर्दिष्टा वर्तते।

**व्याकरणम्** – पश्यन्त्वाणविकस्फोटात् – पश्यन्तु + आणविकस्फोटात्, स्वरसन्धिः यण्। अभून्नभः – अभूत् + नभः व्यञ्जनसन्धिः, अनुनासिकः। आणविकस्फोटात् – अणोः इदम् आणविकम्, आणविकः चासौ स्फोटः आणविकस्फोटः तस्मात् (कर्मधारयः)। दुःखदम् – दुःखं ददाति तम् (उपपदसमासः) दोहनम् – दुह् + ल्युट्। स्मृतम् – स्मृ + क्त। स्फोटः – स्फुट + घञ्।

**जीर्णाकाशात् समायान्ति विषाक्ता रश्मयो भुवम्।**
**अल्ट्राख्या भास्करीयास्ते गिलन्तो जीवनं हि नः ।। 8 ।।**

**पदच्छेदः –** जीर्ण + आकाशात् समायान्ति विषाक्ताः रश्मयः भुवम्। अल्ट्राख्याः भास्करीयाः ते गिलन्तः जीवनम् हि नः।

**अन्वयः –** जीर्णाकाशात् विषाक्ताः अल्ट्राख्याः ते भास्करीयाः रश्मयः हि नः जीवनम् गिलन्तः भुवम् समायान्ति।

**व्याख्या** – जीर्णाकाशात् – परमाणुविस्फोटादिभिः क्षीणाकाशात्। विषाक्ताः – विषाणुभरिताः विषसम्पृक्ताः। अल्ट्राख्याः अल्ट्रानामकाः, अल्ट्रावायलेट इति नाम्ना प्रसिद्धाः। ते भास्करीयाः – तादृशाः सौराः। रश्मयः – किरणाः सूर्यकिरणाः इति भावः। हि – निश्चयेन। नः – अस्माकम्। जीवनम् – प्राणशक्तिम् जीवितम्। गिलन्तः भक्षयन्तः, विनाशयन्तः, इत्यर्थः। भुवम् – पृथ्वीलोकम्। समायान्ति – समागच्छन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भावार्थः** – विषाक्तकिरणानां प्रभावं दर्शयन् एवमाह कविः यत् परमाणुविस्फोटादिभिः क्षीणगगनाद् विष–सम्पृक्ताः अल्ट्रानामकाः सूर्यरश्मयः प्राणिजीवन–विघाताय कल्पन्ते।

**व्याकरणम्** – विषाक्ताः –विष + अक्ताः, स्वरसन्धिः, सवर्णदीर्घः, अल्ट्राख्याः – अल्ट्रा + आख्याः, स्वरसन्धिः, सवर्णदीर्घः। जीर्णाकाशात्– जीर्णं च तदाकाशम्, तस्मात् (कर्मधारयः)। जीर्णम् – जृ+क्त। गिलन्तः – गृ+शतृ (रेफस्य लत्वम्) भास्करीयाः – भास्कर + छ। जीवनम् – जीव् + ल्युट्।

**ब्रह्माण्डान्ता तु या सृष्टिरिह दोहनचालिता।**
**सृजति सा महोत्पातान् भूनभोवार्धिसम्भवान्।। 9 ।।**

**पदच्छेदः** – ब्रह्माण्डान्ता तु या सृष्टिः इह दोहनचालिता। सृजति सा महोत्पातान् भू नभः + वार्धि सम्भवान्।

**अन्वय :** ब्रह्माण्डान्ता तु या सृष्टिः इह दोनचालिता (भवति)
सा भूनभोवार्धिसम्भवान् महोत्पातान् सृजति।

**व्याख्या** – ब्रह्माण्डान्ता – ब्रह्माण्डपर्यन्ता, समस्ता इत्यर्थः। तु – तावत् वक्तव्यस्य वैशिष्ट्ये प्रयुक्तम्। या – पूर्वोक्ता। सृष्टिः –पर्यावरणरूपा परा प्रकृतिः। इह – अत्र, संसारे। दोहनचालिता – आलोडनव्याकुलिता, उद्वेलिता–असन्तुलिता इत्यर्थः। भवति इत्यध्याहारे। सा –पर्यावरणरूपा प्रकृतिः।

भूनभोवार्धिसम्भवान् – भूमिगगनसमुद्रजन्यान्। महोत्पातान् – महाविनाशान्।

सृजति–जनयति, प्रकटयति इति।

**भावार्थः** – यदा पर्यावरणरूपा समस्ता सृष्टिः इहलोके दोहनैः व्याकुलिता भवति तदा पृथिव्याः गगनस्य समुद्रस्य च सन्तुलनं विकृतं जायते, तेन सृष्टिः महाविनाशकपरिणामम् उत्पादयति।

**व्याकरणम्** – ब्रह्माण्डान्ता – ब्रह्माण्ड + अन्ता, स्वरसन्धिः, सवर्णदीर्घः। महोत्पातान् – महा+उत्पातान्, स्वरसन्धिः, गुणः। दोहनचालिता – दोहनैः चालिता इति तृतीयातत्पुरुषः। भूनभोवार्धि–सम्भवान् – भूश्च नभश्च वार्धिश्च इति भूनभोवार्धयः तेभ्यः तेषु वा सम्भवन्ति इति तान् (द्वन्द्वगर्भ–तत्पुरुषः)। महोत्पातान् – महान्तश्च ते उत्पाताः तान् (कर्मधारयः)

चालिता – चल + णिच् + क्त + टाप्। सम्भवः –सम् + भू + अप्।

**ध्वनि – वात – जलादीनां प्रकृतिर्विकृताऽभवत्।**
**प्रकृतिस्थो भवेल्लोक एतदर्थं यतेमहि।। 10 ।।**

**पदच्छेदः** – ध्वनि – वात – जलादीनाम् प्रकृतिः विकृता अभवत्। प्रकृतिस्थः भवेत् लोकः एतदर्थम् यतेमहि।

**अन्वयः** – ध्वनि–वात – जलादीनां प्रकृतिः विकृता अभवत्। लोकः प्रकृतिस्थः भवेत् एतदर्थं यतेमहि।

**व्याख्या** – ध्वनि–वात–जलादीनाम् – शब्द–वायु–नीरादीनाम्। प्रकृतिः – स्वभावः स्वाभाविकी स्थितिर्वा। विकृता – विकारयुक्ता। अभवत् – अवर्तत, जाता इत्यर्थः। लोकः – संसारः, अत्र पर्यावरणरूपो लोकः ज्ञातव्यः। प्रकृतिस्थः स्वभावसदृशः, यथास्वभावम्। भवेत्–स्यात्, वर्तेत। एतदर्थम् – एतत्प्रयोजनार्थम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यतेमहि – प्रयत्नः करणीयः।

**भावार्थः –** पर्यावरणसंरक्षणार्थं कविः कथयति यत् अतिशयहस्तक्षेपात् समग्रं पर्यावरणं विकृतं जातम् अतः समस्ता प्रकृतिः स्वस्वभावानुकूला निसर्गरमणीया स्यात् इति प्रयोजनार्थं प्रयत्नः करणीयः।

**व्याकरणम् –** भवेल्लोकः – भवेत् + लोकः, व्यञ्जनसन्धिः, परसवर्णः। विकृताऽभवत् – विकृता + अभवत्, स्वरसन्धिः, सवर्णदीर्घः।

ध्वनिवातजलादीनाम् – ध्वनिश्च वातश्च जलं च इति ध्वनि–वातजलानि तानि आदौ येषां तेषाम् (द्वन्द्वगर्भबहुब्रीहिः)। प्रकृतिस्थः प्रकृतौ तिष्ठति प्रकृतिस्थः (उपपदसमासः)। प्रकृतिः प्र+कृ+क्तिन्। विकृता – वि+कृ+क्त+टाप्।

**वितरतु शिवरूपा ब्रह्मसृष्टिः जनेभ्यः,**
**सकलसुखसमृद्धिं सेविता सा समेभ्यः।**

**त्रिगुणगण–गरिम्णा गुर्विणी सौम्यभावा,**
**भवतु नियमिता नोऽनन्तदोषान्निहन्त्री ।। 11।।**

**पदच्छेदः –** वितरतु शिवरूपा ब्रह्मसृष्टिः जनेभ्यः सकल–सुखसमृद्धिम् सेविता सा समेभ्यः। त्रिगुणगणगरिम्णा गुर्विणी सौम्यभावा भवतु नियमिता नः अनन्तदोषान् निहन्त्री।

**अन्वयः –** सा शिवरूपा ब्रह्मसृष्टिः सेविता समेभ्यः जनेभ्यः सकलसुखसमृद्धिं वितरतु। त्रिगुणगणगरिम्णा गुर्विणी सौम्यभावा नियमिता (सा प्रकृतिः) नः अनन्तदोषान् निहन्त्री भवतु।

**व्याख्या –** सा – पूर्वोक्ता पर्यावरणशक्तिः। शिवरूपा – कल्याणरूपा। ब्रह्मसृष्टिः – ब्रह्माण्डप्राणरूपा परा प्रकृतिः। सेविता – आराधिता 'सेव्यमाना, इति भावः। समेभ्यः सर्वेभ्यः, सकलेभ्यः। जनेभ्यः – मानवेभ्यः प्राणिभ्यः वा। सकलसुखसमृद्धिम् – समग्रानन्दवैभवम्। वितरतु–प्रददातु। त्रिगुणगणगरिम्णा– सत्वं रजः तमश्चेति गुणत्रयस्य गौरवेण। गुर्विणी –गौरवशालिनी। सौम्यभावा –शान्तस्वरूपा। नियमिता – व्यवस्थित–स्वरूपा, सन्तुलिता वा। 'सा पर्यावरणशक्तिः, इत्यध्याहारे। नः – अस्माकम् प्राणिनाम् इत्यर्थः। अनन्तदोषान् – बहून् अवगुणान्। निहन्त्री – विनाशकर्त्री। भवतु अस्तु, स्यात् वा।

**भावार्थः –** पर्यावरणशक्तेः प्राणिनां च मङ्लकामनां कुर्वन्नेवमाह कविः यत् सेव्यमाना एषा कल्याणस्वरूपा पर्यावरणशक्तिः अस्मभ्यं सर्वेभ्यः प्राणिभ्यः सकलविधानन्दवैभवं प्रददातु। सत्त्वरजस्तमसां गौरवेण गुरुभावं प्राप्ता शान्तरूपा सन्तुलिता सा प्रकृतिः अस्माकं असंख्यदोषान् विनाशयेत्।

**व्याकरणम् –** नोऽनन्तदोषान् – नः + अनन्तदोषान्, विसर्गसन्धिः, उत्व–पूर्वरूपम्।

त्रिगुणगणगरिम्णा – त्रयश्च ते गुणाः त्रिगुणाः, तेषां गणः त्रिगुणगणः तस्य गरिमा तेन (कर्मधारयगर्भतत्पुरुषः)।

सौम्यभावा – सौम्यः भावः यस्या सा सौम्यभावा (बहुव्रीहिः)। अनन्तदोषान् – अनन्ताः च ते दोषाः तान् (कर्मधारयः)। ब्रह्मसृष्टिः – ब्रह्माणः सृष्टिः (षष्ठीतत्पुरुषः)। सेविता – सेव् + क्त + टाप्। गरिम्णा – गुरु + इमनिच् + टा। नियमिता – नि + यम् + णिच् + क्त + टाप्। निहन्त्री – नि + हन् + तृच् + ङीप् भावः – भू + घञ्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासप्रश्नाः

### बहुविकल्पात्मकाः प्रश्नाः –

**निर्देशः – उचितं संकेताक्षरं कोष्ठके लिखत।**

1. स्रष्टुः आद्या सृष्टिः अस्ति –
   (क) चेतनात्मिका (ख) अचेतनात्मिका
   (ग) चेतनाऽचेतनात्मिका (घ) चित्स्वरूपा ( )
2. पर्यावरणनाम्ना का ज्ञायते ?
   (क) परा प्रकृतिः (ख) अपरा प्रकृतिः
   (ग) अप्रकृतिः (घ) दुष्प्रकृतिः ( )
3. मातेव का सेवनीया ?
   (क) दुःखाश्रया सुखशक्तिः(ख) चिदाश्रया अचित्शक्तिः
   (ग) पत्राश्रया पुष्पशक्तिः (घ) देहाश्रया आत्मशक्तिः ( )
4. दोहनचालिता सृष्टिः कान् सृजति ?
   (क) महोत्पातान् (ख) महादेवान्
   (ग) महापशून् (घ) महापुरुषान् ( )
5. नभः जीर्यमाणं कस्मादभूत् ?
   (क) वायुयानात् (ख) मानवगमनात्
   (ग) असद्विचारात् (घ) आणविकस्फोटात् ( )
6. उद्वेलिता प्रकृतिः केषां जालं तनोति –
   (क) सुखानाम् (ख) दुःखानाम्
   (ग) विद्यानाम् (घ) वेदानाम् ( )

### अतिलघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकम् एकवाक्ये उत्तरं देयम् –**

1. आद्या सृष्टिः किमर्थं पर्यावरणतां गता ?
2. ब्रह्माण्डप्राणभूता काऽस्ति ?
3. पुरुषस्य द्वे शक्ती के विद्येते ?
4. नः सर्वसौख्यानां जनयित्री का भवेत् ?
5. 'शक्तिः' इत्यत्र कः धातुः कश्च प्रत्ययः ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

6. केषां प्रकृतिः विकृता अभवत् ?
7. 'दुःखानाम्' अत्र का विभक्तिः किञ्च वचनम् ?
8. 'महोत्पातान्' अत्र कः समासः ?
9. कीदृशी प्रकृतिः दुःखानां जालं तनोति ?
10. 'विकृता' अत्र कः प्रत्ययः ?

## लघूत्तरात्मकाः प्रश्नाः

### निर्देशः – प्रतिप्रश्नं पञ्चसु पंक्तिषु उत्तरं लिखत –

1. कीदृशी प्रकृतिः पर्यावरणनाम्ना कथ्यते ?
2. अल्ट्राख्याः भास्करीया रश्मयः किं कुर्वन्ति।
3. प्रकृतेः दोहनं दुःखदं कथम् ?
4. प्रकृतिशक्तेः सेवा किमर्थं करणीया ?
5. सद्भिः सदा का समाराध्या ?

## निबन्धात्मकाः प्रश्नाः

### निर्देशः – दशसु पंक्तिषु प्रतिप्रश्नम् उत्तरं देयम्।

1. पर्यावरणस्वरूपं लिखत।
2. प्रकृतिशक्तेः दोहनस्य के दुष्परिणामाः ?
3. मङ्गलकामना कस्मिन् श्लोके कृताऽस्ति ? श्लोकस्य अभिप्रायमपि लिखत।
4. प्रस्तुतपाठस्य रचनाकारः कः ? तस्य परिचयं लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## षष्ठः पाठः

# छन्दांसि

छन्दसो गणना षट्सु वेदाङ्गेषु भवति। 'छन्दः पादौ तु वेदस्य' इति प्रपादयद्भिराचार्यैः छन्दःशास्त्रस्य वेदज्ञानाय अनिवार्यता निर्दिष्टा। यथा लोके पादावन्तरा पुरुषस्य गतिर्नास्ति तथैव वेदे छन्दोज्ञानविरहितस्य पङ्गोर्गत्यभावः सुनिश्चित एव। न केवलं वेदज्ञानाय एव छन्दःपरिज्ञानमनिवार्यमपितु लौकिककाव्यशास्त्रेषु पाटवं रचनानैपुण्यं चाधिगन्तुमपि छन्दोबोधः परमावश्यको विद्यते !

वैदिकवाङ्मये लौकिकवाङ्मये च छन्दःशास्त्रस्य विशिष्टं स्थानं विद्यते। छन्दःशास्त्रस्य प्राचीनं नाम छन्दोविचितिरप्यस्ति। शास्त्रभेदेन चास्य छन्दोऽनुशासनं, छन्दोविवृतिः, छन्दोमानं चेत्यादीनि नामान्यपि प्राप्यन्ते। छन्दो द्विविधमुच्यते– (अ) वैदिकच्छन्दः (आ) लौकिकच्छन्दश्चेति। तत्र –

### (अ) वैदिकच्छन्दांसि –

प्रमुखानि वैदिकच्छन्दांसि निम्नलिखितानि सन्ति –

1. गायत्री 2. उष्णिक् 3. अनुष्टुप् 4. बृहती 5. पंक्तिः 6. त्रिष्टुप् 7. जगती। इमानि छन्दांसि 'सप्तच्छन्दांसि' इति नाम्ना निर्दिश्यन्ते। एतेषां छन्दसाम् अक्षरसंख्या (क्रमशः) चतुश्शो वर्धते। वैदिकच्छन्दसां प्रयोगो वेदेषु प्राप्यते।

### (आ) लौकिकच्छन्दांसि –

काव्यशास्त्रादिषु प्रयुक्तानि छन्दांसि लौकिकच्छन्दांसि इत्युच्यन्ते। यद्यपि छन्दःशास्त्रे वार्णिकेण मात्रिकेन च भेदेन अनेकेषां छन्दसां वर्णनं प्राप्यते, परं तेषां सर्वेषां प्रयोगः साहित्ये नावलोक्यते। वाल्मीकिरामायणे त्रयोदशानां छन्दसां, महाभारतेऽष्टादशानां छन्दसां, श्रीमद्भागवतपुराणे च पञ्चविंशतेः छन्दसां प्रयोगः अभवत्। परवर्तिकाव्येषु संख्येयं पञ्चाशत्–परिमिता अभवत्। महाकविना माघेन स्वकीये शिशुपालवधमहाकाव्ये विविधच्छन्दसां रुचिरः समावेशः कृतः।

### छन्दःशास्त्रस्य परम्परा –

आचार्ययादवप्रकाशेन पिङ्गलसूत्रस्यावसाने छन्दःशास्त्र–परम्परा–परिचायकमेकं पद्यमुदाहृतम् –

**छन्दोज्ञानमिदं भवाद् भगवतो लेभे गुरूणां गुरुः,**
**तस्माद् दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः।**
**माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः,**
**तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात्॥**

1. **प्रथमः क्रमः –** युधिष्ठिरमीमांसक–कृत–वैदिकच्छन्दोमीमांसानुसारं प्रथमः क्रमः – बृहस्पतिः –दुश्च्यवनः – शुक्राचार्यः –माण्डव्यः – सैतवः – यास्कः – पिङ्गलश्चेत्येवं विद्यते।
2. **द्वितीयः क्रमः –** शिवः –गुहः – सनत्कुमारः – बृहस्पतिः – इन्द्रः –शेषनागः (पतञ्जलिः) –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पिङ्गलश्चेत्येवं वर्तते।

3. **तृतीयः क्रमः** – पिङ्गलच्छन्दःसूत्रस्य हलायुधवृत्तौ पिङ्गलात् पूर्ववर्तिनां केषाञ्चन आचार्याणामुल्लेखो विद्यते। तद्यथा–न्यङ्कु–कौ (क्रौ) ष्टुक् – यास्कशाकटायनादिभिः महर्षिभिः विरचितानि छन्दःशास्त्राणि अत्यन्तकठिनानि ज्ञात्वा संसारोपकारेच्छया पिङ्गलाचार्येण छन्दःशास्त्रं रचितम्।

## छन्दःशास्त्रस्य आचार्यपरम्परा –

छन्दःशास्त्रस्य आचार्यपरम्परायां प्रमुखा आचार्या निम्नलिखिताः सन्ति –

1. **आचार्य–पिङ्गलः** – पिङ्गलस्य 'छन्दःसूत्रम्' समुपलब्धेषु छन्दोग्रन्थेषु प्राचीनतमो ग्रन्थो विद्यते। देशः कालश्च अस्याचार्यस्य सप्रमाणं न ज्ञायते। पिङ्गलकृतस्य छन्दःशास्त्रस्य अनेकेषु व्याख्याकारेषु हलायुधः सुप्रसिद्धो विद्यते।
2. **जयदेवः** – आचार्यस्यास्य रचना 'जयदेवच्छन्दः' इति वर्तते। अस्याधारः पिङ्गलकृतं छन्दःशास्त्रमेव विद्यते।
3. **जयकीर्तिः** – कन्नडदेशीयः अयं जैनसम्प्रदायाचार्यः अष्टाधिकारविभक्तं 'छन्दोऽनुशासनम्' अरचयत्। अस्मिन् ग्रन्थे संस्कृतच्छन्दोभिः सहैव कन्नडच्छन्दसां विवरणम् अपि उपलभ्यते।
4. **केदारभट्टः** – केदारभट्टस्य छन्दोविषयको ग्रन्थो 'वृत्तरत्नाकरः' विद्यते। वृत्तरत्नाकरे षट्सु अध्यायेषु 136 श्लोकाः सन्ति। अत्र लक्षणे छन्दसः उदाहरणमपि समुपलभ्यते। वृत्तरत्नाकरः छन्दःशास्त्रस्य लोकप्रियो ग्रन्थो विद्यते।
5. **क्षेमेन्द्रः** – क्षेमेन्द्रस्य 'सुवृत्ततिलकम्' इत्याख्ये ग्रन्थे छन्दसां लक्षणोदाहरणैः सहैव तत्प्रयोगविषयेऽपि उपयोगिज्ञानं लभ्यते।
6. **कालिदासः** – कालिदासस्य 'श्रुतबोधः' लौकिकच्छन्दसां ज्ञानाय सर्वाधिकोपयोगी ग्रन्थो मन्यते। श्रुतबोधे 44 श्लोकेषु 37 छन्दसां वर्णनं प्राप्यते।
7. **हेमचन्द्रः** – हेमचन्द्रस्य 'छन्दोऽनुशासनम्' छन्दःशास्त्रस्य सुप्रसिद्धो ग्रन्थो विद्यते। अत्र प्राकृतानां तथैव च अपभ्रंशच्छन्दसामपि ज्ञानं समुपलभ्यते।
8. **गंगादासः** – गंगादासस्य 'छन्दोमञ्जरी' अपि छन्दःशास्त्रस्य लोकप्रियो ग्रन्थो विद्यते। अत्रापि वृत्तरत्नाकरवत् लक्षणान्येवोदाहरणरूपतां प्राप्नुवन्ति।

## छन्दो–विभागः

महर्षिपिङ्गलादयः अन्ये च आचार्याः लौकिकच्छन्दसां विभागद्वयं प्रतिपादयन्ति। तद्यथा–

**(1) मात्रिकच्छन्दः (2) वार्णिकच्छन्दश्चेति**। तत्र –

(1) **मात्रिकच्छन्दः** – यस्मिन् छन्दसि मात्राणां गणना क्रियतेऽर्थात् मात्रासंख्याम् आधृत्य रचना क्रियते तत् छन्दो मात्रिकच्छन्द इत्युच्यते। यथा –आर्या –उपगीतिरित्यादीनि।

(2) **वार्णिकच्छन्दः** – यस्मिन् छन्दसि वर्णानां नियतसंख्याऽऽधारेण रचना क्रियते तत् वार्णिकच्छन्द इत्युच्यते यथा – अनुष्टुप् – इन्द्रवज्रादीनि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदानां समानताऽऽधारेणापि वृत्तानां त्रयो भेदा भवन्ति। तद् यथा–

(1) **समवृत्तम्** – यस्य चत्वारः पादाः समानाः भवन्ति तत् समवृत्तं भवति।

(2) **अर्धसमवृत्तम्** – यस्य प्रथमपादः तृतीयपादतुल्यस्तथा द्वितीयः पादः चतुर्थपादतुल्यो भवति, तदर्धसमवृत्तं भवति।

(3) **विषमवृत्तम्**– यस्य सर्वे पादाः परस्परं भिन्ना भवन्ति तद् विषमवृत्तं भवति।

## केचित् पारिभाषिकाः शब्दाः

1. **छन्दः** – छादनाच्छन्दांसि इत्युच्यन्ते। मनोविचाराणां भावानां वा मिश्रितवर्णेषु शब्देषु वा व्यवस्थापनं छन्दसा एव विधीयते। तेन व्यवस्थापनेन शब्दाः मन्त्ररूपं, श्लोकरूपं, पद्यरूपं वा एकम् आवरणं प्राप्नुवन्ति, अविचलित–स्वरूपाः च भवन्ति। तद् आवरणम् एव छादनरूपेण, आच्छादनरूपेण लक्ष्यते। तस्मात् छादनाद् एव च छन्दांसि इति नामकरणं प्रवृत्तं प्रसिद्धं च। वस्तुतः निश्चितवर्णान् मात्राः वा पादरूपेण मत्वा रचितो वाक्यसमूहः छन्दःसंज्ञको भवति। यद्यपि श्लोकशब्दः पूर्वं प्रशंसापद्यानां कृते प्रयुक्तो भवति स्म किन्तु अनन्तरं अनुष्टुब्वृत्तस्य कृते श्लोकशब्दस्य व्यवहारः प्रारब्धः। सम्प्रति संस्कृतभाषायाः छन्दः श्लोकनाम्नापि ज्ञायते। छन्दसः कृते पद्यशब्दस्य प्रयोगोऽपि भवति। पद्ये चत्वारः पादाः भवन्ति।

2. **पादः** – **'ज्ञेयः पादश्तुर्थोंऽशः'**। छन्दसोऽथवा पद्यस्य चतुर्थो भागः 'पाद' इत्युच्यते। छन्दःशास्त्रे पादस्य पर्यायत्वेन अङ्घ्रि–चरणशब्दावपि प्रयुक्तौ भवतः।

3. **वर्णः** – स्वरोऽथवा स्वरयुक्तव्यञ्जनः छन्दःशास्त्रे (वर्णः) इति कथ्यते।

4. **मात्रा** – स्वरवर्णस्य निश्चित उच्चारणकालो 'मात्रा' इत्युच्यते। लघु–गुरु–भेदेन 'मात्रा' द्विविधा भवति।

5 **लघुः** – ह्रस्वो 'लघुः' इत्युच्यते। ह्रस्ववर्णस्य एका मात्रा गण्यते। अ–इ–उ–ऋ–लृ– इत्येते पञ्च ह्रस्वस्वराः सन्ति। कस्मिंश्चिद् वर्णे एतेषां मात्रा विद्यमाना भवति तदापि स वर्णो लघुरेव गण्यते। छन्दःशास्त्रे लघोः संक्षिप्तं नाम 'ल' इति विद्यते। लघुकृतेऽत्र '।' चिह्नं प्रयुज्यते।

6 **गुरुः** – एकाधिकमात्राशीलो वर्णो 'गुरुः' इति कथ्यते। आ–ई–ऊ–ॠ–ए–ऐ–ओ–औ– इत्येते दीर्घस्वरा गुरुत्वेन गण्यन्ते। गुरुकृते 'ऽ' चिह्नं प्रयुज्यते। छन्दःशास्त्रे गुरोः संक्षिप्तं नाम 'गु' इत्यस्ति। गुरुवर्णज्ञानार्थं श्लोकोऽयं प्रसिद्धो वर्तते –

**संयुक्ताद्यं दीर्घं, सानुस्वारं विसर्गसंमिश्रम्।**
**विज्ञेयमक्षरं गुरु, पादान्तस्थं विकल्पेन।।**

अयमर्थः यत् –

1. **संयुक्ताद्यम्** – संयुक्तवर्णात् पूर्ववर्ति अक्षरं गुरु भवति। यथा– 'विद्या' इत्यत्र दकारयकारयोः संयोगो विद्यतेऽतः तत्पूर्ववर्ति 'वि' इत्यक्षरं गुरु भविष्यति।

2. **दीर्घम्** – आ–ई–ऊ– इत्यादि–दीर्घमात्रायुक्तानि अक्षराण्यपि गुरुत्वेन गण्यन्ते। यथा– सा,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सी, सू–इत्यादीनि।

3. **सानुस्वारम्** – अनुस्वारयुक्तमक्षरमपि गुरु भवति। यथा अंश–वंश–कंस– इत्यत्रानुस्वारयुक्तानि प्रथमाक्षराणि गुरूणि सन्ति।

4. **विसर्गयुक्तम्** – विसर्गयुक्तमक्षरमपि गुरु भवति। यथा–यशः, हरिः, गुरुः,–इत्यादीनि।

5. **पादान्तस्थं विकल्पेन** – पादान्ते आवश्यकतानुसारं छन्दोऽनुरोधेन लघुः अथवा गुरुः मन्यते।

6. **गणः** – छन्दःशास्त्रे त्रयाणामक्षराणां समूहो गणसंज्ञको भवति। गणोऽपि छन्दोऽनुसारं द्विविध ो भवति –

(1) वर्णात्मको गणः

(2) मात्रात्मको गणश्च। तत्र –

**1. वर्णात्मकगणः –**

वर्णात्मकगणेषु यत्र त्रयोऽपि वर्णा गुरवः, असौ मगणः। आदिलघुर्यगणः, मध्यलघू रगणः, अन्तगुरुः सगणः, अन्तलघुस्तगणः, आदिगुरुर्भगणः, मध्यगुरुर्जगणः, सर्वलघुर्नगण इत्युच्यते। अनेन प्रकारेण अक्षरत्रयात्मकाः अष्टौ गणाः सम्भवन्ति। तत्र वर्णात्मक–गणस्वरूपबोधाय छन्दोमञ्जर्यां श्लोकः अस्ति –

**मस्त्रिगुरुस्त्रिलघुश्च नकारो, भादिगुरुः पुनरादिलघुर्यः।**
**जो गुरुमध्यगतो रलमध्यः, सोऽन्तगुरुः कथितोऽन्तलघुस्तः।।**

एतेषाम् अष्टानां गणानां स्वरूपं बोधयितुं तालिका–

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **स्वरूपम्**– | सर्वगुरुः | आदिलघुः | मध्यलघुः | अन्तगुरुः | अन्तलघुः | मध्यगुरुः | आदिगुरुः | सर्वलघुः |
| **गणः** – | मगणः | यगणः | रगणः | सगणः | तगणः | जगणः | भगणः | नगणः |
| **चिह्नानि** – | ऽ ऽ ऽ | ।ऽ ऽ | ऽ । ऽ | ।। ऽ | ऽ ऽ । | । ऽ। | ऽ।। | ।।। |
| **उदा.** – | मान्धाता | सुरेशः | भामिनी | सहसा | यानानि | नदीषु | आशिषि | सरसि |

एतेषां गणानां स्वरूपज्ञानार्थमेकं सूत्रमपि प्रसिद्धं वर्तते। तद्यथा – **'यमाताराजभानसलगम्।'**

एषु गणेषु यस्य स्वरूपं ज्ञातव्यं तस्य नामाक्षरतोऽग्रे द्वयोरक्षरयोः योजनेन तद्गणस्वरूपं निर्मितं भवति। यथा यगणं ज्ञातुं यकारादग्रस्थे द्वे अक्षरे यकारेण सह स्थापनीये तदा 'यमाता' इति यगणस्वरूपं प्राप्यते। एवमेव 'मातारा' इति मगणः, 'ताराज' इति तगणः, 'राजभा' इति रगणः, 'जभान' इति जगणः, 'भानस' इति भगणः, 'नसल' इति नगणः, 'सलगम्' इति सगणः इत्येवमष्टौ गणाः प्राप्यन्ते। सूत्रे 'ल' इत्यस्यार्थो 'लघुः' तथा 'गम्' इत्यस्यार्थो गुरुर्भवति।

**2. मात्रिकच्छन्दसां गणाः –**

आर्यादिमात्रिकच्छन्दसां गणाः पञ्च भवन्ति। एतेषु प्रतिगणं चतस्रो मात्राः भवन्ति। पञ्च मात्रिकगणाः सन्ति –

1. सर्वगुरुः – ऽ ऽ –2 + 2 = 4 मात्राः

2. अन्तगुरुः – ।। ऽ – 1 + 1 + 2 = 4 मात्राः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

3. मध्यगुरुः – |S| – 1 + 2 + 1 = 4 मात्राः

4. आदिगुरुः – S|| – 2 + 1 + 1 = 4 मात्राः

5. सर्वलघुः – |||| – 1 + 1 + 1. 1 = 4 मात्राः

**8. यतिः –**

छन्दस उच्चारणे व्यवस्थितस्वरूपं माधुर्यं च आनेतुं मध्ये यो विरामः स्वीक्रियते स यति–संज्ञको भवति। यथोक्तम् – **'यतिर्विच्छेदसंज्ञिका'**

सर्वेषां छन्दसां पादान्ते यतिर्भवति। श्लोकार्द्धानन्तरं तु यतिरनिवार्या भवति। केषुचित् छन्दःसु पादमध्येऽपि यतिर्भवति। छन्दोलक्षणेषु यतिः तृतीयाविभक्त्या सूच्यते।

**9. संख्यानां कृते प्रयुक्ताः शब्दाः –**

छन्दसां लक्षणेषु सङ्ख्यां ज्ञापयितुं साङ्केतिक–शब्दाः अपि प्रयुज्यन्ते। छन्दसां लक्षणबोधाय तेषां ज्ञानमप्यावश्यकं विद्यते। केचित् प्रमुखाः साङ्केतिक–शब्दाः एते सन्ति–

| साङ्केतिक – शब्दाः | संख्याः |
|---|---|
| चन्द्रमाः, पृथ्वी | (1) |
| पक्षौ, नेत्रे | (2) |
| गुणाः, रामाः, अग्नयः | (3) |
| वेदाः, वर्णाः, युगाः, आश्रमाः | (4) |
| शराः, इन्द्रियाणि, भूताः, तत्त्वानि | (5) |
| शास्त्राणि, रसाः, ऋतवः | (6) |
| अश्वाः, मुनयः, लोकाः, स्वराः | (7) |
| वसवः, यमाः, सिद्धयः | (8) |
| अङ्काः, ग्रहाः, द्रव्याणि, निधयः | (9) |
| दिशः, अवताराः | (10) |
| रुद्राः | (11) |

## 1. आर्या –

आर्या मात्रिकं छन्दो वर्तते। इदं छन्दः प्राकृतादिभाषासु 'गाथा' इति कथ्यते। आर्यायाः सामान्यलक्षणं भवति –

**यस्याः पादे प्रथमे,**
**द्वादशमात्रास्तथा तृतीयेऽपि।**
**अष्टादश द्वितीये,**
**चतुर्थके पञ्चदश साऽऽर्या।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अर्थात् यस्याः प्रथमे तृतीये च चरणे द्वादशमात्राः, द्वितीयचरणे अष्टादश, चतुर्थे चरणे च पञ्चदश मात्राः भवन्ति सा 'आर्या' इत्युच्यते। लघुवर्णस्य एका दीर्घवर्णस्य च द्वे मात्रे गण्येते। अत्रावधेयं यत् एतल्लक्षणमपि आर्यागुम्फितमेव विद्यते।

**उदाहरणम् –**

2 + 2 + 2 + 2 + 2 + 2 = 12 मात्राः

**पथ्याशी व्यायामी,**

2 + 1 + 1 + 2 + 2 + 1 + 2 + 1 + 2 + 2 + 2 = 18 मात्राः

**स्त्रीषु जितात्मा नरो न रोगी स्यात्।**

1 + 1 + 1 + 1 + 2 + 1 + 1 + 2 + 2 = 12 मात्राः

**यदि मनसा वचसा वा,**

2 + 1 + 1 + 2 + 2 + 1 + 2 + 2 + 2 = 15 मात्राः

**द्रुह्यति नित्यं न भूतेभ्यः।।**

## 2. अनुष्टुप् (श्लोकः) –

वार्णिकवृत्तेषु अष्टाक्षरात्मकचरणवृत्तानाम् एका जातिः 'अनुष्टुप्' इत्युच्यते। संस्कृतसाहित्यस्य अधिकांशभागः अनुष्टुब्वृत्ते निबद्धो वर्तते। अनुष्टुप् श्लोकनाम्ना प्रसिद्धः अस्ति।

**लक्षणम् –**

**श्लोके षष्ठं गुरु ज्ञेयं, सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोर्ह्रस्वं, सप्तमं दीर्घमन्ययोः।।**

अर्थात् श्लोकस्य प्रतिचरणं षष्ठम् अक्षरं गुरु, पञ्चमम् अक्षरं च लघु भवति। द्वितीये चतुर्थे च चरणे सप्तमम् अक्षरं लघु, प्रथमे तृतीये च चरणे सप्तमम् अक्षरं गुरु भवति।

ｌ ऽ ऽ　　　　ｌ ऽ ｌ

**प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम्**

ｌ ऽ ऽ　　　　ｌ ऽ ｌ

**तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति।।**

## 3. इन्द्रवज्रा –

इन्द्रवज्रा त्रिष्टुब्–जातीयं छन्दो विद्यते। अस्मिन् प्रतिचरणम् एकादश वर्णाः भवन्ति।

**लक्षणम् – स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

अर्थात् तौ – तगणद्वयं, जगौ – जगणः गुरुश्च, गः – गुरुः, यत्र भवन्ति तत्र इन्द्रवज्रा नाम वृत्तं भवति। अत्र पादान्ते यतिर्भवति।

**उदाहरणम्–** ऽ ऽ ｌ ऽ ऽ ｌ ｌ ऽ ｌ ऽऽ



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**गोष्ठे गिरिं सव्यकरेण धृत्वा**
**रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ।**
**यो गोकुलं गोपकुलं च सुस्थं**
**चक्रे स नो रक्षतु चक्रपाणिः।।**

### 4. उपेन्द्रवज्रा –

उपेन्द्रवज्रा अपि त्रिष्टुब्–जातीयं छन्दो विद्यते। अस्मिन् प्रतिचरणम् एकादश वर्णा भवन्ति।

**लक्षणम् – उपेन्द्रवज्रा जतजास्ततो गौ।**

अर्थाद् यत्र जतजाः – जगण–तगण–जगणाः ततः – तदनन्तरं गौ – द्वौ गुरू भवतः तत्र उपेन्द्रवज्रानाम वृत्तं भवति।

**उदाहरणम् –**

।ऽ ।ऽऽ ।। ऽ । ऽऽ
**सुखस्य दुःखस्य न कोऽपि दाता,**
**परो ददातीति कुबुद्धिरेषा।**
**अहं करोमीति मृषाभिमानः,**
**स्वकर्मसूत्रग्रथितो हि लोकः।।**

### 5. उपजातिः –

समानजातीययोः द्वयोर्वृत्तयोः चरणानां कस्मिंश्चिदपि छन्दसि संकरः (मिश्रणम्) उपजातिनाम्ना ज्ञायते, परन्तु छन्दःशास्त्रे द्वित्राणां मिश्रणमेव उपजातिरूपेण स्वीक्रियते। तत्रापि मुख्यरूपेण इन्द्रवज्रा–उपेन्द्रवज्रावृत्तयोः संकरेण (मिश्रणेन) सिद्धं वृत्तमेव उपजातिसंज्ञकं भवति।

**लक्षणम् –**

**अनन्तरोदीरितलक्ष्मभाजौ,**
**पादौ यदीयावुपजातयस्ताः।**
**इत्थं किलान्यास्वपि मिश्रितासु,**
**वदन्ति जातिष्विदमेव नाम।**

अर्थात् पूर्वोक्तयोः इन्द्रवज्रा–उपेन्द्रवज्रयोः मिश्रितलक्षणाः पादाः यासु भवन्ति ताः उपजातयो बोध्याः। पादान्ते यतिः।

**उदाहरणम् –**

।ऽ।ऽऽ।।ऽ।ऽऽ
**अनन्तशास्त्रं बहुलाश्च विद्याः,**
**स्वल्पश्च कालो बहुविघ्नता च।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**यत्सारभूतं तदुपासनीयं,**

**हंसैर्यथा क्षीरमिवाम्बुमध्यात्।।**

अत्र प्रथमः पादः उपेन्द्रवज्रायाः अवशिष्टपादाश्च इन्द्रवज्रायाः सन्ति। इन्द्रवज्रोपेन्द्रवज्रवृत्तयोः सम्मिश्रणादत्र उपजातिवृत्तं स्पष्टमेव।

### 6. भुजङ्गप्रयातम् –

भुजङ्गप्रयातस्य प्रतिचरणं द्वादशवर्णा भवन्ति।

**लक्षणम् – भुजङ्गप्रयातं चतुर्भिर्यकारैः।**

अर्थात् यत्र क्रमशः चत्वारो यगणा भवन्ति तत्र भुजङ्गप्रयातं नाम वृत्तं भवति। पादान्ते यतिः।

**उदाहरणम् –**

। ऽ ऽ। ऽ ऽ । ऽ ऽ । ऽ ऽ

**पुरः साधुवद्भाति मिथ्याविनीतः,**

**परोक्षे करोत्यर्थनाशं हताशः।**

**भुजङ्गप्रयातोपमं यस्य चित्तं,**

**त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्।।**

### 7. वंशस्थम्

इदं जगतीजातीयं छन्दो वर्तते। अस्य प्रतिचरणं द्वादशवर्णा भवन्ति।

**लक्षणम् – जतौ तु वंशस्थमुदीरितं जरौ।**

अर्थात् यस्य प्रतिचरणं क्रमशः जगण–तगण–जगण–रगणाः भवन्ति तत् वंशस्थं नाम वृत्तं भवति। पादान्ते यतिः।

**उदाहरणम्** –

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

**भवन्ति नम्रास्तरवः फलोद्गमैः ,**

**नवाम्बुभिर्दूरविलम्बिनो घनाः।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः,**

**स्वभाव एवैष परोपकारिणाम्।।**

### 8. द्रुतविलम्बितम् –

इदं द्वादशवर्णात्मकं (जगतीजातीयं) छन्दो वर्तते। यथा नाम्नैव स्पष्टं यदस्य पादस्य प्रारंभिकभागो द्रुतगत्या उत्तरार्द्धभागश्च विलम्बितगत्या पठ्यते, अत एवास्य नाम द्रुतविलम्बितमिति सञ्जातम्।

**लक्षणम् – द्रुतविलम्बितमाह नभौ भरौ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अर्थात् द्रुतविलम्बितस्य प्रतिचरणं क्रमशः नगण–भगण–भगण–रगणाः भवन्ति। पादान्ते यतिर्भवति।

**उदाहरणम् –**

**। । । ऽ । ।  ऽ ।  । ऽ । ऽ**
**इतरपापफलानि यदृच्छया,**
**वितर तानि सहे चतुरानन!**
**अरसिकेषु कवित्वनिवेदनं**
**शिरसि मा लिख ! मा लिख ! मा लिख! ।।**

## अभ्यास–विस्तरः

1. छन्दो वर्तते –
   (क) वेदस्य मुखम्  (ख) वेदस्य पादौ
   (ग) वेदस्य नेत्रे  (घ) वेदस्य घ्राणम्  (  )
2. वेदे प्रमुखानि छन्दांसि वर्तन्ते –
   (क) सप्त  (ख) नव
   (ग) एकादश  (घ) पञ्च  (  )
3. छन्दःपरम्परा प्रारब्धा –
   (क) पाणिनेः  (ख) शिवात्
   (ग) केदारभट्टात्  (घ) पिङ्गलात्  (  )
4. सर्वदा यतिर्भवति –
   (क) कुत्रापि  (ख) पादारम्भे
   (ग) पादान्ते  (घ) पादमध्ये  (  )
5. छन्दःसूत्रम्य रचयिता वर्तते –
   (क) जयदेवः  (ख) केदारभट्टः
   (ग) हेमचन्द्रः  (घ) पिङ्गलः  (  )
6. गणाः भवन्ति –
   (क) पञ्च  (ख) त्रयः
   (ग) अष्ट  (घ) सप्त  (  )
7. भगणस्य स्वरूपं भवति –
   (क) । ऽ ऽ  (ख) ऽ ऽ ऽ
   (ग) । । ।  (घ) ऽ । ।  (  )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

8. सर्वलघुर्भवति –

(क) नगणः (ख) सगणः

(ग) रगणः (घ) जगणः ( )

9. मगणो भवति –

(क) आदिलघुः (ख) सर्वगुरुः

(ग) सर्वलघुः (घ) मध्यगुरुः ( )

10. ग्रहा भवन्ति –

(क) सप्त (ख) अष्ट

(ग) नव (घ) एकादश ( )

11. रुद्रैः बोधो भवति –

(क) दशसंख्यायाः (ख) सप्तसंख्यायाः

(ग) द्वादशसंख्यायाः (घ) एकादशसंख्यायाः ( )

12. निम्नलिखितेषु मात्रिकच्छन्दो वर्तते –

(क) आर्या (ख) अनुष्टुप्

(ग) द्रुतविलम्बितम् (घ) उपजातिः ( )

13. अनुष्टुप्–वृत्तस्य प्रतिचरणं वर्णा भवन्ति –

(क) दश (ख) अष्ट

(ग) नव (घ) एकादश ( )

14. श्लोके सदा गुरु भवति–

(क) सप्तममक्षरम् (ख) पञ्चममक्षरम्

(ग) षष्ठमक्षरम् (घ) प्रथममक्षरम् ( )

15. चत्वारो यगणा भवन्ति –

(क) द्रुतविलम्बिते (ख) उपजातौ

(ग) वंशस्थवृत्ते (घ) भुजङ्गप्रयाते ( )

16. मिश्रितं छन्दो वर्तते –

(क) उपजातिः (ख) जातिः

(ग) इन्द्रवज्रा (घ) उपेन्द्रवज्रा ( )

17. वंशस्थवृत्तस्य प्रतिचरणं गणानां क्रमो भवति–

(क) जगण–रगण–जगण–तगणाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ख) जगण–तगण–जगण–रगणाः

(ग) जगण–जगण–तगण–रगणाः

(घ) तगण–रगण–जगण–जगणाः ( )

18. प्रतिचरणं नगण–भगण–भगण–रगणाः भवन्ति –

(क) भुजङ्गप्रयाते (ख) उपजातिवृत्ते

(ग) वंशस्थवृत्ते (घ) द्रुतविलम्बितवृत्ते ( )

19. **'एकातपत्रं जगतः प्रभुत्वम्'** इति उदाहरणमस्ति –

(क) इन्द्रवज्रायाः (ख) भुजङ्गप्रयातस्य

(ग) द्रुतविलम्बितस्य (घ) उपेन्द्रवज्रायाः ( )

20. वर्णानां लघु–गुरु–व्यवस्थां निरूपयत।

21. लौकिकच्छन्दः कतिविधं भवति ? नामोल्लेखं कुरुत।

22. मात्रिकच्छन्दसः परिभाषां लिखत।

23. वार्णिकच्छन्दसः परिभाषां लिखित्वा तदुदाहरणमपि लिखत।

24. समवृत्तं किं भवति ?

25. छन्दःशास्त्रे 'पादः' इत्यनेन कोऽभिप्रायः ?

26. गणस्य परिभाषां लिखत।

27. गणस्वरूपबोधकं सूत्रं लिखत।

28. अष्टानां गणानां स्वरूपं प्रदर्शयत।

29. यतेः परिभाषां लिखत।

30. गच्छति देवदत्तः। इत्यत्र लघु–गुरु–चिह्नं प्रदर्शयत।

31. आर्याया लक्षणं लिखत।

32. श्लोकस्य लक्षणं लिखित्वा तदुदाहरणमपि प्रदर्शयत।

33. इन्द्रवज्रावृत्तस्य उदाहरणं लिखित्वा तत्र तल्लक्षणं संघटयत।

34. उपजाति–लक्षणं लिखत।

35. उपेन्द्रवज्राया लक्षणोदाहरणे प्रदर्शयत।

36. वंशस्थवृत्तस्य लक्षणोदाहरणे प्रदर्शयत।

37. निम्नलिखितपद्ययोः छन्दोनिर्णयं कृत्वा तयोर्लक्षणमपि लिखत–

(i) इतरपापफलानि यदृच्छया,
वितर तानि सहे चतुरानन।
अरिसिकेषु कवित्वनिवेदनं,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शिरसि मा लिख! मा लिख! मा लिख !।।

(ii) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।

38. अधोलिखितपंक्तिषु छन्दोनिर्देशः कार्यः –

1. प्रियेषु सौभाग्यफला हि चारुता।
2. धर्मेण हीनाः पशुभिः समानाः।
3. त्वमेव माता च पिता त्वमेव।
4. कृष्णं वन्दे जगद्गुरुम्।
5. अर्थो हि कन्या परकीय एव।
6. द्रुतगतिः पुरुषो धनभाजनम्।
7. त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सप्तमः पाठः

# कोशः

## (व्यवहारोपयोगिनः शब्दाः)

शब्दानां सम्यग् अर्थपरिचयं कर्त्तुं कोशः एव शरणम्। अस्मिन् पुस्तके प्रदीयमानः अयं कोशः सामान्य–व्यवहारे प्रयुज्यमानानां शब्दानां परिचयं कारयितुं सङ्गृहीतो वर्त्तते। यद्यपि कोशःग्रन्थाऽनुगुणम् अत्र श्लोकनिबद्धं शब्दार्थज्ञानं तु नास्ति, न च पर्यायवाचि–शब्दाः प्रयुक्ताः परं शब्दशः एकमेकम् अर्थं प्रदाय सामान्यरूपेण व्यवहारोपयोग्यानां शब्दानां सञ्चयनं कृतम् अस्ति। अनेन हि विद्यार्थिनः स्वकीय–शब्दभण्डारं वर्धयन्तः संस्कृत–वाक्य–संरचना–काले, संस्कृत–प्रयोगकाले च सम्भाव्यमानं काठिन्यं निवारयितुं समर्थाः भविष्यन्ति इति लक्ष्यम् अत्र। ततश्च कोषास्वादम् अनुभूय अन्याऽन्य–कोष–ग्रन्थानाम् अपि अनुशीलने रुचिम् अधिगमिष्यन्ति, साहित्य–रसं च आस्वादयिष्यन्ति इति आशासितम्।

### (व्यवहारोपयोगिनः शब्दाः)

**फलानि**

| क्र.सं. | संस्कृत–शब्दाः | हिन्दी–शब्दाः |
|---|---|---|
| 1. | आम्रम् | आम |
| 2. | कदली | केला |
| 3. | द्राक्षाफलानि | अंगूर |
| 4. | दाडिमम् | अनार |
| 5. | दृढबीजम् | अमरूद |
| 6. | जम्बीरकम् | नीबू |
| 7. | खर्बुजम् | खरबूजा |
| 8. | जम्बूफलम् | जामुन |
| 9. | कालिन्दम् | तरबूज |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 10. | नारङ्गम् | नारंगी |
| 11. | बदरम् | बेर |
| 12. | शृङ्गाटकम् | सिंघाड़ा |
| | **शाकाः** | |
| 1. | शाकम् | साग |
| 2. | कर्कटी | ककड़ी |
| 3. | तुम्बी / अलाबुः | घीया |
| 4. | कलम्बी | पत्ता गोभी |
| 5. | गोजिह्वम् | फूल गोभी |
| 6. | कूष्माण्डम् | कद्दू |
| 7. | कारवेल्लम् | करेला |
| 8. | गर्जरम् | गाजर |
| 9. | भिण्डिका | भिण्डी |
| 10. | आलुकम् | आलू |
| 11. | पलाण्डुः | प्याज |
| 12. | वृन्ताकम् | बैंगन |
| 13. | मूलकम् | मूली |
| 14. | टिंडिशः | टिण्डा |
| 15. | पालक्या | पालक |
| 16. | ताम्रतरम् / रक्ताङ्गम् | टमाटर |
| 17. | हरित–मरीचम् | हरी मिर्च |
| 18. | लशुनम् | लहसुन |
| 19. | वास्तुकम् | बथुआ |
| 20. | आर्द्रकम् | अदरक |
| 21. | कलायः | मटर |
| | **भोजन–सामग्री** | |
| 1. | धान्यम् | अनाज |
| 2. | माषः | उड़द |
| 3. | मुद्गः | मूँग |
| 4. | गोधूमः | गेहूँ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 5. | चणकः | चना |
| 6. | वज्रान्नम् | बाजरा |
| 7. | तण्डुलः | चावल |
| 8. | यवः | जौ |
| 9. | यवनालः | ज्वार |
| 10. | तिलः | तिल |
| 11. | राजिका | राई |
| 12. | गोधूमचूर्णम् | गेहूँ का आटा |
| 13. | उपस्करः | मसाला |
| 14. | लवङ्गम् | लौंग |
| 15. | एला | इलायची |
| 16. | मधुरा | सौंफ |
| 17. | हरिद्रा | हल्दी |
| 18. | रक्तमरीचम् | लाल मिर्च |
| 19. | कृष्णमरीचम् | काली मिर्च |
| 20. | हिङ्गुः | हींग |
| 21. | सौरभम् | गरम मसाला |
| 22. | चणकचूर्णम् | बेसन |
| 23. | समिता | मैदा |
| 24. | द्विदलम् | दाल |
| 25. | रोटिका | रोटी |
| 26. | तक्रम् | छाछ |
| 27. | शर्करा | शक्कर |
| 28. | मिष्टान्नम् | मिठाई |
| 29. | पायसम् | खीर |
| 30. | लप्सिका | हलवा |
| 31. | कुण्डलिका | जलेबी |
| 32. | शष्कुली | पूड़ी |
| 33. | पिष्टकम् | बिस्कुट |
| 34. | नवनीतम् | मक्खन |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 35. | सिता | मिश्री |
| 36. | रसगोलकम् | रसगुल्ला |
| 37. | मोदकम् | लड्डू |
| 38. | पूपः | पूआ |
| 39. | दधिवटकम् | दही बड़ा |
| 40. | लवणम् | नमक |
| 41. | लवणान्नम् | नमकीन (खाद्य) |
| 42. | तेमनम् | कढ़ी |
| 43. | पक्ववटिका | पकौड़ी |
| 44. | पर्पटः | पापड़ |
| 45. | दधि | दही |
| 46. | दुग्धम् | दूध |
| 47. | घृतम् | घी |
| | **सम्बन्ध–वाचकाः शब्दाः** | |
| 1. | प्रपितामहः | परदादा |
| 2. | प्रपितामही | परदादी |
| 3. | पितामहः | दादा |
| 4. | पितामही | दादी |
| 5. | माता | माँ |
| 6. | पिता | पिता |
| 7. | पितृव्यः | चाचा |
| 8. | पितृव्या | चाची |
| 9. | अग्रजा | बड़ी बहिन, दीदी |
| 10. | अनुजा | छोटी बहिन |
| 11. | अग्रजः | बड़ा भाई |
| 12. | अनुजः | छोटा भाई |
| 13. | भगिनी | बहन |
| 14. | आवुत्तः | बइनोई / जीजा |
| 15. | भ्रातृजाया | भाभी |
| 16. | जामाता | जँवाई |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 17. | देवरः | देवर |
| 18. | देवराणी | देवरानी |
| 19. | ननान्दा | ननद |
| 20. | पौत्रः | पोता |
| 21. | पौत्री | पोती |
| 22. | प्रपौत्रः | परपोता |
| 23. | प्रपौत्री | परपोती |
| 24. | आत्मजः | पुत्र |
| 25. | आत्मजा | पुत्री |
| 26. | पितृष्वसा | बुआ |
| 27. | पितृष्वसृपतिः | फूफा |
| 28. | मातृष्वसा | मौसी |
| 29. | मातृष्वसृपतिः | मौसा |
| 30. | सहोदरः | सगा भाई |
| 31. | भ्रातृव्यः | भतीजा |
| 32. | भ्रातृव्या | भतीजी |
| 33. | प्रमातामहः | परनाना |
| 34. | प्रमातामही | परनानी |
| 35. | मातामहः | नाना |
| 36. | मातामही | नानी |
| 37. | मातुलः | मामा |
| 38. | मातुलानी | मामी |
| 39. | भागिनेयः | भानजा |
| 40. | भागिनेयी | भानजी |
| 41. | ननान्दृ–पतिः | ननदोई |
| 42. | पतिः | पति |
| 43. | पत्नी | पत्नी |
| 44. | श्वसुरः | ससुर |
| 45. | श्वश्रूः | सास |
| 46. | श्यालः | साला |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 47. | श्याली | साली |
| 48. | सम्बन्धी | रिश्तेदार |
| | **अध्ययन–सम्बन्धिनः शब्दाः** | |
| 1. | सतीर्थ्यः | कक्षा का साथी |
| 2. | लेखनी | कलम (पैन) |
| 3. | कागदः | कागज |
| 4. | विद्यालयः | विद्यालय (स्कूल) |
| 5. | सञ्चायिका | कापी |
| 6. | सुधाखण्डः | चाक |
| 7. | मार्जकम् | मार्जक (डस्टर) |
| 8. | मसीपात्रम् | स्याही की दवात |
| 9. | पुस्तकम् | पुस्तक |
| 10. | पृष्ठम् | पेज |
| 11. | वेष्टनम् | बस्ता |
| 12. | पञ्जिका | पञ्जिका |
| 13. | घर्षकः | रबर |
| 14. | मानचित्रम् | नक्शा |
| 15. | पुनःपूरणी | रिफिल |
| 16. | कालांशः | कालांश (पीरियड्) |
| 17. | क्रीडाङ्गणम् | खेल का मैदान |
| 18. | उत्पीठिका | टेबिल |
| 19. | आसन्दः | कुर्सी |
| 20. | गणवेशः | गणवेश (यूनीफार्म) |
| 21. | दीर्घपीठम् | बैञ्च |
| 22. | गणना | गिनती |
| 23. | सम्भाषणम् | बातचीत |
| 24. | सज्जता | तैयारी |
| | **पशु–पक्षि–नामानि** | |
| 1. | अजः | बकरा |
| 2. | अजा | बकरी |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| 3. | उष्ट्रः | ऊँट |
| 4. | कुक्कुरः | कुत्ता |
| 5. | शशकः | खरगोश |
| 6. | गर्दभः | गधा |
| 7. | गोः | गाय |
| 8. | बलीवर्दः | बैल |
| 9. | महिषी | भैंस |
| 10. | अश्वः | घोड़ा |
| 11. | मूषकः | चूहा |
| 12. | मार्जारी | बिल्ली |
| 13. | हरिणः / मृगः | हिरण |
| 14. | श्रृगालः | गीदड़ |
| 15. | नकुलः | नेवला |
| 16. | वानरः | बन्दर |
| 17. | भल्लूकः | भालू |
| 18. | सिंहः | शेर |
| 19. | गजः | हाथी |
| 20. | चित्रगर्दभः | जेब्रा |
| 21. | चटकः | चिड़िया (नर) |
| 22. | चटका | चिड़िया (मादा) |
| 23. | उलूकः | उल्लू |
| 24. | कपोतः | कबूतर |
| 25. | कोकिलः | कोयल (नर) |
| 26. | काकः | कौवा |
| 27. | गृध्रः | गिद्ध |
| 28. | शुकः | तोता (नर) |
| 29. | बकः | बगुला |
| 30. | हंसः | हंस |
| 31. | श्येनः | बाज |
| 32. | कुक्कुटः | मुर्गा |
| 33. | मयूरः | मोर |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास–विस्तरः

1. 'कालिन्दम्' इत्यस्यार्थः अस्ति –
   (क) खरबूजा (ख) तरबूज
   (ग) ककड़ी (घ) अनार
2. 'कोशातकी' इति भवति –
   (क) तुरई (ख) घीया
   (ग) भिण्डी (घ) सेम फली
3. 'पनसम्' इति नामास्ति –
   (क) आलू का (ख) कद्दू का
   (ग) कटहल का (घ) बैंगन का
4. 'कलायः' इति हिन्दी–भाषायामुच्यते –
   (क) मटर (ख) परवल
   (ग) टिण्डा (घ) करेला
5. 'वज्रान्नम्' इति कथ्यते –
   (क) जवार (ख) जौ
   (ग) चना (घ) बाजरा
6. 'मैदा' इत्यस्य कृते संस्कृतशब्दो भवति –
   (क) मृद्वीका (ख) समिता
   (ग) मधुरा (घ) मिश्रेया
7. 'अचार' इत्यस्य संस्कृतनामास्ति –
   (क) उपस्करः (ख) सौरभम्
   (ग) अवकरः (घ) सन्धितम्
8. मातृष्वसा भवति –
   (क) मौसी (ख) मामी
   (ग) माता (घ) चाची
9. 'सतीर्थ्यः' इति भवति –
   (क) सरल (ख) कक्षा का साथी
   (ग) सलाह (घ) तीर्थयात्री



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

10. 'चित्रगर्दभः' इति भवति –

(क) गधा (ख) घोड़ा

(ग) जेब्रा (घ) चीता

11. 'श्येनः' इति भवति –

(क) बाज (ख) सारस

(ग) सयाना (घ) उल्लू

12. पञ्चानां फलानां संस्कृतनामानि लिखत।

13. पञ्चानां शाकानां संस्कृतनामानि लिखत।

14. सप्तानां पशूनां संस्कृतनामानि लिखत।

15. पञ्चानां पक्षिणां संस्कृतनामानि लिखत।

16. निम्नलिखितानां संस्कृतनामानि लिखत –

(क) खरबूजा (ख) तरबूज

(ग) ककड़ी (घ) अनार



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# कथासारः
## हितोपदेशस्य परिचयः

हितस्य उपदेशो हितोपदेशः। अर्थाद् एतादृशः कथाविशेषस्य सङ्ग्रहो यत्र प्राणिकल्याणार्थं ज्ञानं स्यादिति। एष हितोपदेशः पऺतन्त्रान्निर्गत एकः कथासङ्ग्रहोऽस्ति। पशुकथानामेष कथासङ्ग्रहोऽतीवलोकप्रियो वर्तते। अस्य हितोपदेशस्य चत्वारः परिच्छेदाः उपलभ्यन्ते- (1) मित्रलाभः, (2) सुहृद्भेदः (3) विग्रहः (4) सन्धिश्च।

एषु चतुर्षु परिच्छेदेषु चतुर्णामुपायानां (साम-दान-दण्ड-भेदानाम्) वर्णनं बालानां सुखबोधाय कथारूपेण सरलतया विहितम्। अस्य भाषा पऺतन्त्रस्य भाषापेक्षया अर्वाचीना सरला च वर्तते। अस्यानुवादो नानासु भाषास्वपि सञ्जातः। नारायण पण्डितेनात्र शिक्षादायककथामाध्यमेन नीतिशास्त्रस्य, राजनीतेस्तथान्येषां सामाजिक-नियमानां शिक्षा प्रदत्ता। सङ्ग्रहस्यास्य रचना मूलतो गद्ये जाता किन्तु पदे-पदे प्रचुरतया पद्यानामपि प्रयोगोऽभवत्। अत्र लेखकेन स्वमतानां पुष्ट्यर्थं महाभारत-धर्मशास्त्र-पुराणादिभ्यश्च उदाहरणानि प्रदत्तानि। अत्र पऺतन्त्रस्य गद्यानां 2/5 भागस्तथा पद्यानां 1/3 भागो लभते। अस्य शैली शिक्षाप्रदायिनी वर्तते, अतोऽस्य भाषा अतीव सरला वर्तते। अस्य लोकप्रियतायाः कारणमपि एतदेव प्रतीयते। अत्र दीर्घसमासानां, क्लिष्टवाक्यानां, दुरुहान्वयानाऺ प्रायशोऽभावो दृश्यते। भावसौन्दर्यमपि चित्ताकर्षकं च वर्तते।

**कर्तुः परिचयः -**

हितोपदेशनामधेयस्य कथारत्नस्य लेखको नारायण पण्डित आसीत्। असौ बङ्गनरेशस्य श्रीमतो धवलचन्द्रस्य सभापण्डितः (आश्रितकविः) आसीत्। हितोपदेशस्य अनेन श्लोकेन ज्ञायते यन्नृपस्य प्रेरणयैव नारायण पण्डितेन एष कथासङ्ग्रहो लिखितः। तद्यथा-

**'श्रीमद्धवलचन्द्रोऽसौ जीयान्माण्डुलिको रिपून्।**
**येनाऽयं सङ्ग्रहो यत्नांल्लेखयित्वा प्रचारितः॥'**

अस्य लेखकस्य जनिकालश्चतुर्दशशताब्द्याः समीपे मन्यते। हितोपदेशस्य 1373 ई.वर्षस्य एकस्यां पाण्डुलिप्यां भट्टारकवारस्य (रविवारस्य) उल्लेख एतादृशदिवसकृते लेखकेन विहितो यस्मिन् दिवसे कार्यं गर्हितं भवति। अस्याः शब्दावल्याः प्रयोग 900 ई. पूर्वं नासीत्, अतो लेखकस्य कथासङ्ग्रहस्य च कालः डॉ.कीथ महोदयः 900 ई.वर्षतः 1373 ई.मध्ये स्वीकृतवान्। कविनिर्मितैः पद्यैस्तस्योन्नतकाव्यशक्तेर्ज्ञानं भवति।

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## कथामुखम् (प्रस्तावना)

भागीरथीतीरे पाटलीपुत्रनामधेयं नगरमासीत्। तत्र सुदर्शननामधेयो नृपो राज्यमकरोत्। एकदा स नृपः केनापि पठ्यमानं श्लोकद्वयं श्रुतवान् -

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥**
**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥**

एतच्छ्रुत्वा स नृप उन्मार्गगामिनाम् अनधिगत-शास्त्राणाम् आत्मनः पुत्राणां कृते पण्डितसभाम् आयोजितवान्। तत्रात्मनः पुत्रान् विद्यायुक्तान् विधातुं तेन पण्डितानां पुरतः प्रश्न उपस्थापितः। तत्रोपस्थितेषुविद्वन्मण्डलेषु विष्णुशर्मा नामधेयः पण्डितोऽब्रवीत्-देव! एतान् राजपुत्रान् नीतिशास्त्रमध्यापयितुमहं समर्थोऽस्मि। षण्मासाभ्यन्तरेऽहं भवत्पुत्रान् नीतिशास्त्रनिपुणान् कर्तुं शक्नोमि। एतदाकर्ण्य स नृपः स्वकीयान् पुत्रान् तस्य विष्णुशर्मणो हस्ते ससम्मानं समर्पितवान्।

पण्डित विष्णुशर्मा राजपुत्रान् एकत्रीकृत्य राजप्रासादं गुरुकुलं विधाय नीतिशास्त्रोपदेशं प्रारभत्।

पण्डितविष्णुशर्मा निम्नाङ्कितेन पद्येनाध्यापनं प्रारब्धवान् यत्र बुद्धिमत्ताया मित्रतायाश्चोपयोगिता प्रतिपादिता आसीत्-

**असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।**
**साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत्॥**

एतदनन्तरं श्रीमता शर्मणा श्रोतॄणां राजपुत्राणां कृते कथारब्धा।

**मूलकथा -**

गोदावरी नद्यास्तीरे महान् शाल्मलिवृक्ष आसीत्। तत्र रात्रौ बहवः पक्षिणो नानादेशादागत्य निवसन्तिस्म। एकदा क्षपावसानसमये लघुपतनकनामधेयो वायसः सपाशं कमपि व्याधमपश्यत्। तमवलोक्य तस्य मनसि चिन्ता सञ्जाता। स व्याघः तस्मिन्नेव वने तण्डुलकणान् विकीर्य जालं प्रसार्य प्रछन्नो भूत्वाऽतिष्ठत्। तस्मिन्नेव काले कपोतराजश्चित्रग्रीवः सपरिवारो नभोमण्डलात् तान् तण्डुलकणान् अपश्यत्। तान् तण्डुलान् दृष्ट्वा कपोताः भोक्तुमतीव व्याकुलाऽभूवन्, किन्तु चित्रग्रीवस्तान् कपोतान् निवारयन् कथयति यद् अस्मिन् निर्जने वने तण्डुलकणानां दर्शनं कथं सम्भवति? नूनमत्र कश्चिद् हेतुर्विद्यते। अतस्तद्भक्षणे लोभो नैव कार्यः। अस्मिन्नेव प्रसङ्गे स लुब्धपथिकवृद्धव्याघ्रयोः कथां श्रावयति।

कपोताः तद्वचनं तिरस्कृत्य तान् तण्डुलान् भोक्तुं यदावतरन्ति तदानीमेव पाशबद्धा भवन्ति। चित्रग्रीवः पाशबद्धान् तानवलोक्य पाशमादाय युगपद् उड्डयनार्थं तान् कपोतान् प्रेरयति। तत्प्रेरणया सर्वे कपोताः जालमादाय उद्गच्छन्ति। स व्याघः तान् उड्डीयमानान् कपोतान् अवलोक्य सशोकं प्रत्यावर्तत।

सपरिवारः कपोतराजः सपाशमात्मनो मित्रस्य हिरण्यकस्य समीपं गण्डकी नद्यास्तटमुपागच्छत्। चित्रग्रीवस्य वचनमाकर्ण्य स मूषको विवराद् बहिरागत्य पाशबद्धं मित्रं विलोक्य साश्चर्यं बन्धनस्य कारणं पृच्छति। एतत्तु कर्मफलबन्धनमस्तीति चित्रग्रीवो वदति। हिरण्यकश्च पूर्वं मित्रस्य पाशं छेत्तुमिच्छति परं कपोतराजः स्वाश्रितानां कपोतानां पाशबन्धनं छेदनार्थं बहुविधं तर्कमुपस्थापयति। एतदाकर्ण्य मूषकः पूर्वं कपोतानां तदनन्तरं मित्रस्य चित्रग्रीवस्य बन्धनं छिनत्ति। हिरण्यको मित्राणि सादरं सम्पूज्य कथयति यत् भवन्तः साम्प्रतं समागतात् संकटात् स्वतन्त्राः सञ्जाताः। ततः कपोतराजः सपरिवारो यथेष्टदेशं प्रस्थितः।

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## वृद्धव्याघ्र-लुब्धपथिककथा

कस्मिंश्चित् सरोवरतटे एको वृद्धो व्याघ्रः कृतस्नातः सुवर्णवलयहस्त उच्चस्वरेण वदति स्म- भो भोः पान्थाः ! इदं सुवर्ण कङ्कणं गृह्यन्ताम्। कश्चिद्लोभाकृष्टः पथिकः तदानीं तत्रागत्य ब्रूते यदहं दानं गृहीतुमिच्छामि, परं त्वयि हिंसके कथं विश्वसिमि। तदा व्याघ्रो वदति- श्रृणु रे पान्थ ! यौवनकाले मया बहुनि दुर्वृत्तानि कृतानि,परमिदानीं मे गात्रं शिथिलं सञ्जातम्। सम्प्रति दानं दत्वा पूर्वकृतकर्मणां प्रायश्चित्तं चिकीर्षामि। अतस्त्वं सरसि स्नात्वा एतत्सुवर्णकङ्कणं स्वीकुरु। लोभाकृष्टः पान्थो यदा सरसि स्नातुं प्रविष्टस्तदा पङ्के निमग्नः पलायितुं चाक्षमः सञ्जातः। तदा तेन विचारितं यन्मयाऽस्मिन ्हिंसके यत्प्रत्ययो विहितः तन्नोचितः, स पथिको यदा एवमचिन्तयत्तदानीमेव स व्याघ्रस्तं निहत्याखादच्च।

-

## मृगश्रृगालयोर्मैत्री

हिरण्यकेन विहितोपकारं दृष्ट्वा लघुपतनकनामावायसोऽपि मूषिकराजेन सह मैत्रीमभिलषति। यदा हिरण्यकः परिचयं कर्तुमिच्छति तदा लघुपतनकनामा वायसोऽस्मीति काको वदति, तदाकर्ण्य हिरण्यको ब्रूते यत्- त्वया सह मम मैत्री भवितुं न शक्नोति। यतोहि-मूषकः तव खाद्यो भवति, भवाः तत्खादकः। एतदर्थं भक्ष्यभक्षकयोर्मैत्री विपत्तेः कारणं भवति। उक्तः -

**भक्ष्य-भक्षकयोः प्रीतिर्विपत्तेरेव कारणम्।**
**श्रृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः॥**

तदनन्तरं हिरण्यक इमां कथां कथयति- मगधदेशे चम्पकवती नाम अरण्यानी आसीत्। तत्र मृगकाकौ स्नेहातिशयेन निवसतः। तत्र मृगमांसेच्छुकः कश्चिज्जम्बूको मृगमुपागच्छत्। काकः तं श्रृगालमवलोक्य परिचयं ज्ञातुमिच्छति, तदा श्रृगालो ब्रूते क्षुद्रबुद्धिनामा जम्बूकोऽस्मि। अस्मिन्नरण्ये बन्धुहीनोऽहं मृतवदेकाकी निवसन् मैत्रीकामनया समागतोऽस्मि। एतदाकर्ण्य काको ब्रूते सहसागतानामुपरि विश्वासो नैव कर्तव्यः। यतोहि-

**अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।**
**मार्जारस्य हि दोषेण हतो गृघ्रो जरद्गवः॥**

-

## भैरवनामव्याधस्य-लोलुपश्रृगालस्य च कथा

कल्याणकटकनाम्नि देशे भैरवनामा व्याधः प्रतिवसति स्म। एकदा स धनुरादाय मृगमन्विष्यन् विन्ध्याटवीं गतः। तेन एको मृगो व्यापादितः। तमादाय गच्छता तेन एकः शूकरो दृष्टः। मृगं भूमौ निधाय तेन शूकरः शरेण हतः। स व्याधो मुष्कदेशे हतः। तयोः पादास्फालनेन एकः सर्पोऽपि मृतः। अत्रान्तरे कश्चित् दीर्घरावो नामा लोलुपः श्रृगालः तत्रागच्छत्। तान् मृतान् मृगव्याधसर्पशूकरान् दृष्ट्वा व्यचिन्तयत्- अहो! भाग्यम्। अद्य महद्भोज्यं समुपस्थितम्। अतः प्रथमन्तु कोदण्डलग्नं स्नायुबन्धनमेव खादामि' इति निश्चित्य स स्नायुबन्धनं खादितुं प्रवृत्तः। ततश्छिन्ने स्नायुबन्धने द्रुतम् उत्पतितेन धनुषा हृदि निर्भिन्नः स मृतः। अत नीतिकारैरुक्तम्-

कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसःायः।

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## हस्ति-धूर्तशृगालयोः कथा

बृह्मारण्ये कर्पूरतिलको नाम हस्ती आसीत्। तं दृष्ट्वा सर्वे शृगालाश्चिन्तयन्ति स्म- 'यद्ययं केनाप्युपायेन म्रियते, तदास्माकं अस्य देहेन मासचतुष्ट्यं भोजनं भवेत्।' इत्याकर्ण्य एकेन वृद्धशृगालेन प्रतिज्ञा कृता- 'मम बुद्धिप्रभावादेव अस्य मरणं भविष्यति।' इत्युक्त्वा स कर्पूरतिलकस्य समीपं गत्वा साष्टाङ्गपातं प्रणम्य उवाच- देव! कृपां कुरु। करिणि पृष्टे सति स उवाच- सर्वैः वनवासिभिरहं भवत्सकाशं सम्प्रेषितः, यद् भवन्तं विना राज्यं व्यवस्थातुं न युक्तम्, अतः अटवीराज्ये अभिषेक्तुं भवान् निरूपितः। अतः शीघ्रं गच्छतु भवान्। कर्पूरतिलकोऽपि राज्यलोभवशात् चलितुमुद्यतोऽभूत्। शृगालदर्शितमार्गेण धावन् स महापङ्के निमग्नः। तदा तेनोक्तम् 'सखे शृगाल! किमधुना करणीयम्? शृगालेन विहस्य उक्तम् - मद्विधस्य धूर्तस्य वचसि त्वया विश्वासः कृतः, तस्य फलं भुज्यताम्। एवं स हस्ती पःात्वं गतः। अतो नीतिकारैरुक्तम्- यत् कार्यमुपायेन शक्यं तत् पराक्रमेण नैव कर्तुं शक्यते।

-

## मूषक-परिव्राजकयोः कथा

चम्पकाभिधानायां नगर्यां परिव्राजकानाम् आश्रमः आसीत्। तत्र चूडाकर्णो नामधेयः परिव्राजकः प्रतिवसति स्म। स भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्ते अवस्थाप्य तत्रैव स्वपिति स्म। हिरण्यकनामा मूषकश्च तदन्नम् उत्प्लुत्य उत्प्लुत्य भक्षयति स्म। एकदा तस्य प्रियसुहृद् वीणाकर्णस्तत्र समायातः। तेन कूर्दन् सन् मूषको दृष्टः। स व्यचिन्तयत्- स्वल्पबलोऽयं मूषकः कथमेतावद् दूरमुत्पतति? तदत्र केनाऽपि कारणेन भवितव्यम्। क्षणं विचिन्त्य वीणाकर्णेन उक्तम् - अत्र धनबाहुल्यमेव कारणं प्रतिभाति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# हितोपदेश-मित्रलाभः

## प्रस्ताविका-प्रथमो भागः

### मङ्गलाचरणम्

**सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः।**
**जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला॥1॥**

**प्रसङ्गः**-अत्र कविः सत्पुरुषाणां कार्यसिध्यर्थं भगवन्तं शिवं प्रार्थयति।

**अन्वयः**-यन्मूर्ध्नि शशिनः कला जाह्नवीफेनलेखा इव (शोभते) तस्य धूर्जटेः प्रसादात् सतां साध्ये सिद्धिःअस्तु।

**व्याख्या**-यस्य=भगवतः शिवस्य, मूर्ध्नि=मस्तके, शशिनः=निशानाथस्य, कला=षोडशो भागः, जाह्नवीफेनलेखा=जाह्नव्याः=गङ्गायाः, फेनस्य=जलकफस्य, लेखा=रेखा चिह्नं वा, इव=सदृशं(शोभते=विराजते) तस्य धूर्जटेः=भगवतो भूतनाथस्य, प्रसादात्=अनुकम्पातः, सताम्=सज्जनानाम्, साध्ये=स्वाभीष्टकर्मणि, सिद्धिः= सफलताप्राप्तिः, अस्तु=भवतु।

**सरलार्थः**-यस्य भगवतो महेश्वरस्य ललाटे निशानाथस्य कला भागीरथ्याः फेनचिह्नम् इव सुशोभते। एतादृशगुणोपेतस्य शिवस्यानुगृहेण सज्जनानामखिलकार्याणि सिध्यन्तु।

**व्याकरणम्-**

**समासः**-धूर्जटेः=धूः भारभूता जटिः यस्य सः, तस्य। जाह्नवीफेन-लेखा= जाह्नव्याः फेनः जाह्नवीफेनः तस्य लेखा। यन्मूर्ध्नि=यस्य मूर्धा यन्मूर्धा, तस्मिन्।

**सन्धिविच्छेदः**-प्रसादात्तस्य=प्रसादात्+तस्य, यन्मूर्ध्नि=यत्+मूर्ध्नि।

**प्रकृति प्रत्ययः**-सिद्धिः=सिध्+ क्तिन् (ति)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु।**
**वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च॥2॥**

**प्रसङ्गः**-अत्र ग्रन्थस्योपादेयतायाः वर्णनमस्ति।

**अन्वयः**-अयं हितोपदेशः श्रुतः (सन् ) संस्कृतोक्तिषु पाटवं (ददाति)। सर्वत्र वाचां वैचित्र्यं नीतिविद्यां च ददाति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या**-अयम्=एषः, हितोपदेशः=एतदाख्यो ग्रन्थविशेषः श्रुतः=अधीतः, (सन्=भवन्) संस्कृतोक्तिषु= संस्कृतस्य=गिर्वाणगिरः, उक्तिषु= सम्भाषणेषु, पाटवम् =चातुर्यम्, (ददाति=यच्छति) सर्वत्र=सर्वस्मिन् स्थाने व्यवहारे वा, वाचाम्= गिराम्, वैचित्र्यम्=वाक्कौशलम्, नीतिविद्याम्=राजनीतिशास्त्रज्ञानम्, च=तथा, ददाति= प्रयच्छति।

**सरलार्थः**-गुरुमुखाद् अधीत एव हितोपदेशग्रन्थः संस्कृतभाषाभाषणे पटुत्वं, सर्वविधप्रयोगव्यवहारेषु नैपुण्यं, नीतिशास्त्राणां ज्ञानञ्च सम्यक् प्रयच्छति।

**व्याकरणम् -**

**समासः**-हितोपदेशः=हितस्य उपदेशः। संस्कृतोक्तिषु=संस्कृतस्य उक्तयः संस्कृतोक्तयः, तासु। नीतिविद्याम्=नीत्याः विद्या नीतिविद्या, ताम् (नीयते लभ्यते स्वस्येप्सितम् अनया इति नीतिः)

**सन्धिविच्छेदः**-श्रुतोहितोपदेशोऽयम्=श्रुतः+हितोपदेशः+अयम्। संस्कृतोक्तिषु=संस्कृत+ उक्तिषु।

**प्रकृतिप्रत्ययः**- श्रुतः=श्रु+क्तः(त) उक्तिषु=वच्+क्तिन्(ति)+सुप्(सु)। सर्वत्र=सर्व+त्रल्(त्र) वैचित्र्यम्= विचित्र+ ष्यञ् (य)।

**छन्दः**- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।**
**गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥3॥**

**प्रसङ्गः**-अत्र विद्यायाः वैशिष्ट्यं वर्णितम्।

**अन्वयः**-प्राज्ञः अजरामरवत् विद्याम् अर्थं च चिन्तयेत्। मृत्युना केशेषु गृहीत इव धर्मम् आचरेत्॥

**व्याख्या**-प्राज्ञः=बुद्धिमान् पुरुषः, पण्डितो वा, अजरामरवत्=जरामरण-शून्यमिव, विद्याम्= शास्त्रकलादिज्ञानम्, अर्थञ्च=द्रव्यञ्च, चिन्तयेत्=विचारयेत्, मृत्युना=यमराजेन, केशेषु=मूर्धजेषु, कचेषु वा, गृहीतः=धृतः, इव=सदृशम्, धर्मं= पुण्यम्, आचरेत्=आचरणं कुर्यात्।

**सरलार्थः**-प्राज्ञो जनः आत्मानं जरामृत्युरहितं मत्वा शास्त्रज्ञानम् अर्थार्जनञ्च कुर्यात्। एवञ्च यमराजेन कचो गृहीत इत्यवगम्य धर्माचरणम् अनुष्ठेत्।

**व्याकरणम्-**

**समासः**-अजरामरवत्=न विद्यते जरा यस्य स अजरः, न म्रियते इति अमरः, अजरश्चासौ अमरश्च इति अजरामरम्, स इव इति। प्राज्ञः=प्रकर्षेण जानातीति प्राज्ञः, प्रज्ञ एव प्राज्ञः(स्वार्थेऽण् प्रत्ययः)

**सन्धिविच्छेदः**-अजरामरवत्=अजर+अमरवत्। धर्ममाचरेत्=धर्मम्+आचरेत्।

**प्रकृति प्रत्ययः**-प्राज्ञः=प्र+ज्ञा+क (अ) प्रज्ञ+अण् (अ)। गृहीतः=गृह्+ क्त(त)।

**छन्दः**- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।**
**अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा॥4॥**

**प्रसङ्गः**-अत्र सर्वद्रव्येषु विद्यैव श्रेष्ठतममस्तीति वर्णितम्।

**अन्वयः**-(विद्वांसः)सर्वदा अहार्यत्वात्, अनर्घत्वात्, अक्षयत्वाच्च सर्वद्रव्येषु विद्या एव अनुत्तमं द्रव्यम्(इति)आहुः।

**व्याख्याः**-विद्वांसः=पण्डिताः, सर्वदा=सदैव, अहार्यत्वात्= हर्तुमशक्यत्वात्, अनर्घत्वात्=मूल्येनापि लब्धुमशक्यत्वात्, अक्षयत्वात् च= अविनाशित्वाच्च, सर्वद्रव्येषु=अखिलवस्तुषु, विद्यैव=शास्त्रज्ञानमेव, अनुत्तमम्=श्रेष्ठतमम्, द्रव्यम्= पदार्थम्, इति=इत्येवम्, आहुः=वदन्ति कथयन्ति वा।

**सरलार्थः**-पण्डिताः सर्वद्रव्येषु विद्यैव श्रेष्ठतमं द्रव्यमस्तीति प्रतिपादितवन्तः। यतोहि विद्येयम् अहार्या, अनर्घा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अक्षया च भवति।

**व्याकरणम्-**

**समासः-**सर्वद्रव्येषु=सर्वाणि च द्रव्याणि सर्वद्रव्याणि तेषु। अहार्यत्वात्= हर्तुं योग्या हार्या, हार्या न भवतीति अहार्या, तस्याः भावः अहार्यत्वम्, तस्मात्। अनर्घत्वात्=नास्ति अर्घो मूल्यं यस्याः सा अनर्घा, तस्याः भावः अनर्घत्वम् तस्मात्। अक्षयत्वात्=नास्ति क्षयो नाशो यस्याः सा अक्षया, तस्याः भाव अक्षयत्वम्, तस्मात्।

**सन्धिविच्छेदः-**विद्यैव=विद्या+एव। अहार्यत्वादनर्घत्वादक्षयत्वाच्च= अहार्यत्वात्+ अनर्घत्वात्+ अक्षयत्वात्+च।

**प्रकृति प्रत्ययः-**विद्या=विद्+क्यप् (य)टाप्(आ)।सर्वदा=सर्व+दाच्(दा)।

**छन्दः-** अत्र अनुष्टुप् नाम वृत्तं वर्तते।

**संयोजयति विद्यैव नीचगापि नरं सरित्।**
**समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम्॥5॥**

**प्रसङ्गः-**विद्या सदैव पुरुषाणामुन्नतये सर्वविधं साहाय्यं करोति।

**अन्वयः-**नीचगा अपि सरित् दुर्धर्षं समुद्रम् इव (नीचगाऽपि) विद्या एव नरं नृपं संयोजयति। अतः(विद्या)परं भाग्यम्(उद्घाटयति)।

**व्याख्या-**नीचगा अपि=निम्नस्थानगामिन्यपि, सरित्=नदी, दुर्धर्षं=दुष्करं दुष्प्रापं वा, समुद्रं=रत्नाकरम्, इव=यथा, (नीचगा अपि=नीचजनगता अपि) विद्या= शास्त्रज्ञानम्, एव=नूनमेव, नरं=पुरुषम्, दुर्धर्षं=दुरतिक्रमं, दुष्प्रापं वा, नृपं=राजानम्, संयोजयति=परस्परं प्रापयति, अतः=अस्मात् कारणात्, विद्या=शास्त्रज्ञानम्, परं= ऊर्ध्वम्, भाग्यं=दैवम्(उद्घाटयति=संयोजयति)।

**सरलार्थः-**येन प्रकारेण निम्नगासरित् तृणकाष्ठादीनि वस्तूनि, दुष्प्रापे सागरे संयोजयति, तेनैव प्रकारेण नीचगा विद्या अपि तं पुरुषं महाराजानं प्रापयति। अत एव विद्या पुरुषाणां भाग्योद्घाटनं नूनमेव करोतीति।

**व्याकरणम्-**

**समासः-**नीचगा=नीचं गच्छतीति। दुर्धर्षं=दुःखेन घृष्यते इति दुर्धर्षः, तम्। नृपम्=नॄन् पातीति नृपः, तम्।

**सन्धिविच्छेदः-**विद्यैव=विद्या+एव। समुद्रमिव=समुद्रम्+इव।

**प्रकृति प्रत्ययः-**नरम्=नॄ अच् (अ)। नृपम्=नृ+पा+क(अ)। भाग्यम्= भज्+ण्यत् (य)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम्॥6॥**

**प्रसङ्गः-**लोके विद्यैव केवलं सर्वविधसुखस्य साधनमस्ति।

**अन्वयः-**विद्या विनयं ददाति, विनयात् पात्रतां याति, पात्रत्वात् धनम्आप्नोति, धनाद् धर्मं(करोति)ततः सुखम् (प्राप्नोति)।

**व्याख्याः-**विद्या-शास्त्रादिज्ञानम्, विनयम्=विनमृताम्, ददाति=यच्छति, विनयात्=नमृत्वात्, पात्रताम्=सज्जनताम्, याति=प्राप्नोति, पात्रत्वात्=योग्यत्वात्, धनम्=ऐश्वर्यादिकम्, आप्नोति=लभते, धनात्=अर्थतः, धर्मम्=धार्मिककृत्यम्, (करोति=सम्पादयति) ततः=धार्मिककृत्यानन्तरम्, सुखम्=सर्वविधानुकूलत्वम्, (प्राप्नोति=लभते)

**सरलार्थः-**इह लोके विद्या पुरुषेभ्यो विनयं ददाति, विनयात् सत्पात्रत्वमायाति, ततो धनं लभते, धनाद् धर्मो जायते, धर्माच्च सर्वविधसुखम् आयाति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्-**

**सन्धिविच्छेदः-**विनयाद्याति=विनयात्+याति।पात्रत्वाद्धनमाप्नोति= पात्रत्वात् +धनम् + आप्नोति।

**प्रकृति प्रत्ययः-**विनयम् = वि+नी+अक्(अ)। पात्रताम्=पा+ष्ट-न् (त्र) +तल् (त)। (तलन्तं स्त्रियाम्)। धर्मम्=धृ+मन्(म)। ततः=तत्+तसिल्(तस्)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**विद्या शस्त्रञ्च शास्त्रञ्च द्वे विद्ये प्रतिपत्तये।**
**आद्या हास्याय वृद्धत्वे द्वितीयाऽऽद्रियते सदा॥7॥**

**प्रसङ्गः-**अत्र शस्त्रशास्त्रयोः शास्त्रस्यैव प्राधान्यं स्वीकृतम्।

**अन्वयः-**शस्त्रं च शास्त्रं च विद्या (भवति) द्वे विद्ये प्रतिपत्तये (भवतः) आद्या वृद्धत्वे हास्याय (भवति), (अतः)द्वितीया सदा आद्रियते।

**व्याख्याः-**शस्त्रञ्च=खड्गादिशत्रुरक्षणसाधनः।, शास्त्रम्=वेदोपनिषदादिशास्त्रम्, च=इति द्वयम्, विद्या= ज्ञानसाधनम् ( भवति=जायते) द्वे=एते उभे, विद्ये= शस्त्रशास्त्रस्वरूपे, प्रतिपत्तये=स्वाभिलषितकार्यसिद्धये, (भवतः=स्तः) आद्या=प्रथमा-शस्त्ररूपाविद्या, वृद्धत्वे=वृद्धावस्थायाम्, हास्याय=उपहासाय (भवति= जायते) (अतः=एतदर्थम्) द्वितीया=अपराशास्त्रविद्या (वेदवेदाङ्गादीनां ज्ञानम्) सदा= सर्वस्मिन् काले, आद्रियते=प्रशस्यते।

**सरलार्थः-**इह जगति द्वे विद्ये सुविख्याते, एका शस्त्रविद्या, अपरा शास्त्र-विद्या, आभ्यामुभाभ्यां नरो यशो धनादिकः। च लभते, किन्तु शस्त्रविद्या वृद्धावस्थायामुपहासाय भवति, एवञ्च शास्त्रविद्या आजन्मनः सर्वविध सुखोपवस्तूनि प्रयच्छति अर्थात् सर्वदैव अनाहता तिष्ठतीति।

**व्याकरणम्-**

**सन्धि-विच्छेदः-**शस्त्रञ्च=शस्त्रम्+च। द्वितीयाऽऽद्रियते=द्वितीया+ आद्रियते।

**प्रकृति प्रत्ययः-**शस्त्रम् = शस् + ष्ट्-न (त्र)। शास्त्रम् = शास् + ष्ट्-न् (त्र)। हास्याय = हस् + ण्यत् (य)+ (ङे=य)। वृद्धत्वे=वृध्+क्त (त)+त्व (ङि)=(इ) वृद्धस्य भावः।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते॥8॥**

**प्रसङ्गः-**कविरत्र मनोरञ्जनपूर्णाभि र्नीतियुक्ताभिः कथाभिर्माध्यमेन उपदेशं यच्छति।

**अन्वयः-**यत् नवे भाजने लग्नः संस्कारः अन्यथा न भवेत् , तत् इह कथाच्छलेन बालानां (कृते) नीतिः(मया) कथ्यते।

**व्याख्याः-**यत्=यस्मात् कारणात्, नवे=नवीने, आर्द्रे वा, भाजने=पात्रे, (अपक्वमृत्पात्रादौ इत्यभिप्रायः) लग्नः=अङ्कितः, संस्कारः=रेखाचिह्नम्, अन्यथा= विपरीतः, न भवेत्=नैव स्यात्, तत्=तस्माद्धेतोः, इह=अस्मिन् हितोपदेशाख्ये गृन्थे, कथाच्छलेन=उपाख्यानव्याजेन, बालानां=आदौ संस्कृतभाषायां प्रवेशेच्छुकानाम् (कृते=अर्थम्) नीतिः=एष नीतिगृन्थः (मया=गृन्थकारेण) कथ्यते=उपदिश्यते।

**सरलार्थः-**यथा नूतने मृत्पात्रे घटे वा रेखादिचिह्नम् अग्निसंस्कारादारभ्य आभग्नकालं यावत् तिष्ठति तथैव आख्यानव्याजेनोपदिष्टा कथाऽपि आमरणपर्यन्तं तिष्ठति।

**व्याकरणम्-**

**समासः-**कथाच्छलेन=कथा एव छलं कथाच्छलम्, तेन।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धिविच्छेदः**-यन्नवे=यत् +नवे। नान्यथा=न+ अन्यथा, नीतिस्तदिह= नीतिः+तत्+ इह।

**प्रकृति प्रत्ययः**-भाजने=भाज्+ ल्युट् (अन) ङि(इ)। लग्नः=लग्+ क्त (त)। संस्कारः=सम्+कृ+घञ् (अ)। नीतिः=नी+क्तिन् (ति)।

**छन्दः**- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**मित्रलाभः सुहृद्भेदो विगृहः सन्धिरेव च।**
**पःातन्त्रात्तथाऽन्यस्माद् गून्थादाकृष्य लिख्यते॥9॥**

**प्रसङ्गः**-अत्र हितोपदेशस्य चतुर्णां प्रकरणानामुल्लेखो वर्तते।

**अन्वयः**-(मया) पःातन्त्रात् तथा अन्यस्मात् गून्थाद् आकृष्य मित्रलाभः, सुहृद्भेदः, विगृहः, सन्धिः, एव च लिख्यते।

**व्याख्याः**-मया=नारायणपण्डितेन, पञ्चतन्त्रात्=एतन्नामधेयाद्गून्थात्, तथा= अपि च, अन्यस्मात्=अपरस्मात्, गून्थात्=बृहत्कथामहाभारतादिनीतिगून्थात्, आकृष्य=संक्षिप्य, मित्रलाभः=मित्रस्यलाभः प्राप्तिर्वा, सुहृद्भेदः= मित्रबान्धवादीनां विरोधः, विगृहः=युद्धम्, सन्धिः=मेलनम्, एव च=तथा च, लिख्यते=विरच्यते।

**सरलार्थः**- सुविख्यातस्य पःातन्त्राख्यस्य गून्थस्य तथा नीतिविषयकाणामन्येषां गून्थानां सहयोगेन मित्रलाभसुहृद्भेदविगृह-सन्धिषु चतुर्षु प्रकरणेषु विभक्तेषु एष हितोपदेशाख्यः कथासङ्गृहो नारायणपण्डितेन विरच्यते।

**व्याकरणम्-**

**समासः**-मित्रलाभः=मित्रस्य लाभः प्राप्ति र्वा। सुहृद्भेदः=सुहृदो भेदः।

**सन्धिविच्छेदः**-सन्धिरेव=सन्धिः+एव। तथाऽन्यस्मात्=तथा+अन्यस्मात्। गून्थादाकृष्य=गून्थाद्+आकृष्य।

**प्रकृति प्रत्ययः**-भेदः=भिद्+घञ्(अ)। विगृहः=वि+गृह्+अप्। (अ)। आकृष्य=आङ्+कृष्+ल्यप्(य)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

## कथामुखम्

अस्ति भागीरथीतीरे पाटलीपुत्रनामधेयं नगरम्। तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत्। स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव।

**व्याख्या**- अस्ति = वर्तते, भागीरथीतीरे = भगीरथादागताभागीरथी = गङ्गा, तस्याः तीरे = तटे, पाटलीपुत्रनामधेयम् = पाटलीपुत्राख्यम् (सम्प्रति 'पटना' बिहार-प्रान्तस्य राजधानी इति नाम्ना प्रसिद्धम्) नगरम् = पुरम्। तत्र=पाटलीपुत्रे, सर्वस्वामिगुणोपेतः सर्वैः = अखिलैः, स्वामिगुणैः=प्रभुगुणैः, (शौर्य्यवीर्यादिभिः) उपेतः=युक्तः, सुदर्शनो नाम=सुदर्शननामधेयः, नरपतिः=भूपतिः, आसीत्=अभूत्। स भूपतिः पूर्वोक्तगुणोपेतो राजा, एकदा=एकस्मिन् काले, केनापि=कश्चिद् अपरिचितेन, पठ्यमानम्=अधीयमानम्, श्लोकद्वयम्=पद्यद्वयम्, शुश्राव=आकर्णयामास।

**व्याकरणम् -**

**समासः**-भागीरथीतीरे=भागीरथ्याः तीरे। सर्वस्वामिगुणोपेतः=स्वं धनम् अस्तीति स्वामी, स्वामिनो गुणाः स्वामिगुणाः, सर्वे च ते स्वामिगुणाः सर्वस्वामिगुणाः, तैः उपेतः। नरपतिः=पाति रक्षतीति पतिः, नराणां पतिः। सुदर्शनः=सुष्ठुदर्शनं यस्य सः।

**सन्धिविच्छेदः**-नरपतिरासीत्=नरपतिः+आसीत्। केनापि=केन+अपि।

**प्रकृति प्रत्ययः**-सुदर्शनः=सु+दृश्+ल्युट् (अन)। उपेतः=उप+इ+क्त (त) पठ्यमानम्=पठ्+शानच् (आन) मुगागमश्च।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥10॥**

**प्रसङ्गः-**परोक्षार्थस्य दर्शकं शास्त्रलोचनमिन्द्रियलोचनापेक्षया श्रेष्ठतरं वर्तते।

**अन्वयः-**अनेकसंशयोच्छेदि, परोक्षार्थस्य दर्शकं शास्त्रं सर्वस्य लोचनं (भवति) तत् यस्य नास्ति, स अन्ध एव।

**व्याख्याः-**अनेकसंशयोच्छेदि=अनेकसंशयानाम्=बहुविधसन्देहानाम् उच्छेदि =निवर्तकम्, परोक्षार्थस्य= भूतभविष्यदर्थस्य, दर्शकं=ज्ञापकं बोधकं वा, शास्त्रम्= वेदवेदाङ्गादिकम्, सर्वस्य=समस्तलोकस्य, लोचनम्=अपरं नेत्रम्, (भवति=जायते) (तत्=शास्त्ररूपिणं लोचनम्) यस्य=पुंसः प्राणिनो वा, नास्ति=न विद्यते, सः=तज्जनः, अन्ध एव=लोचनरहित एव (ज्ञेयः)।

**सरलार्थः-**नानासंदेहनिवारकं, परोक्षार्थदर्शकं शास्त्रमेव वस्तुतो लोचनमस्ति, अत एव लोके यः पुरुषः शास्त्रज्ञानशून्यो भवति, स एव अन्धो भवति, न तु चक्षुरोगपीडितः।

**व्याकरणम्-**

**समासः-**अनेकसंशयोच्छेदि=न एके अनेके, अनेके च ते संशयाः अनेकसंशयाः, अनेकसंशयानाम् उच्छेदि। परोक्षार्थस्य=अक्षिभ्यां परः इति परोक्षः, परोक्षश्चासौ अर्थश्च परोक्षार्थः, तस्य।

**सन्धिः-**परोक्षार्थस्य=परोक्ष+अर्थस्य। नास्त्यन्ध एव=नास्ति+अन्धः+एव।

**प्रकृति प्रत्ययः-**दर्शकम्=दृश्+ण्वुल् (अक)। लोचनम्=लोच्+ ल्युट् (अन)। शास्त्रम्=शास्+ष्ट्-न् (त्र)। अन्धः=अन्ध्+अच् (अ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥11॥**

**प्रसङ्गः-**इह लोके जायमानानामनर्थानां कारणानि अत्र परिगणितानि।

**अन्वयः-**यौवनं, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता, (एषु) एकैकम् अपि अनर्थाय (भवति) यत्र चतुष्टयं (तत्र) किमु।

**व्याख्या-**यौवनम्=यूनो भावो यौवनम्, युवावस्था, धनसम्पत्तिः= द्रव्याधिक्यम्, प्रभुत्त्वम्=प्रभोर्भावःप्रभुत्वम्, स्वामित्वम्, आधिपत्यं वा, अविवेकिता= तथ्यातथ्यविचारशून्यता, (एषु=एषां मध्ये) एकैकमपि=प्रत्येकमपि, अनर्थाय= अकल्याणाय, (भवति=जायते) यत्र=यस्मिन् पुरुषे, चतुष्टयं=पूर्वोक्तानि चत्वारि वर्तन्ते, (तत्र=तस्मिन् प्राणिनि) किमु=का कथा, किं वक्तव्यं वेति।

**सरलार्थः-**नवयौवनं, प्रचुरं धनम्, आधिपत्यं, सदसद्विचारशून्यत्वं च प्राणिनामनर्थाय प्रत्येकं प्रभुरस्ति। यत्र इमानि चत्वारि युगपद् उपस्थितानि भविष्यन्ति तत्र का स्थितिर्भविष्यतीति (अनिर्वाच्येति भावः)।

**व्याकरणम्-**

**समासः-**धनसम्पतिः=धनस्य सम्पत्तिः। अविवेकिता=विवेकस्य भावो विवेकिता, न विवेकितेति। अनर्थाय=अर्थो न भवतीति अनर्थः, तस्मै।

**सन्धिविच्छेदः-**एकैकमप्यनर्थाय=एक+एकम्+अपि+अनर्थाय।

**प्रकृति प्रत्ययः-**यौवनम्=युवन्+अण्(अ)। सम्पत्तिः=सम्पत्+क्तिन्(ति)। प्रभुत्वम्=प्रभु+त्व। यत्र=यद्+त्रल् (त्र)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

इत्याकर्ण्याऽऽत्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्रा-ऽनुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास।

**व्याख्या-** इति = पूर्वोक्तपद्यद्वयम्, आकर्ण्य=श्रुत्वा, आत्मनः=स्वस्य, पुत्राणाम्=तनयानाम्, (पुंनाम नरकात् त्रायते इति पुत्राः, तेषाम्) अनधिगत-शास्त्राणाम् = शास्त्राध्ययनरहितानाम्, नित्यम्=सर्वदैव, उन्मार्गगामिनाम्= दुर्व्यसनासक्तानाम्, शास्त्राऽनुष्ठानेन=शास्त्रस्य=वेदादिशास्त्रस्य, अननुष्ठानेन= अनभ्यासेन, उद्विग्नमनाः= व्याकुलचेताः, स राजा=पूर्वोक्तः सुदर्शननामधेयो नृपः, चिन्तयामास= विचारयामास।

**व्याकरणम्-**

**समासः-**अनधिगतशास्त्राणाम्=अधिगतं शास्त्रं यैः ते अधिगतशास्त्राः, अधिगतशास्त्राः न भवन्ति ते अनधिगतशास्त्राः, तेषाम् । उन्मार्गगामिनाम्= उन्मार्गेण गच्छन्तीति उन्मार्गगामिनः, तेषाम्। उद्विग्नमनाः=उद्विग्नं व्याकुलितं मनो यस्य सः । शास्त्राऽननुष्ठानेन=अनुष्ठीयते इति अनुष्ठानम्, अनुष्ठानं न भवतीति अननुष्ठानम्, शास्त्राणाम् अननुष्ठानं शास्त्राऽननुष्ठानम्, तेन।

**सन्धिविच्छेदः-**इत्याकर्ण्यात्मनः=इति+आकर्ण्य+आत्मनः। शास्त्राऽननुष्ठानेनोद्विग्नमनाः=शास्त्र+अननुष्ठानेन + उद्विग्नमनाः।

**प्रकृति प्रत्ययः-**आकर्ण्य=आङ्+कर्ण्+ ल्यप् (य)। अधिगतः=अधि+ गम्+क्त (त)। उद्विग्नम्=उद्+विज्+ क्त् (त)।

> **कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः।**
> **काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम्॥**12॥

**प्रसङ्गः-**अत्र राज्ञः सुदर्शनस्यात्मनः पुत्राणां विषये उत्पन्नायाः चिन्तायाः वर्णनं विद्यते।

**अन्वयः-**यः न विद्वान् न धार्मिकः ( अस्ति, तेन ) पुत्रेण जातेन कः अर्थः? काणेन चक्षुषा किं वा (फलं जायते) केवलं चक्षुः पीडा एव (भवति)।

**व्याख्या-**यः=यत्पुत्रः, न विद्वान्=न पण्डितो भवति, न धार्मिकः=नैव धर्माचरणशीलः, ( अस्ति=वर्तते) (तेन=तादृशेन) पुत्रेण=सुतेन, जातेन=उत्पन्नेन, कः अर्थः=को लाभः, (अर्थात् धर्मार्थकाममोक्षेषु पुरुषार्थचतुष्टयेषु कश्चिदपि पुरुषार्थो नैव सिध्यति) काणेन=दर्शनसामर्थ्यहीनेन, चक्षुषा=लोचनेन, किं वा=किं प्रयोजनं सिध्यति (फलं जायते=फलोत्पत्तिर्भवति) केवलम्=एकमात्रम्, चक्षुः पीडा एव=नेत्रपीडा कारकमेव, भवति=जायते।

**सरलार्थः-**यः पुत्रो न विद्वान् अस्ति न च धार्मिकोऽस्ति, एतादृशेन पुत्रेण को लाभः? लोके यथा अक्ष्णाकाणः पुरुषः केवलं नेत्रपीडामनुभवति, दर्शनादिकं किमपि फलं न प्राप्नोति, तथैव मूर्खेण सुतेन केवलं दुःखमेव जायते न तु सुखं लभते।

**व्याकरणम्-**

**सन्धि विच्छेदः-**कोऽर्थः=कः+अर्थः। पीडैव=पीडा+एव।

**प्रकृति प्रत्ययः-**जातेन=जन्+क्त (त)+टा=(इन)। विद्वान्=विद्+क्वसु (वस्)। धार्मिकः=धर्म+ठक् (इक) आद्यच् वृद्धिः।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

> **अज्ञातमृतमूर्खाणां वरमाद्यौ न चान्तिमः।**
> **सकृद् दुःखकरावाद्यावन्तिमस्तु पदे-पदे॥**13॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः-**लोके मृतपुत्रापेक्षया मूर्खपुत्रः कष्टदायको भवति।

**अन्वयः-**अजातमृतमूर्खाणाम् आद्यौ वरम् अन्तिमः च न वरम्। (हि) आद्यौ सकृत् दुःखकरौ, अन्तिमः तु पदे-पदे (दुःखकरः)।

**व्याख्या-**अजातमृतमूर्खाणाम्=अजातः=अनुत्पन्नः, मृतः=उत्पद्यनिधनं गतः, मूर्खः=विद्याशून्यः, (एषां मध्ये) आद्यौ=प्रथमोक्तौ अजातमृतौ, वरम्=श्रेष्ठौ स्तः। अन्तिमश्च=जडस्तु, न वरम्=श्रेष्ठो न भवति ( हि=यतोहि) आद्यौ= अजातमृतौ, सकृद्दुःखकरौ=एकधैवदुःखजनकौ, अन्तिमस्तु=मूर्खपुत्रस्तु, पदे-पदे= बारम्बारम्, दुःखकरः=पीडाजनको भवति।

**सरलार्थः-**अनुत्पन्नसद्योजातमृतमूर्खेष्वपत्येषु प्रथमोक्तौ द्वौ ईषद्वरौ स्तः, तृतीयपदे स्थितस्य मूर्खपुत्रस्य भवनमाजन्मनः कष्टदायकं भवति। अत एव शास्त्राध्ययने पुत्रमवश्यं योजयेत्।

**व्याकरणम्-**

**समासः-**अजातमृतमूर्खाणाम्=न जातः अजातः, अजातश्च मृतश्च मूर्खश्च अजातमृतमूर्खाः, तेषाम्। दुःखकरौ=दुःखं करोतीति दुःखकरः, तौ।

**सन्धिविच्छेदः-**चान्तिमः=च+अन्तिमः। सकृद्दुःखकरावाद्यावान्तिमस्तु= सकृत्+दुःखकरौ+ आद्यौ+ अन्तिमः+तु।

**प्रकृति प्रत्ययः-**अजातः=न+जन्+क्त(त)। मृतः=मृञ्+क्त(त)। वरम्= वृ+अप् (अ)।

**छन्दः-**अत्र अनुष्टुप् नाम वृत्तं वर्तते।

**वरं गर्भस्रावो वरमपि च नैवाभिगमनं,**
**वरं जातः प्रेतो वरमपि च कन्याऽवजनिता।**
**वरं वन्ध्या भार्या वरमपि च गर्भेषु वसति-**
**र्न वाऽविद्वान् रूपद्रविणगणयुक्तोऽपि तनयः॥14॥**

**प्रसङ्गः-**लोके विद्या शून्यस्य पुत्रस्य स्थितिरतीव चिन्तनीया वर्तते इति वर्णितम्।

**अन्वयः-**गर्भस्रावः वरम्, न एव अभिगमनम्, अपि च वरम्, जातः प्रेतः वरम्, अवजनिता कन्या अपि च वरम्, वन्ध्या भार्या वरम्, गर्भेषु वसतिः अपि च वरम्, (किन्तु) रूपद्रविणगणयुक्त अपि अविद्वान् तनयः न वा वरम्।

**व्याख्या-**गर्भस्रावः=गर्भस्य स्रावः, गर्भपातो वा, वरम्=ईषत् प्रियम्, न एव अभिगमनम्=ऋतुमत्या भार्यया सह सम्भोगकरणम्, अपि च वरम्=श्रेष्ठोऽस्ति, जातः=उत्पन्नोऽपि, प्रेतः=दिवंगतश्चेत्, वरम्=श्रेष्ठम्। अवजनिता=उत्पन्ना, कन्या= दुहिता, अपि च वरम्=श्रेष्ठम्। वन्ध्या=अप्रसूता, भार्या=जायाअपि, वरम्=श्रेष्ठा। गर्भेषु=कुक्षिषु, वसतिः=स्थितिः अपि च वरम्=श्रेष्ठमस्ति। वा=किन्तु, रूपद्रविणगणयुक्तः सौन्दर्यधनराशिसम्पन्नः, अपि=निश्चयेन, अविद्वान्=अपण्डितो जडो वा, तनयः=सुतः, न वरम्=श्रेष्ठो नास्तीति।

**सरलार्थः-**सौन्दर्यधनसम्पन्नोऽपि जडः पुत्रः श्रेष्ठो न भवति, तदपेक्षया गर्भपातः श्रेयोऽस्ति। ऋतुकाले भार्यामभिगमनःापि युक्तम्। मूर्खपुत्रस्य जनिकाले एव मृत्युः वरम्, कन्योत्पत्तिरपि वरम्, अप्रसूता भार्या अपि वरम्, किन्तु मूर्खपुत्रस्योत्पत्तिर्न वरमस्ति। अर्थात् सर्वतोभावेन मूर्खपुत्रस्य भवनमकल्याणकरमेवास्ति।

**व्याकरणम्-**

**समासः-**गर्भस्रावः=गर्भस्य स्रावः। रूपद्रविणगणयुक्तः=रूपं च द्रविणं च रूपद्रविणे, रूपद्रविणयोः गणः रूपद्रविणगणः तेन युक्तः।

**सन्धिविच्छेदः-**नैवाभिगमनम् = न + एव+ अभिगमनम् । कन्याऽवजनिता = कन्या + अवजनिता।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वसतिर्न=वसतिः+न।

**प्रकृति प्रत्ययः-**अभिगमनम्=अभि+गम्+ल्युट् (अन)। जातः=जन्+क्त (त)। प्रेतः=प्र+इ+क्त (त)। अवजनिता=अव+ जन्+णिच् (इ)+क्त(त)+टाप् (आ)। वसतिः=वस्+अति। युक्तः= युज्+क्त(त)।

**छन्दः-** अत्र शिखरिणीनामवृत्तं वर्तते।

**लक्षणम्-**रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

**स जातो येन जातेन याति वंशः समुन्नतिम्।**
**परिवर्तिनि संसारे मृतः को वा न जायते॥15॥**

**प्रसङ्गः-**इह लोके तस्यैव पुरुषस्य जन्म सार्थको वर्तते, यज्जन्मना वंशो यशः प्राप्नुयात्।

**अन्वयः-**येन जातेन वंशः समुन्नतिं याति स जातः, परिवर्तिनि संसारे मृतः को वा न जायते।

**व्याख्या-**येन=यत्पुत्रेण, जातेन=समुत्पन्नेन, वंशः=कुलम्, समुन्नतिम्= सम्यक् ख्यातिम्, याति=प्राप्नोति, सः=तादृशः, जातः=उत्पन्नः(अर्थात् नूनमेव स एव सफलजन्मा भवति) परिवर्तिनि = परिवर्तनशीले, संसारे = जगति, मृतः = मृत्युमुखमुपगतः, को वा न जायते = कोऽसौ प्राणी यो न उत्पद्यते।

**सरलार्थः-**अस्मिन् जगति तस्यैव जन्मसफलमस्ति, यज्जन्मना वंशः कीर्तिः प्राप्नोति, अन्यथा परिवर्तिनि अस्मिन् जगति बहवो जनाः प्रतिदिनं जायन्ते, नश्यन्ति च, किन्तु लोकः तेषां नामान्यपि न जानाति।

**व्याकरणम्-**

**समासः-**समुन्नतिम्=सम्यग् उन्नतिः समुन्नतिः, तम्। परिवर्तिनि-परिवर्तते प्रतिक्षणमिति परिवर्ती, तस्मिन्।

**सन्धि विच्छेदः-**स जातो येन=सः+ जातः+ येन। को वा=कः+वा।

**प्रकृति प्रत्ययः-**जातः=जन्+क्त(त)। समुन्नतिम्=सम् उत्+नम्+क्तिन् (ति)। संसारे=सम्+सृ+घञ्(अ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च- **गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य।**
**तेनाम्बा यदि सुतिनी, वद बन्ध्या कीदृशी भवति॥16॥**

**प्रसङ्गः-**अत्र विद्याविहीनस्य पुत्रस्य वर्णनं वर्तते।

**अन्वयः-**गुणिगणगणनारम्भे ससम्भ्रमात् यस्य कठिनी न पतति, तेन अम्बा यदि सुतिनी (भवति)(तर्हि) वन्ध्या कीदृशी भवति (इति) वद।

**व्याख्या-**अन्यत् च=अपि च गुणिगणगणनारम्भे=गुणिनाम्=पण्डितानाम्, गणाः=समुदायाः तेषां गणना=संख्यानम्, तस्याः आरम्भे=तस्य प्रारम्भकाले, ससम्भ्रमात्=सगौरवात्, यस्य=यन्नरस्य पुत्रस्य वा, कठिनी=लेखसाधिका, सुधाखण्डं वा, न पतति=वर्णादिलेखनार्थं झटिति न प्रवर्तते, तेन=गुणरहितेन सुतेन, यदि=चेत्, अम्बा=जननी, सुतिनी=पुत्रवती, कीदृशी=किं विधा, भवति=जायते, (इति) वद= कथय ब्रूहि वा।

**सरलार्थः-**विदुषां गणनाप्रसङ्गे यस्य पुरुषस्य गणना प्रथमायां पङ्क्तौ न भवति, एतादृशेन पुत्रेण माता यदि पुत्रवती भवेदिति तर्हि वन्ध्या का भविष्यति? अर्थात् पण्डितानां मध्ये यस्य वैदुष्यं शोभते स एव पुरुषः पुत्रो वा सफलजन्मा भवति न तु विद्याशून्यो मूर्खः।

**व्याकरणम्-**

**समासः-**गुणिगणगणनारम्भे=गुणिनां गणः गुणिगणः तस्य गणना गुणिगणगणना, तस्याः आरम्भः , गुणिगणगणनारम्भः , तस्मिन्। ससम्भ्रमात्= सम्भ्रमेण सहितं ससम्भ्रमम्, तस्मात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धिविच्छेदः-**अन्यच्च=अन्यत्+ च। तेनाम्बा=तेन+अम्बा

**प्रकृति प्रत्ययः-**गणना=गण्+णिच्(इ)युच्(अन)+आप्=(आ)। आरम्भे =आङ्+रभ्+घञ्(अ)मुम् (म्) ङि (इ)। सुतिनी=सुतिन्+ ङीप् (ई)।

**छन्दः-** अत्र आर्यानामवृत्तं वर्तते।

**दाने तपसि शौर्ये च यस्य न प्रथितं मनः।**
**विद्यायामर्थलाभे च मातुरुच्चार एव सः॥17॥**

**प्रसङ्गः-**अत्र दान तपशौर्यादिहीनस्य पुत्रस्य स्वरूपं प्रदर्शितम्।

**अन्वयः-**यस्य मनः दाने, तपसि, शौर्ये च विद्यायाम् अर्थलाभे च न प्रथितम्, स मातुरुचार एव।

**व्याख्याः-**यस्य=पुरुषस्य पुत्रस्य वा, मनः=चित्तम्, दाने=सत्पात्रेषु धनादिप्रदाने, तपसि=तपस्चरणे शौर्ये च=वीरोचिते कार्ये च, विद्यायाम्=विद्योपार्जने, अर्थलाभे च=धनोपार्जने च, न प्रथितम्=नैव विख्यातम्, सः=पुरुषः पुत्रो वा, मातुः= स्वाम्बायाः, उच्चारः=पुरीषः, एव=केवलम्। (उच्चारावस्करौ शमलं शकृद् इत्यमरः)।

**सरलार्थः-**लोके यस्य पुरुषस्य पुत्रस्य वा चित्तं परोद्देश्येन त्याग, तपश्चरणे, शौर्य्ये, ज्ञानार्जने, अर्थोपार्जने च नैव प्रसिद्धम्, स स्वजनन्याः पुरीषतुल्यो निरर्थको भवति।

**व्याकरणम्-**

**समासः-**अर्थलाभे=अर्थस्य लाभः अर्थलाभः, तस्मिन्।

**सन्धि विच्छेदः-**मातुरुच्चार एव=मातुः+उच्चारः+एव।

**प्रकृति प्रत्ययः-**शौर्ये=शूर+ ष्यञ्(य)+ङि (इ)। प्रथितम्=प्रथ्+क्त(त)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**
**एकश्चन्द्रस्तमो हन्ति, न च तारागणैरपि॥18॥**

**प्रसङ्गः-**इह लोकेऽनेकेषां पुत्राणामपेक्षया, एको गुणवान् पुत्र एव वरं मन्यते।

**अन्वयः-**एकः गुणी पुत्रः वरम्, मूर्खशतानि अपि च न वरम्। एकः चन्द्रः तमः हन्ति, तारागणैः अपि च न (तमः) हन्ति ।

**व्याख्या-**एकः=एकाकी, एक संख्याको वा, गुणी=गुणसम्पन्नः पुत्रः=सुतः, वरम्=श्रेष्ठः, मूर्खशतानि=मूर्खपुत्राणां शतसंख्याकानि, अपि च न वरम्=नैवश्रेष्ठं भवति, एकः=एकाकी चन्द्रः= रजनीपतिः तमः=अन्धकारं, हन्ति=नाशयति, तारागणैः =नक्षत्राणां समूहैः, अपि च न=तथा नैव, (तमः= ध्वान्तम्) हन्ति= विनाशे समर्थो भवति।

**सरलार्थः-**अस्मिन् संसारे तमोऽपाकर्तुमेकाकी चन्द्र एव समर्थोऽस्ति, न चाखिलानि नक्षत्राणि, एवमेव एको गुणवान् पुत्रः कुलस्य यशोवर्द्धनाय प्रभुरस्ति, न तु असंख्याकाः मूर्खपुत्राः।

**व्याकरणम्-**

**समासः-**मूर्खशतैः=मूर्खाणां शतानि मूर्खशतानि, तैः। तारागणैः=ताराणां गणाः तारागणाः, तैः।

**सन्धि विच्छेदः-**वरमेको गुणीपुत्रः=वरम्+एकः+गुणीपुत्रः। मूर्खशतान्यपि= मूर्खशतानि+अपि। एकश्चन्द्रस्त मोहन्ति=एकः+चन्द्रः+तमः+हन्ति। तारागणैरपि= तारागणैः+अपि।

**प्रकृति प्रत्ययः-**गुणी=गुण+इनि(इन्)। वरम्=वृ+अप्(अ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम्।**
**तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकःसुधीः॥19॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**-पूर्वकाले विहितानां पुण्यकर्मणां परिणामतः एव सत्पुत्राणां प्राप्तिर्भवति।

**अन्वयः**-येन क्वापि पुण्यतीर्थे अतिदुष्करं तपः कृतम्। तस्य पुत्रः वश्यः, समृद्धः, धार्मिकः, सुधी च जायते।

**व्याख्या**-येन=पुरुषेन, क्वापि=कुत्रापि, पुण्यतीर्थे=पवित्रतीर्थस्थले, अति- दुष्करम्=अतीव कठिनम्, तपः=धर्मानुष्ठानम्, कृतम्=अनुष्ठितम्, तस्य=तपस्विनः पुरुषस्य, पुत्रः=सुतः, वश्यः=जनकस्याज्ञापालकः, समृद्धः=धनादियुक्तः, धार्मिकः= यज्ञदानादिधर्मानुष्ठानपरायणः, सुधीः=पण्डितः(च) भवेत्=स्यादिति।

**सरलार्थः**-यः पुरुषः कस्मिन्नपि तीर्थस्थले अतिकठिनं तपश्चरति तस्यैव पुत्रः आज्ञाकारी, समृद्धः, धार्मिको विद्वान् च भवति।

**व्याकरणम्-**

**समासः**-पुण्यतीर्थे=पुण्यं च तत् तीर्थं च पुण्यतीर्थं, तस्मिन्। अतिदुष्करम्= अतिदुःखेन क्रियते यत् तत्। सुधीः=शोभना धीर्यस्य सः।

**सन्धि विच्छेदः**-क्वाप्यतिदुष्करम्=क्व+अपि+अतिदुष्करम्। पुत्रो भवेद् वश्यः=पुत्रः+भवेत्+वश्यः।

**प्रकृति प्रत्ययः**-कृतम् (डुकृञ्) कृ+क्त (त)। दुष्करम्= दुस्+कृ+अप् (अ)। वश्यः=वश्+ यत्(य)।

**छन्दः**- अत्र अनुष्टुप् नामवृतं वर्तते।

**अर्थागमो नित्यमरोगिता च,**
**प्रिया च भार्या प्रियवादिनी च।**
**वश्यश्च पुत्रोऽर्थकरी च विद्या,**
**षड् जीवलोकेषु सुखानि राजन्॥20॥**

**प्रसङ्गः**-अस्मिन् जगति षड्वस्तूनि सुखप्रदायकानि सन्ति।

**अन्वयः**-(हे) राजन् जीवलोकेषु षट् सुखानि (सन्ति) नित्यम् अर्थागमः, अरोगिता च, प्रिया च, प्रियवादिनी भार्या च, वश्यः पुत्रः च अर्थकरी विद्या च।

**व्याख्या**-हे राजन्=हे प्रभो! जीवलोकेषु=प्राणीनां निवासस्थानेषु, षट्=षट् संख्याकानि, सुखानि=सुखोत्पादकानि वस्तूनि सन्ति, नित्यम्=सर्वस्मिन् काले, अर्थागमः =धनलाभः, अरोगिता च=रोगाभावश्च। प्रिया च=प्रीतिकरी च, प्रियवादिनी च भार्या=मधुरभाषिणी च पत्नी, वश्यः=आज्ञापालकः, पुत्रश्च=तनयश्च, अर्थकरी= अर्थप्रदायिनी, विद्या च=शास्त्रज्ञानञ्च।

**सरलार्थः**-अस्मिन् जीवलोके मनुष्याणां कृते इमानि षड् वस्तूनि सुखप्रदायकानि सन्ति। तद्यथा-सर्वस्मिन् समये धनप्राप्तिः, नित्यं शारीरिकं स्वास्थ्यम्, प्रीतिकरी भार्या, मधुरालापिनी पत्नी, आज्ञापालकः पुत्रः, पुरुषार्थचतुष्टय प्रदायिनी शिक्षेति। एभ्यः षट्सुखेभ्यः पृथग् यो जनोऽस्ति तस्य जीवनं तु नूनमेव दुःखकरं भवति।

**व्याकरणम्-**

**समासः**-अर्थागमः=अर्थस्य आगमः। अरोगिता=रोगस्य भावो रोगिता न रोगिता अरोगिता। प्रियवादिनी=प्रियं वदतीति सा। अर्थकरी=अर्थं (पुरुषार्थं) करोतीति। जीवलोकेषु=जीवानां प्राणिनां लोकाः जीवलोकाः, तेषु।

**सन्धिविच्छेदः**-चोक्तम्=च+उक्तम्। वश्यश्च=वश्यः+च। पुत्रोऽर्थकरी= पुत्रः+अर्थकरी।

**प्रकृति प्रत्ययः**-प्रिया=प्री+क(अ)+टाप्(आ)। वादिनी=वद्+णिनि इन्+ ङीप्(ई)। वश्यः=वश्+यत्(य)।

**छन्दः**- अत्र उपजातिनामवृत्तं वर्तते।

**को धन्यो बहुभिःपुत्रैः कुशूलाऽऽपूरणाढकैः।**
**वरमेकः कुलालम्बी यत्र विश्रूयते पिता॥21॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**-अनेक मूर्खपुत्रापेक्षया एको यशस्वी प्राज्ञश्च पुत्रः श्रेयस्करो भवति।

**अन्वयः**-कुशूलापूरणाढकैः बहुभिः पुत्रैः कः धन्यः(भवति), यत्र पिता विश्रूयते (तादृशः) कुलालम्बी एकः (पुत्रः) वरम् (भवति)।

**व्याख्या**- कुशूलापूरणाढकैः = तुषपूर्णधान्यपात्रैः, बहुभिः = अनेकैः, नानाभिर्वा। पुत्रैः=सुतैः, कः=कः पुरुषः, धन्यः=कृतकृत्यः (भवति=जायते) यत्र= यस्मिन् पुत्रे (येन सुतेनेत्यर्थः) पिता=जनकः, विश्रूयते=लोके विख्यातो भवति, तादृशः =पूर्वोक्तगुणयुक्तः, कुलालम्बी=वंशाभ्युदयकारकः, एकः=एकाकी, (पुत्रः=तनयः) वरम्=श्रेष्ठोऽस्ति

**सरलार्थः**-इहलोके तुषपूर्णधान्यपात्रैरिव अनेकैः पुत्रैरपि कश्चित् पुरुषः सुखी न भवति, किन्तु यस्य एक एव पुत्रो वंशोन्नतिकारको जायते, तदा पितुः कीर्तिः सर्वत्र प्रसरति।

**व्याकरणम्**-

**समासः**- कुशूलापूरणाढकै ः=कुशन्ति इति कुशूलाः, तैः कुशूलैः आसमन्तात् पूरणा इति कुशूलाऽऽपूरणाः, कुशूलाऽऽपूरणाश्च ते आढकाश्च कुशूलाऽऽपूरणाढकाः, तैः। कुलालम्बी=कुलं वंशम् आलम्बते इति कुलालम्बी।

**सन्धिविच्छेदः**-को धन्यो बहुभिः=कः+धन्यः+बहुभिः। कुशूलापूरणाढकैः=कुशूल+आपूरण+आढकैः।

**प्रकृति प्रत्ययः**-आढकैः=आ+ढौकृ+अच्+भिस्(ऐस्)। पिता=पा+तृच्(तृ)।

**छन्दः**- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।**
**भार्या रूपवती शत्रुः पुत्रःशत्रुरपण्डितः॥22॥**

**प्रसङ्गः**-अत्र गृहे विद्यमानानां चतुर्णां शत्रूणां वर्णनं वर्तते।

**अन्वयः**-ऋणकर्ता पिता शत्रुः(भवति) व्यभिचारिणी माता च (शत्रुर्भवति) रूपवती भार्या च (शत्रुर्भवति) अपण्डितः पुत्रः च शत्रुः(भवति)।

**व्याख्या**-ऋणकर्ता=अधमर्णः, ऋणगृहणकर्ता वा, पिता=जनकः, शत्रुः= रिपुतुल्यः(भवति=जायते) व्यभिचारिणी=परपुरुषेण सहगामिनी, माता च=जननी च, (शत्रुतुल्या भवति) रूपवती=सौन्दर्यशालिनी, भार्या च=पत्नी च (शत्रुवत् भवति) अपण्डितः=शास्त्रज्ञानशून्यः, पुत्रश्च=सुतश्च, शत्रुः=रिपुः, भवति=जायते।

**सरलार्थः**-अस्मिन् संसारे अधमर्णः (ऋणकर्ता) पिता शत्रुवद् भवति, परपुरुषगामिनी जननी अपि शत्रुतुल्या भवति, लावण्यमयी भार्या अपि रिपुवद् भवति, एवञ्च मूर्खपुत्रोऽपि शत्रुसमो मन्यते।

**व्याकरणम्**

**समासः**-ऋणकर्ता=ऋणस्य कर्ता। व्यभिचारिणी=व्यभिचारं करोतीति। रूपवती=रूपं स्वरूपमस्ति अस्या इति।

**सन्धि विच्छेदः**-शत्रुर्माता=शत्रुः+माता। व्यभिचारिणी=वि+अभिचारिणी।

**प्रकृति प्रत्ययः**-रूपवती=रूप+मतुप्+ङीप् (ई)।

**छन्दः**- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**यस्य कस्य प्रसूतोऽपि गुणवान् पूज्यते नरः।**
**धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति॥23॥**

**प्रसङ्गः**-अस्मिन् लोके केवलं गुणवान् एव सर्वत्र आद्रियते, न तु विद्याविहीनः।

**अन्वयः**-गुणवान् नरः यस्य कस्य प्रसूतः अपि (लोकैः) पूज्यते, वंशविशुद्धःअपि धनुः (चेत्) निर्गुणः(तदा) किं करिष्यति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या-**गुणवान्=गुणसम्पन्नः, नरः=पुरुषः, यस्य कस्य=महतः अल्पीयसो वा, प्रसूतोऽपि=उत्पन्नोऽपि (लोकैः=नरैः) पूज्यते=सम्मानं क्रियते, वंश विशुद्धोऽपि= शुद्धवेणुनिर्मितोऽपि, धनुः=चापः, (चेत्=यदि) निर्गुणः=प्रत्यःगारहितः (तदा=तर्हि) किं करिष्यति=शत्रुहननादिकं कार्यं न करिष्यतीत्याशयः। एवमेव श्रेष्ठकुलोत्पन्नो विद्याविहीनोऽपि पुरुषो न किमपि कर्तुं शक्नोति।

**सरलार्थः-**नीचकुलोद्भवो विद्यावान् पुरुषो लोके यशो लभते, उच्चकुलोद्भवोऽपि विद्यारहितो जनो महार्हो न भवति। अत एव मूर्खपुत्रापेक्षया पुत्रहीनं जीवनमेव वरं भवति, यथा विशुद्धवंशोद्भवं धनुः प्रत्यःां विना निरर्थकं भवति।

**व्याकरणम्-**

**समासः-**गुणवान्=गुणाःसन्ति अस्येति। वंशविशुद्धः=वंशोविशुद्धो यस्य सः। निर्गुणः=निर्गतो गुणो यस्य सः।

**सन्धि विच्छेदः-**प्रसूतोऽपि=प्रसूतः+अपि। धनुर्वंश विशुद्धोऽपि=धनुः+ वंशविशुद्धः+अपि।

**प्रकृति प्रत्ययः-**गुणवान्=गुण+मतुप् (मस्यवत्वम्) प्रसूतः=प्र+सू+क्त (त)। विशुद्धः=वि+शुध्+क्त(त)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**हा हा पुत्रक! नाधीतं गतास्वेतासु रात्रिषु।**
**तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि॥24॥**

**प्रसङ्गः-**विदुषां मध्ये विद्याहीनः पुत्रः कर्दमे निमग्ना गौरिव सीदति।

**अन्वयः-**हा हा पुत्रक! एतासु गतासु रात्रिषु (त्वया यत्) न अधीतम्, तेन त्वं विदुषां मध्ये पङ्के गौःइव सीदसि।

**व्याख्या-**हा हा=खेदसूचकमव्ययम् , पुत्रक!=हे सुत! (स्वार्थे कन् प्रत्ययः) एतासु=आसु, गतासु=व्यतीतासु, रात्रिषु=रजनीषु (अहर्निशमित्यभिप्रायः) त्वया यत्= भवता यत्) न अधीतम्=शास्त्रादिकं न पठितम्, तेन=तस्माद् हेतोः, त्वम्=भवान्, विदुषाम्=पण्डितानाम्, मध्ये=सभायाम्, पङ्के=कर्दमे, गौरिव=धेनुवत्, सीदसि=दुःखी भवसि।

**सरलार्थः-**भो पुत्र! एतासु व्यतीतासु रात्रिषु भवता वेदादिशास्त्राणां सम्यग् अभ्यासो न विहितः। एतदर्थं त्वं विदुषां सभायां पङ्के निमग्ना धेनुरिव दुःखमनुभविष्यसि।

**व्याकरणम्-**

**समासः-**पुत्रक!=पुत्र एव इति पुत्रकः, तस्य सम्बुद्धौ हे पुत्रक!

**सन्धि विच्छेदः-**गतास्वेतासु=गतासु+एतासु। गौरिव=गौः+इव।

**प्रकृति प्रत्ययः-**पुत्रकः=पुत्र+कन्(क)। अधीतम्=अधि+इ+क्त(त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम्?** यतः-

**व्याख्याः-**तत्=तस्मात् कारणात्, कथम्=केन प्रकारेण, इदानीम्=एतस्मिन् समये, एते=इमे, मम पुत्राः=मत्सुताः, गुणवन्तः=गुणसम्पन्नाः, क्रियन्ताम्= विधीयन्ताम्। यतः=यतोहि-

**आहारनिद्राभयमैथुनःा,**
**समानमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो,**
**धर्मेण हीनाः पशुभिः समानाः॥25॥**

**प्रसङ्गः-**इह लोके येषु धर्मगुणाः न विद्यन्ते, ते नराः पशव इव भवन्ति।

**अन्वयः-**नराणाम् आहार निद्राभयमैथुनं च एतत् पशुभिः समानं (भवति) तेषां धर्मो हि अधिकः विशेषः(भवति) धर्मेण हीनाः पशुभिः समानाः भवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या-** नराणाम् = मनुष्याणाम्, आहारनिद्राभयमैथुनं च = आहारः= भोजनम्, निद्रा=शयनम्, भयम्=भीतिः, मैथुनं च=रतिव्यापारश्च, एतत्= एतच्चतुष्टयम्, पशुभिः=अश्वादिभिः, समानम्=तुल्यं भवति, अर्थात् मानवेष्वपि एतत् क्रियाचतुष्टयं पशुवद् भवति। तेषाम्=मनुष्याणाम्, धर्मो हि=धर्म एव, अधिको विशेषः =ततोप्यधिक-वैशिष्ट्ययुक्तः(भवति=जायते) धर्मेण=एतदाख्येन गुणेन हीनाः=रहिता जनाः, पशुभिः समानाः=पशुकल्पाः, भवन्ति=जायन्ते।

**सरलार्थः-**लोके आहारशयनभयसन्ततित्वञ्च नरेषु पशुषु च तुल्यं भवति, किन्तु मनुष्येषु धर्माख्यो गुणः (शास्त्रज्ञानं) अधिको भवति। ज्ञानरूपेण धर्मेण पुरुषः पशुभ्यःपृथग् भवति। अत एव यस्मिन् पुरुषे एष गुणो न भवति स पशुकल्प एव मन्यते।

**व्याकरणम्-**

**समासः-**आहारनिद्राभयमैथुनम्=आहारश्च निद्रा च भयःा मैथुनःा तेषां समाहारः।

**सन्धिविच्छेदः-**पशुभिर्नराणाम्=पशुभिः+नराणाम्। तेषामधिको विशेषः= तेषाम्+अधिकः+विशेषः।

**प्रकृति प्रत्ययः-**आहारः=आ+हृ+घञ्। मैथुनम्=मिथुन+अण् (अ)। नराणाम्=नृ+अच्(अ)+आम्।

**छन्दः-**अत्र उपजाति नामवृत्तं वर्तते। यतः-

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम्॥26॥**

**प्रसङ्गः-**पुरुषार्थचतुष्टयहीनस्य नरस्य जीवनमिह लोके निरर्थकमस्ति।

**अन्वयः-**धर्मार्थकाममोक्षाणाम् एकः अपि यस्य न विद्यते, तस्य जन्म अजागलस्तनस्य (जन्म) इव निरर्थकं (भवति)।

**व्याख्या-**यतः=यस्मात् कारणात्, धर्मार्थकाममोक्षाणाम्= धर्मादिचतुर्विधपुरुषार्थानां मध्ये, एकोऽपि= एकसंख्याकोऽपि कश्चित् पुरुषार्थः, यस्य=पुरुषस्य, न विद्यते=नैव वर्तते, तस्य=तादृशस्य पुरुषस्य , जन्म=उत्पत्तिः, अजागलस्तनस्य=अजा =छागी तस्याः गलस्य=कण्ठस्य, स्तनस्य=स्तनाकारचर्मखण्डस्य (जन्म=जीवनम्) इव =तुल्यम्, निरर्थकम्=निष्प्रयोजनम् (भवति=जायते)।

**सरलार्थः-**यस्य नरस्य समीपे धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये एकोऽपि पुरुषार्थो न विद्यते तस्य नरस्य जीवनम् अजागलस्तनवत् व्यर्थमेवास्ति।

**व्याकरणम्-**

**समासः-**धर्मार्थकाममोक्षाणाम्=धर्मश्च अर्थश्च कामश्च मोक्षश्च धर्मार्थकाममोक्षाः, तेषाम् । अजागलस्तनस्य=अजायाः गलस्य स्तनः अजागलस्तनः, तस्य।

**सन्धि विच्छेदः-**यस्यैकोऽपि=यस्य+एकः+अपि।

**प्रकृति प्रत्ययः-**अजा=अज+टाप्(आ)। जन्म=जन्+मन्(म)।

**छन्दः-**अत्र अनुष्टुप् नामवृतं वर्तते।

यच्चोच्यते- **आयुः कर्म च वित्तं च विद्यानिधनमेव च।**
**पःैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः॥27॥**

**प्रसङ्गः-**अत्र मानवजीवने ब्रह्मणो भूमिकाया वैशिष्ट्यं वर्णितम्।

**अन्वयः-**आयुः कर्म च वित्तं च विद्या निधनम् एव च, एतानि पःा अपि गर्भस्थस्य एव देहिनः (कृते ब्रह्मणा) सृज्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या**-आयुः=जीवनकालः, कर्म च=आमृत्युपर्यन्तं शुभाशुभाचरणःा, वित्तःा=धनसम्पत्तिश्च, विद्या= नानाशास्त्राणां कलानाञ्च ज्ञानम्, निधनम्=मृत्युः, एव च=निश्चयेन च, एतानि=इमानि पूर्वोक्तानि, पःा अपि= पःासंख्याकान्यपि, गर्भस्थस्यैव =मातृगर्भेस्थितस्यैव, देहिनः=प्राणिनः (कृते=तदर्थम्, बृह्मणा=विधिना) सृज्यन्ते= निर्धार्यन्ते।

**सरलार्थः**-यदा जीवो मातृगर्भे तिष्ठति तदानीमेव धाता (बृह्मा) तत्कृते आयुः जीविकोपार्जनं वित्तं ज्ञानं मृत्युश्च एतेषां पदार्थानां निर्धारणं करोति।

**व्याकरणम्**-

**समासः**-निधनम्=निवृत्तं धनं यस्मात् तत्। गर्भस्थस्य=गर्भे तिष्ठतीति गर्भस्थः, तस्य। देहिनः=देहोऽस्ति अस्येति देहीः तस्य।

**सन्धिविच्छेदः**-यच्चोच्यते=यत्+च+उच्यते। पञ्चैतान्यपि=पञ्च+ एतानि +अपि।

**प्रकृति प्रत्ययः**-वित्तम्=विद्+क्त(त)। विद्या=विद्+क्यप् (य)+टाप् (आ)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

किञ्च- **अवश्यम्भाविनो भावा भवन्ति महतामपि।**
**नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः॥28॥**

**प्रसङ्गः**-बृह्मणा यन्निर्धारितं तन्नूनमेव जायते, तदतिरिच्य न किमपि भवति।

**अन्वयः**-अवश्यम्भाविनो भावाः महताम् अपि भवन्ति, नीलकण्ठस्य नग्नत्वं, हरेः महाहिशयनं (च भवति)

**व्याख्या**-किःा=अपि च, अवश्यम्भाविनः=अवश्यमेव भवितव्याः, भावाः=सुखदुःखादयो विषयाः, महतामपि=महापुरुषाणां, राज्ञां, तथा देवानामपि, भवन्ति=आपतन्ति, नीलकण्ठस्य=भगवतः शिवस्य (सर्वेश्वरत्वेऽपि) नग्नत्वं= दिगम्बरत्वम्(भवति) हरेः=विष्णोः, महाहिशयनं=शेषशय्यायां शयनम्, (च भवति=तथा सम्भवति)

**सरलार्थः**-अस्मिन् लोके महापुरुषाणां नृपाणां तथा देवानामपि जीवने भाविन्यो याः घटनाः भवन्ति ताः नूनमेव जायन्ते, यथा भूतेश्वरस्य शिवस्य दिगम्बरत्वं तथा च भगवतो विष्णोरपि शेषशय्योपरि शयनं भवत्येव। अतः प्रतीयते यत्-भवितव्यता नूनं भवत्येव, तस्याः अतिक्रमणं न सम्भवति।

**व्याकरणम्**-

**समासः**-अवश्यम्भाविनः=अवश्यं भविष्यन्तीति। नीलकण्ठस्य=नीलः, विषपानेन कृष्णरूपकण्ठे यस्य सः। महाहिशयनम्=महांश्चासौ अहिः महाऽहि (शेषः) तस्मिन् शयनमिति।

**सन्धिविच्छेदः**-अवश्यम्भाविनो भावा भवन्ति=अवश्यम्+भाविनः+ भावाः+भवन्ति। महाहिशयनम्=महा+ अहिशयनम्।

**प्रकृति प्रत्ययः**-भाविनः=भू+णिच्(इ)+इनि(इन्)। भावाः=भू+घञ्+अ जस्(अस्)। महताम्=मह्+शतृ (अत्)+(आम्) नग्नत्वम्=नज्+क्त(त)त्व।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च- **यदभावि न तद्भावि भावी चेन्न तदन्यथा।**
**इति चिन्ता विषघ्नोऽयमगदः किं न पीयते॥29॥**

**प्रसङ्गः**-लोके सर्वाणि कार्याणि पूर्वनिर्धारितानि सन्ति, कालक्रमानुसारेण तान्येव प्रवर्तन्ते।

**अन्वयः**-यद् अभावि (भवति) तद् न भावि (भवति)(यत्) भावि चेत् (भवति) तद् अन्यथा न (भवति) इति अयं चिन्ता विषघ्नः अगदः किं न (जनैः) पीयते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या-**अन्यच्च=अपि च, यत्=किमपि वस्तु कार्यं वा, अभावि=भविष्यत्कालेऽपि असम्भावि, (भवति=जायते) तद्=तद् वस्तु कार्यं वा, न भावि=नैव भविष्यति, यत्=यत् कार्यं वस्तु वा, भावि चेत्=यदि अवश्यं सम्भवति, तत्=तद्वस्तु कार्यं वा, अन्यथा न=विपरीतं नैव भवति, इति=इत्थंरूपेण, अयम्=एषः, चिन्ताविषघ्नः=चिन्तारूपविषविनाशकः, अगदः=औषधम्, किं न=कथं न (जनैः= लोकैः)पीयते=सेव्यते।

**सरलार्थः-**लोके यत् कार्यम् अभावि वर्तते, तन्न भविष्यति, एवञ्च यद्भावि वर्तते तस्मात् पृथक् न किमपि भवितुमर्हति। इत्थमेतच्चिन्तापहारकम् औषधं जनैरवश्यमेव पेयम् अर्थाद् अङ्गीकरणीयम्।

**व्याकरणम्-**

**समासः-**चिन्ताविषघ्नः=चिन्ता एव विषं गरलं तद् हन्तीति। अगदः=न अस्ति गदो रोगो यस्मात् सः।

**सन्धिविच्छेदः-**यदभावि=यत्+अभावि। चेन्न=चेत्+न। चिन्ताविषघ्नो-ऽयमगदः=चिन्ताविषघ्नः+ अयम्+ अगदः।

**प्रकृति प्रत्ययः-**अभावि=नञ्+भू+णिच्। विषघ्नः=विष्+क (अ) हन्+ क(अ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतत् कार्याऽक्षमाणां केषाञ्चिदालस्यवचनम्।**

**व्याख्या-**एतत्= 'यद् अभावि न तद् भावि' एवंविधं वचनम्, कार्याऽक्षमाणाम्=कार्यनिष्पादने असमर्थानाम्, केषाःित्=केषामपि पुरुषाणाम्, आलस्य वचनम्=आलस्येन प्रयुक्तं वचनमिति ज्ञेयम्।

**व्याकरणम्-**

**समासः-**कार्याऽक्षमाणाम्=न क्षमाः अक्षमाः, कार्ये अक्षमाः कार्याऽक्षमाः, तेषाम्। आलस्यवचनम्=अलसानां भावः आलस्यम्, आलस्येन प्रयुक्तं वचनम्।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।**
**तथा पुरुषकारेण विना दैवं न सिध्यति॥30॥**

**प्रसङ्गः-**अत्र पुरुषार्थं विना भाग्यमपि न फलतीति वर्णितम्।

**अन्वयः-**यथा हि एकेन चक्रेण रथस्य गतिः न भवेत्, तथा पुरुषकारेण विना दैवं न सिध्यति।

**व्याख्या-**यथा=येन प्रकारेण, हि=नूनम्, एकेन=एकाकिना, चक्रेण= रथावयवेन, रथस्य=स्यन्दनस्य, गतिः= गमनम्, न भवेत्=नैव जायेत, तथा=तेन प्रकारेण, तद्वद् वा, पुरुषकारेण विना=उद्यमेन पृथक्, दैवम्=भाग्यम्, न सिध्यति= फलदायकं नैव भवति।

**सरलार्थः-**लोके येन प्रकारेण एकाकिना रथावयवेन रथस्य स्वाभाविकी गतिर्नैव आयाति, तेनैव प्रकारेण पुरुषार्थं विना भाग्यं नैव सिध्यति। अर्थात् भाग्यपुरुषार्थयोः यदा संयोगो भवति तदानीमेव अखिलं कार्यं सिध्यति।

**व्याकरणम्-**

**समासः-**पुरुषकारेण=पुरि अग्रे गच्छतीति पुरुषः, पुरुषस्य कारः पुरुषकारः तेन।

**सन्धिविच्छेदः-**ह्येकेन=हि+एकेन। गतिर्भवेत्=गतिः+भवेत्।

**प्रकृति प्रत्ययः-**गतिः=गम्+क्तिन्(ति)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**पूर्वजन्म कृतं कर्म तद् दैवमिति कथ्यते।**
**तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः॥31॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः-**इह लोके पुरुषाः पुरुषार्थेन सततं यत्नशीलाः भवेयुः।

**अन्वयः-**(यत्) पूर्वजन्मकृतं कर्म (भवति) तत् दैवम् इति(बुधैः) कथ्यते, तस्मात्(जनः) अतन्द्रितः(सन्) पुरुषकारेण यत्नं कुर्यात्।

**व्याख्या-**यत् कर्म=यत्कार्यम्, पूर्वजन्मकृतम्=प्राग् जन्मनि अनुष्ठितम्, भवति=जायते, तत्=तदेव, दैवम्=भाग्यम्, इति=एवम्, बुधैः=विद्वद्भिः, कथ्यते= निगद्यते, तस्मात्=तस्मात् कारणात् (जनः=लोकः) अतन्द्रितः= आलस्यरहितः (सन्= भवन्) पुरुषकारेण=पुरुषार्थपूर्वकं, यत्नम्=उद्योगम्, कुर्यात्=विधेयम्।

**सरलार्थः-**अस्मिन् लोके पूर्वजन्मनि यत्कृतं भवति तदेव अस्मिन् जन्मनि जनाः भाग्यमिति कथयन्ति। एतदर्थं पुरुषै आलस्यं विहाय यत्नो विधेयः।

**व्याकरणम्-**

**समासः-**पूर्वजन्मकृतम्=पूर्वं च तत् जन्म पूर्वजन्म, तस्मिन् पूर्वजन्मनि, तस्मिन् कृतम्। अतन्द्रितः=तन्द्रा आलस्यं जाता अस्य इति तन्द्रितः, न तन्द्रितः अतन्द्रितः।

**सन्धिविच्छेदः-**तद्दैवमिति=तत्+दैवम्+इति। कुर्यादतन्द्रितः=कुर्यात्+ अतन्द्रितः।

**प्रकृति प्रत्ययः-**कृतम्=कृ+क्त(त)। यत्नम्=यत्+क्त(त)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**न दैवमिति सिंचिन्त्य त्यजेदुद्योगमात्मनः।**
**अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति॥32॥**

**प्रसङ्गः-**इह लोके श्रमं विना फलप्राप्तिर्नैव सम्भवति।

**अन्वयः-**दैवमिति सिंचिन्त्य आत्मनः उद्योगं न त्यजेत् (यतः) अनुद्योगेन तिलेभ्यः तैलानि आप्तुं नार्हति।

**व्याख्या-**दैवम्=भाग्यम्, इति=एवम्, सिंचिन्त्य=चिन्तनं कृत्वा आत्मनः= स्वस्य, उद्योगम्=व्यापारम्, न त्यजेत्=न परिहरेत्, यतः=यतोहि, अनुद्योगेन= व्यापारहितेन, तिलेभ्यः=तिलाख्येभ्योऽन्नेभ्यः, तैलानि=स्नेहम्, आप्तुम्=लब्धुम्, न अर्हति=नैव समर्थो भवति।

**सरलार्थः-**'यद् भावि तद् भविष्यति' इति विचार्य पुरुषाः उद्योगो, व्यापारः कर्त्तव्यकर्म च नैव त्यजेयुः, यतोहि-यत्नं विना तिलेभ्योऽपि तैलं न प्राप्नोति, इत्थमेव भाग्योपरि आश्रित्य यत्नं विना धनविद्यादीनां प्राप्तिरपि भवितुं नार्हति। अत एव भाग्यं विहाय आत्मनोः उन्नतये पुरुषः सदैव यतेत्।

**व्याकरणम्-**

**समासः-**अनुद्योगेन=न उद्योगः अनुद्योगः, तेन।

**सन्धिविच्छेदः-**त्यजेदुद्योगमात्मनः=त्यजेत्+उद्योगम्+आत्मनः। नाप्तुमर्हति= न+आप्तुम्+अर्हति।

**प्रकृति प्रत्ययः-**सञ्चिन्त्य=सम्+चिन्त्+यत्(य)। उद्योगम्=उद्+ युज्+ घञ्(अ)। आप्तुम्=आप्+ तुमुन्(तुम्)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च- **उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-**
**दैवेन देयमिति कापुरुषा वदन्ति।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या,**
**यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥33॥**

**प्रसङ्गः-**श्लोकेऽस्मिन् उद्यमस्य महत्त्वं महता नैपुण्येन प्रतिपादितम्।

**अन्वयः-**उद्योगिनं पुरुषसिंहं लक्ष्मीः उपैति, कापुरुषाः दैवेन देयम्, इति वदन्ति। दैवं निहत्य आत्मशक्त्या पौरुषं कुरु,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यत्ने कृते यदि न सिध्यति, अत्र कः दोषः।

**व्याख्या-**अन्यच्च=अपि च, उद्योगिनम्=यत्नवन्तम्, पुरुषसिंहम्=व्याघ्रवत् पराक्रमशालिनं नरम्, लक्ष्मीः= धनसम्पतिः, उपैति=स्वयमेव वृणुते, कापुरुषाः= सामर्थ्यहीनाः नराः, दैवेन=भाग्येन, देयम्=सम्पादनीयम्, इति=एवम् वदन्ति=कथयन्ति, (अतः=एतदर्थम्) दैवम्=भाग्यम्, निहत्य=परित्यज्य, आत्मशक्त्या=स्वसामर्थ्येन, पौरुषम्= पुरुषप्रयत्नम्, कुरु=विधेहि, यत्ने=परिश्रमे, कृतेऽपि=सम्पादितेऽपि, यदि=चेत् (कार्यम्=अनुष्ठितं कर्म) न सिध्यति=नैव सिद्धिं लभते, (तदा=तर्हि) अत्र=अस्मिन् फलाभावविषये को दोषः=का त्रुटि इति चिन्तनीया।

**सरलार्थः-**अस्मिन् जगति लक्ष्मीः उद्योगिनं पुरुषसिंहं स्वयमेव वृणोति, किन्तु कातराः पुरुषाः भाग्येनैव, सर्वाणि वस्तूनि लभते इति ब्रुवन्ति। अत एव भाग्यमुपेक्ष्य स्वसामर्थ्यानुसारं प्रयत्नो विधेयः, यदि यत्नेकृतेऽपि कार्यं न सिध्यति तर्हि अस्मिन् प्रयासे को दोषः इति विचारणीयः।

**व्याकरणम्-**

**समासः-**उद्योगिनम्=उद्योगःअस्ति अस्य स उद्योगी तम्। पुरुषसिंहम्= पुरुषःसिंह इव इति पुरुषसिंहः, तम्। कापुरुषाः+=कुत्सिताः पुरुषाः। आत्मशक्त्या= आत्मनः शक्तिः आत्मशक्तिः, तया।

**सन्धिविच्छेदः-**लक्ष्मीर्दैवेन=लक्ष्मीः+दैवेन। कोऽत्र=कः+अत्र। उपैति= उप+एति।

**प्रकृति प्रत्ययः-**उद्योगिनम्=उत्+युज्+घिनुण्(इन्)। उपैति=उप+इण्(इ)+ तिप् (ति)। देयम्=दा+यत्(य)। निहत्य=नि+हन+ल्यप्(य)। पौरुषम्=पुरुष+अण् (अ)।

**छन्दः-** अत्र वसन्ततिलका नामवृत्तं वर्तते।

लक्षणम्-''उक्तावसन्ततिलकातभजाजगौ गः''।

**यथा मृत्पिण्डतः कर्ता कुरुते यद् यदिच्छति।**
**एवमात्मकृतं कर्म मानवः प्रतिपद्यते॥34॥**

**प्रसङ्गः-**इह लोके पुरुषाः आत्मकृतशुभाशुभकर्मणां फलानि नूनमेव प्राप्नुवन्ति।

**अन्वयः-**यथा कर्ता मृत्पिण्डतः यद् यद्(कर्तुम्) इच्छति(तत्-तत्) कुरुते, एवं मानवः आत्मकृतं कर्म प्रतिपद्यते।

**व्याख्या-**यथा=येन प्रकारेण, कर्ता=कार्यस्य अनुष्ठाता, कुम्भकारो वा, मृत्पिण्डतः=मृत्तिकासमूहात्, यद् यद्=घटशरावादिसमूहम्, कर्तुम्=निर्मातुम्, इच्छति =अभिलषति, (तत्=तदेव पदार्थम्) कुरुते=निर्मीयते, एवम्=अनेन प्रकारेण, मानवः= मनुष्यः, आत्मकृतम्=आत्मना सम्पाादितम् कर्म=शुभाशुभकर्मफलम्, प्रतिपद्यते= प्राप्नोति।

**सरलार्थः-**लोके येन प्रकारेण कुम्भकारो यथेच्छं मृत्तिका पिण्डतो यद् यदिच्छति तत्तत् निर्माति, तथैव पुरुषोऽपि निजकृतकर्मानुसारं फलं लभते।

**व्याकरणम्-**

**समासः-**मृत्पिण्डतः-मृदां पिण्डः मृत्पिण्डः, तस्मात्। आत्मकृतम्=आत्मना कृतम्।

**सन्धि-विच्छेदः-**यद् यदिच्छति=यत्+यत्+इच्छति। एवमात्मकृतम्=एवम् +आत्मकृतम्।

**प्रकृति प्रत्ययः-** मृत्पिण्डतः=मृत्पिण्ड+तसिल्(तस्)। कर्ता=कृ+तृच् (तृ)। मानवः=मनु+अण्(अ)। (मनोरपत्यम्)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः।- **काकतालीयवत् प्राप्तं दृष्ट्वाऽपि निधिमगृतः।**
**न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते॥35॥**

**प्रसङ्गः-**अत्र पुरुषार्थस्य वैशिष्ट्यं वर्णितम्।

**अन्वयः-**काकतालीयवत् प्राप्तं निधिम् अगृतः दृष्ट्वा अपि दैवं स्वयं न आदत्ते (किन्तु तत्रापि)पुरुषार्थम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अपेक्षते।

**व्याख्या-** अपरः।=अपि च, काकतालीयवत्=काकतालीयन्यायेन (अनायासेन) प्राप्तम्=समुपलब्धम्, निधिम्=धनराशिम्, अग्रतः=पुरतः, दृष्ट्वा अपि=अवलोक्य अपि, दैवम्=भाग्यम्, स्वयम्=आत्मना, न आदत्ते=नैव आनीय ददाति (किन्तु=परन्तु, तत्रापि=तस्मिन् स्थानेऽपि)पुरुषार्थम्=पुरुषप्रयत्नम्, अपेक्षते= अवलम्बते।

**सरलार्थः-**काकतालीयन्यायवद् दैवयोगेन प्राप्तं रत्नादिपूरितं भाण्डं पुरतोऽवलोक्यापि भाग्यं स्वयमानीय पुरुषेभ्यो नैव प्रयच्छति, अपितु तत्रापि पुरुषार्थमपेक्षते, धनादिगृहणार्थं भाग्यमाश्रित्य तूष्णीमुपवेशनं नोचितम्।

**विशेषः-**काकतालीयन्यायः-न्यायस्यास्य तात्पर्यमस्ति दैवसंयोगः। एकस्मात् नारिकेलवृक्षात् सुपक्वं फलं भूमौ पतमानमासीत्, तदानीं कश्चित् काकः तत्रागत्य तदुपरि अतिष्ठत्, फलस्य भूमौ पतनं निश्चितमासीत्, अत्र काकस्पर्शः संयोगवशादभूत् तदा तेन फलपतनेन काको मृतः।

**व्याकरणम्-**

**समासः-**पुरुषार्थम्=पुरुषैःअर्थ्यते काम्यते इति पुरुषार्थः, तम्।

**सन्धिविच्छेदः-**दृष्ट्वाऽपि=दृष्ट्वा+अपि। पुरुषार्थमपेक्षते=पुरुषार्थम्+अपेक्षते।

**प्रकृति प्रत्ययः-**प्राप्तम्=प्र +आप्+क्त(त)। दृष्ट्वा=दृश्+क्त्वा(त्वा)। निधिम्=नि+धा+कि(इ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥36॥**

**प्रसङ्गः-**अत्र श्रमस्य महत्त्वं प्रतिपादितम्।

**अन्वयः-**उद्यमेन हि कार्याणि सिध्यन्ति, मनोरथैः तु न (सिध्यन्ति) हि सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति।

**व्याख्या-**उद्यमेन=परिश्रमेण, हि=निश्चयेन, कार्याणि=अनुष्ठेयकर्माणि, सिध्यन्ति=सफलानि भवन्ति, मनोरथैस्तु=सङ्कल्पमात्रेण तु, न सिध्यन्ति=नैव पूर्णानि भवन्ति, हि=यतोहि, सुप्तस्य=निद्रायां स्थितस्य, सिंहस्य=मृगराजस्य, मुखे=आनने, मृगाः=हरिणादयः पशवः, न प्रविशन्ति=स्वयमेव प्रवेशं न कुर्वन्ति।

**सरलार्थः-**लोके परिश्रमेणैव कार्यसिद्धिर्भवति, न तु अभिलाषया। येन प्रकारेण सिंहस्य मुखे मृगाः स्वयमेव न प्रविशन्ति, तत्कृते स्वयं मृगराजो यतते, तदानीमेव स मृगम् आप्नोति।

**व्याकरणम्-**

**समासः-**मनोरथैः=मन एव रथोऽत्र मनोरथः, तैः।

**प्रकृति प्रत्ययः-**उद्यमेन=उद्+यम्+घञ् (अ)+टा (इन)। सुप्तस्य=स्वप्+ क्त (त)+ ङस् (स्य)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**माता शत्रुः पिता वैरी येन बालो न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये वको यथा॥37॥**

**प्रसङ्गः-**अत्र विद्वांसो हंसवद् मूर्खाश्च वकवद् भवन्तीति प्रतिपादितम्।

**अन्वयः-**येन बालःन पाठितः(तस्य बालकस्य) माता शत्रुः पिता वैरी (भवति) (यतः) यथा हंसमध्ये वको न शोभते (तथा सः) सभा मध्ये न शोभते।

**व्याख्या-**येन=येनापि जनेन, जनकेन वा, बालः=स्वपुत्रः, न पाठितः=नैव अध्यापितः, शिक्षितो वा, (तस्य बालकस्य) माता=जननी, शत्रुः=रिपुः(अस्ति) पिता =जनकः, वैरी=अहितकारी (भवति=जायते) (यतः=यतोहि) सः=अशिक्षितो बालः, यथा=येन प्रकारेण, हंसमध्ये=मरालानां मध्ये, अभ्यन्तरे वा, वकः=कृकवाकः, न शोभते=नैव



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शोभां लभते, (तथा सः=तेन प्रकारेण स बालकः)सभामध्ये=विदुषां सभायाम्, न शोभते=न समादृतो भवति।

**सरलार्थः-**लोके तौ माता पितरौ शत्रूवद् भवतः, यौ स्वपुत्रं न पाठयतः। तयोः स पुत्रो विदुषां मध्ये तथैव न शोभते यथा मरालानां मध्ये वक इति।

**व्याकरणम्-**

**समासः-**सभामध्ये=सभायां मध्यं सभामध्यं, तस्मिन्।

**सन्धि विच्छेदः-**बालो न=बालः+न।

**प्रकृति प्रत्ययः-** पाठितः=पठ्+णिच् (इ)+क्त (त)। वैरी=वैर+इनि (इन्)। शत्रुः=शद्+त्रुन्(त्रु)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥38॥**

**प्रसङ्गः-**विद्याहीनः पुरुषः गन्धहीनपलाशपुष्पसदृशो भवति।

**अन्वयः-**रूपयौवनसम्पन्नाः विशालकुलसम्भवाः(अपि) विद्याहीनाः (जनाः)निर्गन्धाः किंशुका इव न शोभन्ते।

**व्याख्या-**रूपयौवनसम्पन्नाः=रूपेण=सौन्दर्येण, यौवनेन=तारुण्येन, सम्पन्नाः =परिपूर्णाः, विशालकुलसम्भवाः=श्रेष्ठकुलोत्पन्नाः, अपि=एतादृशा अपि, विद्याहीनाः =विद्यारहिता जनाः, निर्गन्धाः=गन्धशून्याः, किंशुकाः=पलाशकुसुमानि इव=यथा, न= नैव, शोभन्ते=राजन्ते।

**सरलार्थः-**सौन्दर्ययुक्तो यौवनसम्पन्नः श्रेष्ठवंशोद्भवश्च विद्याविहीनो जनो गन्धहीनकिंशुकपुष्पसदृशो भवति। अत्रायं भावः-यथा शोभनं गन्धहीनं पलाशपुष्पं निष्प्रयोजनं निरर्थकं वा भवति तथैव मूर्खो ऽपि लोके व्यर्थ एवास्ति।

**व्याकरणम्-**

**समासः-**रूपयौवनसम्पन्नाः-रूपं च यौवनं च रूपयौवने, ताभ्यां सम्पन्नाः। विशालकुलसम्भवाः=विशालं यत् कुलं विशालकुलम्, तस्मिन् सम्भवः येषां ते। विद्याहीनाः=विद्ययाहीनाः । निर्गन्धाः=निर्गतो गन्धो येषां ते।

**सन्धि विच्छेदः-**निर्गन्धा इव=निर्गन्धाः+इव।

**प्रकृति प्रत्ययः-**सम्पन्नाः=सम्+पत्+क्त (त)+जस् (अस्) । सम्भवाः=सम्+भू+अप् (अ)+जस् (अस्)। हीनाः=हा+क्त(त)+जस्(अस्)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः।-

**पुस्तकेषु च नाधीतं नाधीतं गुरुसन्निधौ।**
**न शोभते सभामध्ये जारगर्भ इव स्त्रियाः॥39॥**

**प्रसङ्गः-**अत्र विद्याध्ययनहीनस्य पुरुषस्य तुलना जारगर्भोत्पन्नेन पुरुषेण सह कृतमस्ति।

**अन्वयः-**(येन) पुस्तकेषु च न अधीतम्, गुरुसन्निधौ च न अधीतम्, स स्त्रियाः जारगर्भ इव सभामध्ये न शोभते।

**व्याख्या-**अपरः।=अपि च, (येन=पुरुषेण बालकेन वा) पुस्तकेषु= नानाशास्त्रेषु, च=तथा, न अधीतम्=नैव यथाशक्ति पठितम्, गुरुसन्निधौ=आचार्याणां सामीप्ये, च=तथा, न अधीतम्=नैव अध्ययनं कृतम्, (सः=तादृशो बालकः) स्त्रियाः= नार्याः रमण्याः वा, जारगर्भः व्यभिचारिणः उत्पन्नो बालः, इव=यथा, सभामध्ये= जनसभायाम्, विदुषां समाजे वा, न शोभते=नैव शोभां वहति।

**सरलार्थः-**येन पुरुषेण अध्ययनं सम्यक् न कृतम्, गुरुसन्निधौ च शास्त्राभ्यासो न विहितः, स पुरुषः काचित्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्त्रियाः दुराचारोत्पन्नः पुत्र इव विदुषां मध्ये न शोभते।

**व्याकरणम्-**

**समासः-**गुरुसन्निधौ=गुरोः सन्निधिः गुरुसन्निधिः, तस्मिन्। जारगर्भः=जारस्य गर्भः। सभामध्ये=सभायाः मध्ये।

**सन्धि विच्छेदः-**नाधीतम्=न+अधीतम्। जारगर्भ इव=जारगर्भः+इव।

**प्रकृति प्रत्ययः-**अधीतम्=अधि+इ+क्त(त)। गर्भः=गृ+भन्(भ)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतच्चिन्तयित्वा राजा पण्डितसभां कारितवान्। राजोवाच-भो भो पण्डिताः। श्रूयतां मम वचनम्-अस्ति कश्चिदेवम्भूतो विद्वान्, यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?**

**व्याख्या-**एतत्=इदं पूर्वोक्तमखिलं वृत्तान्तम्, चिन्तयित्वा=विचार्य, राजा=स सुदर्शनो नामधेयो नृपः, पण्डितसभां=विद्वद्गोष्ठीम्, कारितवान्= आयोजितवान्। राजा=सुदर्शनाख्यो नृपतिः, उवाच=अवदत्, भो भो पण्डिताः!=अये विद्वांसः! श्रूयताम्=आकर्ण्यताम्, मम=मदीयम्, वचनम्=कथनम्, अस्ति=वर्तते, कश्चित्=कोऽपि,एवम्भूतः=एतादृशः, विद्वान्=सुधीः, यः=यो हि,मम=मे (सुदर्शनस्य) पुत्राणाम्=सुतानाम्, नित्यम्=सततम्, उन्मार्गगामिनाम्=कुपथप्रवृत्तानाम्, अनधिगत-शास्त्राणाम्=अशिक्षितानाम्, इदानीम्=साम्प्रतम्, नीतिशास्त्रोपदेशेन=नीतिविद्याध्यापनेन, पुनर्जन्म=अन्यजन्म, कारयितुम्=सम्भावयितुम्, समर्थः=योग्योऽस्ति।

**व्याकरणम्-**

**समासः-**पण्डितसभाम्=पण्डितानांसभा पण्डितसभा, ताम्। उन्मार्गगामिनाम् =उद्गतः (कुत्सितः)मार्गः उन्मार्गः, उन्मार्गे गच्छन्ति ते उन्मार्गगामिनः, तेषाम्। अनधिगतशास्त्राणाम्=अधिगतानि शास्त्राणि यैः ते अधिगतशास्त्राः, ते न भवन्तीति अनधिगतशास्त्राः, तेषाम्। नीतिशास्त्रोपदेशेन=नीतेः प्रतिपादकं शास्त्रं नीतिशास्त्रम्, तेषाम् उपदेशः नीतिशास्त्रोपदेशः, तेन।

**सन्धिविच्छेदः-**एतच्चिन्तयित्वा=एतत्+ चिन्तयित्वा। राजोवाच=राजा+ उवाच। कश्चिद् एवम्भूतो विद्वान्=कश्चित्+एवम्भूतः+विद्वान्। पुनर्जन्म=पुनः+जन्म।

**प्रकृति प्रत्ययः-**उक्तम् = वच्+क्त(त)। चिन्तयित्वा= चिन्त्+णिच्(इ)+ क्त्वा(त्वा)। राजा=राज्+कनिन्(अन्)। वचनम्=वच्+ल्युट् (यु+अन) गामिनाम्=गम् +णिनि (इन्)+आम्। कारयितुम्=कृ+ णिच्(इ)+ तुमुन्(तुम्)।

**काचः काञ्चनसंसर्गाद्धत्ते मारकतीर्द्युतीः।**
**तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम्॥40॥**

**प्रसङ्गः-**अस्मिन् पद्ये सत्सङ्गतेर्वैशिष्ट्यं प्रदर्शितम्।

**अन्वयः-**(यथा) काचः काञ्चनसंयोगाद् मारकतीः द्युतीः धत्ते, तथा मूर्खः सत्सन्निधानेन प्रवीणतां याति।

**व्याख्या-**यथा=(येन प्रकारेण) काचः=एकः अपकृष्टः पदार्थः काञ्चनस्य =सुवर्णस्य, संसर्गात्=सन्निधानात्, मारकतीः=मरकतमणिसम्बन्धिनी, द्युतीः =कान्तिः, धत्ते=धारयति। तथा=तेन प्रकारेण, मूर्खः=प्रज्ञा शून्यः, सत्सन्निधानेन=सतां=विदुषां सामीप्येन, प्रवीणताम्=व्यवहारकुशलताम्, याति=गच्छति (प्राप्नोतीति भावः)।

**सरलार्थः-**लोके यथा सुवर्णस्य सामीप्येन काचसदृशं द्रव्यं मणेः सौन्दर्यं प्राप्नोति, तथैव मूर्खोऽपि जनो विदुषां सम्पर्केण पाण्डित्यं लभते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्-**

**समासः-**सत्सन्निधानेन=सतां सन्निधानं सत्सन्निधानम्, तेन।

**सन्धिविच्छेदः-**मारकतीर्द्युतीः=मारकतीः+द्युतीः।मूर्खोयाति=मूर्खः+याति।

**प्रकृति प्रत्ययः-**काचः=कच्+घञ्(अ)। काःनम्=काञ्च्+ल्युट् (अन)। संसर्गात्=सम्+सृज्+घञ् (अ)+ङसि (आत्)। सन्निधानेन= सम्+नि+धा+ल्युट् (यु =अन)+टा(इन)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

उक्तःा- **हीयते हि मतिस्तात! हीनैः सह समागमात्।**
**समैश्च समतामेति विशिष्टैश्च विशिष्टताम्॥41॥**

**प्रसङ्गः-**अस्मिन् पद्ये सङ्गतेः प्रभावस्य वर्णनं विद्यते।

**अन्वयः-**हे तात ! हि हीनैः सह समागमात् मतिः हीयते, समैश्च समतामेति विशिष्टैः च विशिष्टताम् एति।

**व्याख्या-**उक्तञ्च=कथितःा, हे तात!=हे प्रिय! हि=नूनमेव, हीनैः=बुद्धि-गुणादिभिर्न्यूनैः पुरुषैः, सह=साकम्, समागमात्=सहवासात्, मतिः=बुद्धिः, हीयते= हीनतां प्राप्नोति समैश्च=आत्मसदृशैश्च, समताम्=तुल्यताम्, एति=प्राप्नोति, विशिष्टैश्च=स्वापेक्षया गुणादिभिरुत्कृष्टैश्च (सह=साकम्) विशिष्टताम्=श्रेष्ठताम्, एति=प्राप्नोति।

**सरलार्थः-**हे तात! इह जगति नीचैः पुरुषैःसह सम्पर्केण बुद्धिर्नश्यति, आत्मसदृशैर्जनैः साकं तुल्यतां प्राप्नोति, एवःा विद्वद्भिः समं समागमनेन बुद्धिः एधते। अत एव महापुरुषैः सहैव वासः कर्तव्यः।

**व्याकरणम्-**

**समासः-**विशिष्टैः=विशेषेण शिष्टो विशिष्टः, तैः।

**सन्धिविच्छेदः-**मतिस्तात!=मतिः+तात!। समैश्च=समैः+च। विशिष्टैश्च =विशिष्टै :+च।

**प्रकृति प्रत्ययः-**मतिः=मन्+क्तिन् (ति)। हीनः=हा+क्त (त) (तकारस्य नत्वे आकारस्य ईत्वे च)। समताम्=सम+तल्(त)+टाप्(आ)। विशिष्टैः=वि+शिष्+ क्त (त)+भिस्(ऐस्)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत्-देव महाकुल सम्भूता एते राजपुत्राः। तन्मया नीतिं ग्राहयितुं शक्यन्ते। यतः-**

**व्याख्या-**अत्रान्तरे=अस्मिन्नेव समये, विष्णुशर्मनामा=विष्णुशर्मानामकः कश्चित्, महापण्डितः= श्रेष्ठशास्त्रज्ञः, सकलनीतिशास्त्रतत्त्वज्ञः=सम्पूर्णनयग्रन्थस्थगूढ़तत्त्ववेत्ता, बृहस्पतिरिव=देवगुरुसदृशः, अब्रवीत्= अकथयत्। देव!=हे राजन्! महाकुलसम्भूताः=राजकुले समुत्पन्नाः, एते=इमे, राजपुत्राः=राजकुमाराः, तत्=तस्मात् कारणात्, मया= विष्णुशर्मणा, नीतिं राजशासनपद्धतिम्, ग्राहयितुम्=अध्यापयितुम्, शक्यन्ते = पार्यन्ते।

**व्याकरणम्-**

**समासः-**विष्णुशर्मनामा = विष्णुशर्मा इति नाम यस्य सः। महापण्डितः = महान् चासौ पण्डितः। सकलनीतिशास्त्रतत्त्वज्ञः=सकलानि नीतिशास्त्राणि चेति सकलनीतिशास्त्राणि तेषां तत्त्वं सकल नीतिशास्त्रतत्त्वं तज्जानातीति।

**सन्धिविच्छेदः-**अत्रान्तरे=अत्र+अन्तरे। बृहस्पतिरिवाब्रवीत्=बृहस्पतिः इव+अब्रवीत्।

**प्रकृति प्रत्ययः-**अत्र=इदम्+त्रल् (त्र) (प्रकृतेः अद्भावः)। पण्डितः= पण्डा+इतच् (इत)। तत्त्वज्ञः =तत्+त्व+ज्ञा+क(अ)। सम्भूताः= सम्+भू+क्त(त)+ जस् (अस्)। ग्राहयितुम्=गृह्+णिच् (इ)+तुमुन्(तुम्)।

यतः- **नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**न व्यापारशतेनापि शुकवत् पाठ्यते वकः ॥42॥**

**प्रसङ्गः-**उचिते पात्रे स्थापिता काचित् क्रिया विद्या वेति लोके सफला भवति।

**अन्वयः-**अद्रव्ये निहिता काचित् (अपि) क्रिया फलवती न भवेत् (यथा) वकः व्यापारशतेनापि शुकवत् (केनापि) न पाठ्यते।

**व्याख्या-**यतः=यतोहि, अद्रव्ये=असत्पात्रे, निहिता=स्थापिता, काचित् क्रिया =कश्चन व्यापारः शिक्षा वा, फलवती=फलशालिनी न भवेत्=नैव स्यादिति (यथा=येन प्रकारेण) वक इत्याख्यः पक्षीविशेषः, व्यापारशतेनापि= अनेकविधप्रयत्नेनापि, शुकवत्=कीरसदृशः (केनापि=पक्षीविज्ञेनापि) न पाठ्यते=नैव पाठयितुं शक्यते।

**सरलार्थः-**अयोग्यानां कृते कृतः प्रयासः सफलो न भवति, यथा कृतप्रयत्नसहस्रेणापि वकः कोऽपि कीरवत् पाठयितुं समर्थो न भवति, तथैवानुपयुक्ते स्थाने विहितो यत्नः सफलो नैव जायते।

**व्याकरणम्-**

**समासः-**नाद्रव्ये=न द्रव्यमिति अद्रव्यं, तस्मिन्। व्यापारशतेन=व्यापाराणां शतं व्यापारशतं तेन।

**सन्धिविच्छेदः-**नाद्रव्ये=न+अद्रव्ये।व्यापारशतेनापि=व्यापारशतेन+अपि।

**प्रकृति प्रत्ययः-**निहिता=नि+धा+क्त(त)। फलवती=फल+मतुप् (मत्) मस्य वत्वम्+ङीप् (ई)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च-

**अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते।**
**आकरे पद्मरागाणां जन्मकाचमणेः कुतः॥43॥**

**प्रसङ्गः-**श्रेष्ठकुलोद्भवोऽपत्यः श्रेष्ठ एव भवति न तु अपकृष्टः।

**अन्वयः-**अस्मिन् तु गोत्रे निर्गुणमपत्यं न उपजायते (यथा) पद्मरागाणामाकरे काचमणेः जन्म कुतः।

**व्याख्या-**अन्यच्च=अपि च, अस्मिस्तु=एतस्मिन् भवदीये श्रेष्ठतमे तु, गोत्रे =वंशे, निर्गुणम्=गुणरहितम्, अपत्ययं=पुत्रादिकम्, न उपजायते=नैव जनिं गृह्णाति, (यथा=येन प्रकारेण) पद्मरागाणाम्=पुष्परागाख्यमणिविशेषाणाम्, आकरे= उत्पत्तिस्थाने, खनौ वा, काचमणेः=दर्पणस्य, जन्म=उत्पत्तिः, कुतः=कथं सम्भवति।

**सरलार्थः-**अस्मिन् राजकुले गुणरहिताः, दुर्बुद्धय अपत्याः नैव प्रादुर्भवन्ति, यतोहि पद्मरागाणामाकरे काचमणेरुत्पत्तिः लोके कथमपि नैव सम्भवति।

**व्याकरणम्-**

**समासः-**निर्गुणम्=न विद्यन्ते गुणाः यस्मिन् तत्। अपत्यम्=न अधः पतन्ति पितरोऽनेनेति । पद्मरागाणाम्= पद्मस्य राग इव रागो येषां ते पद्मरागाः, तेषाम्।

**सन्धिविच्छेदः-** अन्यच्च = अन्यत् + च। अस्मिंस्तु = अस्मिन् + तु। नापत्यमुपजायते=न+अपत्यम्+ उपजायते।

**प्रकृति प्रत्ययः-**निर्गुणम् = निर्+गुण्+अच्। उपजायते=उप+जन्+श्यन् (य)+त। आकरे आङ्+कृ+घ(अ) + ङि(इ)। कुतः=किम्+तसिल् (तस्) (किमः कु)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अतोऽहं षण्मासाभ्यन्तरे भवत् पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि। राजा सविनयं पुनरुवाच-**

**व्याख्या-**अतः=अस्मात् कारणात्, अहं=विष्णुशर्मा, षण्मासाभ्यन्तरे= रसमासेभ्योऽर्वाक्, भवत्पुत्रान्= तवसुतान्, नीतिशास्त्राभिज्ञान्=नीतिग्रन्थदक्षान्, करिष्यामि=विधास्यामि, राजा=भूपतिः, सविनयम्=विनयपूर्वकम्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पुनः=भूयः, उवाच=कथयामास।

**व्याकरणम् -**

**समासः-**षण्मासाभ्यन्तरे=षट्संख्याकामासाः षण्मासाः तेषाम् अभ्यन्तरं षण्मासाभ्यन्तरम्, तस्मिन्। नीतिशास्त्राभिज्ञान्=नीतिशास्त्रम् अभिजानन्ति इति नीतिशास्त्राभिज्ञाः, तान्।

**सन्धिविच्छेदः-** अतोऽहम्=अतः+अहम्। षण्मासाभ्यन्तरे=षट्+मास+ अभ्यन्तरे। पुनरुवाच=पुनः+उवाच।

**प्रकृति प्रत्ययः-**अभिज्ञान्=अभि+ज्ञा+क(अ) शस्(अस्)। सविनयम्=स +वि+नी+अक्(अ)।

**कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।**
**अश्माऽपि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥44॥**

**प्रसङ्गः-**अत्र संसर्गस्य वैशिष्ट्यं प्रतिपादितम्।

**अन्वयः-**सुमनःसङ्गात् कीटः अपि सतां शिरः आरोहति, अश्मा अपि महद्भिः सुप्रतिष्ठितः (सन्) देवत्वं याति।

**व्याख्या-**सुमनःसङ्गात्=पुष्पसंसर्गात्, कीटोऽपि=क्षुद्रजीवोऽपि, सतां= सज्जनानाम्, शिरः=मूर्धानं मस्तकं वा, आरोहति=आरुढो भवति, अश्मा अपि=पाषाणखण्डोऽपि महद्भिः=महापुरुषैः, सुप्रतिष्ठितः=सम्यक् स्थापितः, (सन्=भवन्) देवत्वं=देवतारूपत्वम्, याति=प्राप्नोति।

**सरलार्थः-**येन प्रकारेण पुष्पसंसर्गेण कीटादयोऽपि क्षुद्रजन्तवो महापुरुषाणां मूर्धानमधिरोहन्ति, अपि च महापुरुषैः सुप्रतिष्ठितः पाषाणोऽपि देवत्वमाप्नोति। तथैव इमे मम पुत्रा यद्यपि विद्याहीनाः सन्ति, तथापि भवतां संसर्गेण नूनं पाण्डित्यं प्राप्स्यन्ति।

**व्याकरणम्-**

**समासः-**सुमनः सङ्गात्=सुमनसां पुष्पाणां सङ्गः सुमनः सङ्गः, तस्मात्।

**सन्धिविच्छेदः-**कीटोऽपि=कीटः+अपि। अश्मापि=अश्मा+अपि।

**प्रकृति प्रत्ययः-**देवत्वम्=देव+त्व+अम्। सुप्रतिष्ठितः=सु+ प्रति+ स्था+ क्त(त)

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च- **यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्यते**
**तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते॥45॥**

**प्रसङ्गः-**अत्र सत्सङ्गतेर्माहात्म्यं वर्णितम्।

**अन्वयः-**यथा द्रव्यम् उदयगिरेः सन्निकर्षेण दीप्यते, तथा हीनवर्णः अपि सत्सन्निधानेन दीप्यते।

**व्याख्या-** अन्यच्च=अपि च, यथा=येन प्रकारेण, द्रव्यम्=पाषाणादि-पदार्थसमूहम्, उदयगिरेः=उदयाचलस्य, सन्निकर्षेण=सम्पर्केण, दीप्यते=प्रकाशते , तथा=तद्वत्, हीनवर्णोऽपि=निम्नवर्णो निरक्षरोऽपि वा, सत्सन्निधानेन= सज्जनानां सहवासेन, दीप्यते=गुणवान् भवति, शोभते वा।

**सरलार्थः-**येन प्रकारेण उदयाचलस्थितानि वस्तूनि भगवतो भास्करस्य मयूखसंसर्गेण शोभन्ते, तथैव विदुषां सङ्गमेन जडोऽपि पुरुषो गुणवान् भवति।

**व्याकरणम्-**

**समासः-**उदयगिरेः=उदयस्य गिरिः उदयगिरिः, तस्मात्। सत्सन्निधानेन= सतां सन्निधानं सत्सन्निधानम्, तेन। हीनवर्णः=हीनाः वर्णाः यस्य सः।

**सन्धिविच्छेदः-**अन्यच्च=अन्यत्+च। यथोदयगिरेर्द्रव्यम्=यथा+उदयगिरेः +द्रव्यम्। हीनवर्णोऽपि=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हीनवर्णः+अपि।

**प्रकृति प्रत्ययः-** द्रव्यम्=द्रु+यत् (य)। सन्निकर्षेण=सम्+नि+कृष्+घञ् (अ)+ टा(इन)। सन्निधानेन= सम्+नि+धा+ल्युट् (यु=अन)+टा(इन)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**गुणा गुणज्ञेषु गुणा भवन्ति,**
**ते निर्गुणं प्राप्य भवन्ति दोषाः।**
**आस्वाद्यतोयाः प्रवहन्ति नद्यः,**
**समुद्रमासाद्य भवन्त्यपेयाः॥46॥**

**प्रसङ्गः-**अत्र संसर्गस्य गुणावगुणयोर्वर्णनं वर्तते।

**अन्वयः-**गुणाः गुणज्ञेषु गुणाः भवन्ति, ते निर्गुणं प्राप्य दोषाः भवन्तिः, नद्यः आस्वाद्यतोयाःप्रवहन्ति, समुद्रमासाद्य अपेयाः भवन्ति।

**व्याख्या-**गुणाः=विद्या-विनय-शौर्य्यादयो मानवीयगुणाः, गुणज्ञेषु= गुणपरीक्षणयोग्येषु पुरुषेषु, गुणाः=गुणपदवाच्याः भवन्ति=जायन्ते, ते=ते एव गुणाः, निर्गुणम्=गुणहीनम् अयोग्यं वा, प्राप्य=लब्ध्वा, दोषाः= अवगुणाः, त्याज्या वा, भवन्ति=जायन्ते, नद्यः=सरितः (गङ्गायमुनादयः) आस्वाद्यतोयाः=आस्वाद्यं= स्वादिष्टम्, तोयम्= जलं यासां ताः, अर्थात् मधुरजलपरिपूर्णाः, प्रवहन्ति=प्रवाहपूर्णाः भवन्ति ( किन्तु ताः नद्यः) समुद्रम्=सागरम्, आसाद्य= प्राप्य, अपेयाः पातुमयोग्याः, भवन्ति=जायन्ते।

**सरलार्थः-**लोके गुणाः गुणिनं जनं प्राप्य सद्गुणाः भवन्ति, ते एव गुणाः निर्गुणं पुरुषं, पदार्थं, स्थानं वा प्राप्य अवगुणाः भवन्ति। यथा नद्यो मधुरजलयुक्ताः प्रवहन्ति, किन्तु ताः रत्नाकरं प्राप्य क्षारसंसर्गेण अपेयाः भवन्ति।

**व्याकरणम्-**

**समासः-**गुणज्ञेषु=गुणान् जानन्ति इति गुणज्ञाः, तेषु। अपेयाः=पातुं योग्याः पेयाः, ताः न भवन्तीति।

**सन्धि-विच्छेदः-**गुणा गुणज्ञेषु=गुणाः+गुणज्ञेषु। समुद्रमासाद्य=समुद्रम्+ आसाद्य। भवन्त्यपेयाः= भवन्ति+अपेयाः।

**प्रकृति प्रत्ययः-**गुणाः=गुण् +अच्+जस्(अस्)। प्राप्य=प्र+ आप्+ ण्यत् (य)। आस्वाद्य=आ+स्वद्+ णिच् (इ)+ ल्यप् (य)। अपेयाः=न+ पा+ण्यत् (य)+ जस् (अस्)।

**छन्दः-** अत्र उपजाति नामवृत्तं वर्तते।

**तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः 'प्रमाणम्' इत्युक्त्वा तस्य विष्णु शर्मणः करे बहुमानपुरस्सरं पुत्रान् समर्पितवान्।**

**व्याख्या-**तत्=तस्मात् कारणात्, एतेषाम्=अमीषाम्, अस्मत् पुत्राणाम्= मदीय सुतानाम्, नीतिशास्त्रोपदेशाय =नीतिविद्याऽध्यापनाय, भवन्तः=श्रीमन्तो विष्णुशर्माण एव, प्रमाणम्=प्रमातारः सन्ति। इत्युक्त्वा=एवं कथयित्वा, तस्य महापण्डितस्य, विष्णुशर्मणः=एतन्नामधेयस्य पण्डितस्य, करे=हस्ते, बहुमानपुरस्सरं= सम्माना-तिशयपूर्वकम्, पुत्रान्=स्वसुतान्, समर्पितवान्=सम्यग्रूपेणार्पयामास।

**व्याकरणम् -**

**समासः-** अस्मत्पुत्राणाम् =अस्माकं पुत्राः अस्मत् पुत्राः, तेषाम्। नीतिशास्त्रोपदेशाय=नीतिशास्त्रस्य उपदेशः नीतिशास्त्रोपदेशः, तस्मै। बहुमान-पुरस्सरम्=पुनः सरतीति पुरः सरः, बहुमानः पुरः सरो यस्मिन् कर्मणि यथा तत्।

**सन्धिविच्छेदः-**तदेतेषामस्मत् पुत्राणाम्=तत्+ एतेषाम्+ अस्मत्पुत्राणाम्। इत्युक्त्वा=इति+उक्त्वा।

**प्रकृति प्रत्ययः-**उपदेशाय=उप+दिश्+घञ्(अ)+ङे। भवन्तः=भू+शतृ (अत्)+जस(अस्)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उक्त्वा=वच्+क्त्वा (त्वा)। समर्पितवान्=सम्+अर्प्+क्तवतु= तवत्। (तवत्)

## अभ्यासार्थ-प्रश्नाः

**बहुचयनात्मक प्रश्नाः -**

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. विद्या पुरुषेभ्यो ददाति-
   (अ) पात्रताम् (ब) विनयम् (स) धनम् (द) धर्मम् ( )
2. मित्रलाभस्य परिच्छेदाः सन्ति-
   (अ) त्रयः (ब) पःा (स) चत्वारः (द) अष्टौ ( )
3. एको गुणी पुत्रो भवति-
   (अ) अर्थहीनः (ब) अधमः (स) घातुकः (द) वरम् ( )
4. ऋणकर्ता पिता भवति-
   (अ) चौरः (ब) शत्रुः (स) अधार्मिकः (द) मूर्खः ( )
5. तिलेभ्य आप्तुमर्हति-
   (अ) तैलानि (ब) जलानि (स) क्षीराणि (द) घृतानि ( )
6. मूर्खः प्रवीणतां याति-
   (अ) जडसन्निधानेन (ब) शिशुसन्निधानेन (स) सत्सन्निधानेन (द) पशुसन्निधानेन ( )

**अतिलघूत्तरात्मक प्रश्नाः -**

1. हितोपदेशः कीदृशं काव्यमस्ति ?
2. हितोपदेशस्य लेखकः कः ?
3. पण्डित विष्णु शर्मा स्वगुरुकुलं कुत्र स्थापितवान्?
4. सात्त्विकं दानं कीदृशं भवति?
5. वृद्धत्वे कीदृशी विद्या हास्याय भवति ?
6. भागीरथीतीरे किं नामधेयं नगरमासीत्?
7. कीदृशं पुरुषं लक्ष्मी उपैति ?
8. कस्य मुखे मृगा न प्रविशन्ति?
9. कीदृशाः पुरुषा न शोभन्ते?

100. मूर्खः केन प्रवीणतां याति ?

11. को राजकुमाराणां पुनर्जन्म कारयितुं समर्थः?
12. कुत्र निहिता क्रिया फलवती न भवति?
13. कीटः सुमनः सङ्गात् कुत्र आरोहति?
14. समुद्रमासाद्य का अपेया भवन्ति?
15. केन विना दैवं न सिध्यति?

**लघूत्तरात्मक प्रश्नाः -**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1. कति प्रकरणानि हितोपदेशस्य? कानि च तेषां नामानि।
2. विद्या क्रमशः किं किं ददाति?
3. सर्वद्रव्येषु विद्या कथम् अनुत्तमं मन्यते?
4. शास्त्रलोचनं कीदृशं भवति?
5. पुरुषाणामनर्थाय कानि चत्वारि कारणानि सन्ति?
6. अस्मिन् परिवर्तिनि जगति कः पुरुषो जायते?
7. प्राज्ञः कथं किं चिन्तयेत् ?
8. एको गुणी पुत्रः कीदृशो भवति?
9. केन चक्षुः पीडा भवति?
10. कस्य पुत्रः सुधी वश्यो धार्मिकश्च भवति?
11. मृत्युलोके कानि षट् सुखानि सन्ति?
12. चत्वारः शत्रवः के सन्ति?
13. केषामभावे जन्म निरर्थकं भवति?
14. का पुरुषाः दैवेन देयमिति वदन्ति?
15. स्त्रियाः जारगर्भ इव को न शोभते?

**निबन्धात्मक प्रश्नाः -**

1. हितोपदेशस्योपादेयतां प्रतिपादयत।
2. मित्रलाभप्रकरणानुसारं मूर्खपुत्रस्य स्वरूपं वर्णयत।
3. कथामुखमाश्रित्य पुरुषार्थस्य वैशिष्ट्यं प्रतिपादयत।
4. नृपः सुदर्शन आत्मनः पुत्रान् नीतिविज्ञान् कर्तुं कीदृशो यत्नो विहितः।

**उत्तरमाला (बहुचयनात्मकप्रश्नानाम्)**

(1) ब (2) स (3) द (4) ब (5) अ (6) स

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | फेनलेखेव | = | फेनलेखा+इव | = | गुणसन्धिः |
| | विद्यैव | = | .............. | = | .......... |
| | विनयाद्याति | = | .............. | = | .......... |
| | कथाच्छलेन | = | .............. | = | .......... |
| | सन्धिरेव | = | .............. | = | .......... |
| | इत्याकर्ण्य | = | .............. | = | .......... |
| | एकश्चन्द्रः | = | .............. | = | .......... |
| | क्वाप्यतिदुष्करम् | = | .............. | = | .......... |
| | वित्तःा | = | .............. | = | .......... |
| | कुर्यादतन्द्रितः | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | सर्वदा | = | सर्व+दा |
| | विद्या | = | ................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हास्याय = ..................
वृद्धत्वे = ..................
पठ्यमानम् = ..................
दर्शकम् = ..................
धार्मिकः = ..................
रूपवती = ..................
सःान्त्य = ..................
सम्पन्ना = ..................

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-

1. विद्यामर्थं च चिन्तयति। (लृट्)
2. तत्र सुदर्शनो नाम नरपतिरासीत्। (लट्)
3. परिवर्तिनि संसारे को मृतो न जायते।(लङ्)
4. तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि। (लिङ्)
5. दैवेन देयमिति कापुरुषाः वदन्ति। (लोट्)

4. **(अ) असमस्तपदानां समासो विधेयः -**

भागीरथ्याः तीरे = ......................
उद्विग्नं मनो यस्य सः = ......................
अर्थं करोतीति = ......................
कुत्सिताः पुरुषाः = ......................
महान् चासौ पण्डितः = ......................
रूपं च यौवनं च ताभ्यां सम्पन्नाः= ......................

**(ब) समस्तपदानां विग्रहः कार्यः -**

दुर्धषम् = ......................
सुदर्शनः = ......................
चिन्ताविषघ्नः = ......................
अनधिगतशास्त्राणाम् = ......................
नीतिशास्त्रभिज्ञान् = ......................
अपेयाः = ......................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

पात्रताम् = ......................
अन्यस्मात् = ......................
चक्षुषा = ......................
परिवर्तिनि = ......................
देहिनः = ......................
आत्मशक्त्या = ......................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

6. कोष्ठके स्थितशब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

1. एकैकमपि........... किमु यत्र चतुष्टयम्। (अनर्थ)
2. धर्मार्थकाममोक्षाणाम् ........... एकोऽपि न विद्यते।(यद्)
3. तिलेभ्यः तैलानि........... आप्तुं नार्हति। (अनुद्योग)
4. मूर्खः ........... प्रवीणतां याति। (सत्सन्निधान)
5. गुणाः ........... गुणा भवन्ति। (गुणज्ञ)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# मित्रलाभः

## द्वितीयो भागः

**अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितोऽब्रवीत्-भो राजपुत्राः श्रृणुत -**

**व्याख्या-** अथ=एतदनन्तरम्, प्रासादपृष्ठे=राजभवनस्योपरिभागे, सुखोपविष्टानाम्=अक्लेशेनस्थितानाम्, राजपुत्राणां=राजकुमाराणाम्, पुरस्तात्=अग्रे, प्रस्तावक्रमेण=कथामाध्यमेन, सः=विष्णु शर्मा, पण्डितः=विद्वान्, अब्रवीत्=अवोचत्। भो राजपुत्राः = अये राजकुमाराः, श्रृणुत=आकर्णयत।

**व्याकरणम्-**

**समासः-**प्रासादपृष्ठे=प्रासादस्य पृष्ठं प्रासादपृष्ठं, तस्मिन्। सुखोपविष्टानाम्=सुखम् उपविष्टाः सुखोपविष्टाः, तेषाम्। राजापुत्राणाम्=राज्ञः पुत्राः राजपुत्राः तेषाम्। प्रस्तावक्रमेण=प्रस्तावस्य क्रमः प्रस्तावक्रमः, तेन।

**सन्धिविच्छेदः-**सुखोपविष्टानाम्=सुख+उपविष्टानाम्। स पण्डितोऽब्रवीत् =सः+पण्डितः+अब्रवीत्।

**प्रकृति प्रत्ययः-**उपविष्टानाम्=उप+विश्+क्त(त)+आम्।

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥1॥**

**प्रसङ्गः-**अत्र धीमतां मूर्खाणाःा समयः पृथक्-पृथक् रूपेण व्ययो भवतीति वर्णितम्।

**अन्वयः-**धीमतां कालः काव्यशास्त्रविनोदेन गच्छति, मूर्खाणां (कालस्तु) व्यसनेन, निद्रया , कलहेन वा (गच्छति)

**व्याख्या-**धीमताम्=विदुषां बुद्धिमतां वा, कालः=समयः, काव्यशास्त्रविनोदेन=रसान्वितशास्त्रानन्देन, गच्छति=याति व्यतीतो भवति वा, मूर्खाणाम्= अनधीतशास्त्राणाम्, कालस्तु=समयस्तु, व्यसनेन=सुरापानद्यूतक्रीडादिना, निद्रया= शयनाधिक्येन, कलहेन=परस्परविवादेन, वा=अथवा, गच्छति=व्यतीतो भवति।

**सरलार्थः-**इह जगति विदुषां जीवनकालं साहित्यव्याकरणादिशास्त्राणामध्ययने व्यतीतो भवति, एवःाानधिगतशास्त्राणां नृणां समयः सुरापाने, द्यूतक्रीडायां, दिवा निद्रायां परस्परं विवादेषु च निष्प्रयोजनमेव व्ययो भवतीति ।

**व्याकरणम्-**

**समासः-**काव्यशास्त्रविनोदेन=कवेः कर्म काव्यं, तदेवशास्त्रम् इति काव्यशास्त्रम् तेन यो विनोदः काव्यशास्त्रविनोदः, तेन। व्यसनेन=व्यस्यते चित्तम् अनेनेति व्यसनम् , तेन।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धि विच्छेदः**-कालो गच्छति=कालः गच्छति।

**प्रकृति प्रत्ययः**-धीमताम्=धी+मतुप् (मत्)+आम्। व्यसनेन=वि+अस्+ ल्युट् (अन)+टा(इन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि। राजपुत्रैरुक्तम्-आर्य! कथ्यताम्। विष्णुशर्मोवाच-शृणुत। सम्प्रति मित्रलाभःपूस्तूयते, यस्यायमाद्यः श्लोकः-**

**व्याख्या-** तत्=तस्मात् कारणात्, भवताम्=युष्माकम्, विनोदाय=आनन्द-प्राप्त्यर्थम्, काककूर्मादीनाम्= वायसकच्छपहिरणमूषिकादीनाम्, विचित्राम्=आश्चर्य-युक्ताम्, कथाम्=आख्यायिकाम्, कथयामि=ब्रवीमि। राजपुत्रैः= राजकु मारैः, उक्तम्= भणितम्, आर्य!=पूज्य!, कथ्यताम्=उच्यताम्। विष्णुशर्मोवाच=विष्णुशर्मानाम पण्डितोऽवोचत्, शृणुत=ध्यानपूर्वकमाकर्णयत, सम्प्रति=अधुना, मित्रलाभः= एतन्नामधेयः प्रथमपरिच्छेदः, प्रस्तूयते=आरभ्यते, यस्य=एतस्य (मित्रलाभस्य), अयम् =एषः, आद्यः=प्रथमः, श्लोकः=पद्यमस्तीति।

**व्याकरणम्-**

**समासः**-काककूर्मादीनाम्=काकश्च कूर्मश्च काककूर्मौ तौ आदिः येषां ते काककूर्मादयः, तेषाम्। राजपुत्रैः=राज्ञः पुत्राःराजपुत्राः तैः।

**सन्धिविच्छेदः**-राजपुत्रैरुक्तम्=राजपुत्रैः+उक्तम्। विष्णुशर्मोवाच=विष्णु-शर्मा+उवाच। यस्यायमाद्यः= यस्य+अयम्+आद्यः।

**प्रकृति प्रत्ययः**-उक्तम=वच्+क्त(त) । शर्मा=शृ+मनिन् (मन्)।

**असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।**
**साधयत्याशु कार्याणि काककूर्ममृगाखुवत्॥2॥**

**प्रसङ्गः**-कार्यसिद्धये बुद्धिमत्तायाः मित्रतायाश्च महती आवश्यकता भवति।

**अन्वयः**-असाधनाः वित्तहीनाः बुद्धिमन्तः सुहृत्तमाः काककूर्ममृगाखुवत् कार्याणि आशु साधयन्ति।

**व्याख्या**-असाधनाः=साधनरहिताः, वित्तहीनाः=धनशून्याः, बुद्धिमन्तः= ज्ञानवन्तः, सुहृत्तमाः=अतिशयेन सुहृदः, काककूर्ममृगाखुवत्=वायसकच्छपहरिणमूषिकसदृशाः, कार्याणि=कृत्यानि, आशु=शीघ्रम्, साधयन्ति= निष्पादयन्ति ।

**सरलार्थः**-वायसकच्छपमृगमूषिकवत् ये जनाः साधनशून्याः, धनहीनाः भवन्तोऽपि बुद्धिमन्तः सुहृदश्च सन्ति नूनमेव ते शीघ्रं कार्याणि साधयन्ति।

**व्याकरणम्-**

**समासः**-असाधनाः=न विद्यन्ते साधनानि येषां ते असाधनाः। बुद्धिमन्तः= बुद्धिः विद्यन्ते येषां ते। सुहृत्तमाः=शोभनं हृदयं येषां ते सुहृदः अतिशयेन सुहृद इति सुहृत्तमाः। काककूर्ममृगाखुवत्=काकश्च कूर्मश्च मृगश्च आखुश्च इति काककूर्ममृगाखवः ते इव इति।

**सन्धिविच्छेदः**-साधयन्त्याशु=साधयन्ति+ आशु।

**प्रकृति प्रत्ययः**-बुद्धिमन्तः=बुद्धि+मतुप् (मत्)+जस्(अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**राजपुत्रा ऊचुः-कथमेतत्? सोऽब्रवीत्=अस्ति गोदावरी तीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनी-नायके चन्द्रमसि लघुपतनकनामावायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधमपश्यत्। तमालोक्याऽचिन्तयत्-अद्य प्रातरेवाऽनिष्टदर्शनं जातं न जाने किमनभिमतं दर्शयिष्यति, इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्याः-** राजपुत्राः=राजकुमाराः, ऊचुः=कथयामासुः, कथम्=केन प्रकारेण, एतत्=इदम्, (अस्ति) सः=विष्णुशर्माआचार्यः, अब्रवीत्=उवाच गोदावरीतीरे= गोदावरीनद्यास्तटे, विशालः=स्थूलकायः, शाल्मलीतरुः= एतदाख्यः वृक्षः (लोके 'सेमल' इति नाम्ना प्रसिद्धः) अस्ति=आसीत् (वाक्यादौ 'अस्ति' इतिपदं भूतार्थे प्रयुज्यते) तत्र=तस्मिन् (वृक्षे ) नानादिग्देशात्=विभिन्नदिग्भ्यो देशेभ्यश्च, आगत्य= समागत्य रात्रौ=निशायाम्, पक्षिणः=खगाः, निवसन्ति=निवासं कुर्वन्ति। अथ= अनन्तरम्, कदाचित्=कस्मिन्नपि काले, अवसन्नायाम्=व्यतीतायाम्, रात्रौ=क्षपायाम्, अस्ताचलचूडावलम्बिनि = अस्तशिखराश्रिते सति, भगवति = ऐश्वर्यशालिनि, कुमुदिनीनायके= कमलिनी स्वामिनि, चन्द्रमसि=रजनीकरे, लघुपतनकनामावायसः= एतदाख्यो वायसः, प्रबुद्धः=सुप्तोत्थितः सन्, कृतान्तमिव=मृत्युपतिमिव, द्वितीयम्= अन्यम्, अटन्तम्=आगच्छन्तम्, पाशहस्तम्=हस्तधृतजालम्, व्याधम्=लुब्धकम्, अपश्यत्=अवलोकयत्। तमवलोक्य=व्याधं दृष्ट्वा, अचिन्तयत्=विचारं कृतवान्। अद्य=अस्मिन् दिवसे, प्रातरेव=प्रातःकाले एव, अनिष्टदर्शनम्=अशुभावलोकनम्, जातम्=अभवत्, न जाने=नैव जानामि, किमनभिमतम्=किम् अमङ्गलम्, दर्शयिष्यति= उपस्थापयिष्यति, इत्युक्त्वा=इत्थं कथयित्वा, तदनुसरणक्रमेण=तस्य (व्याधस्य) पश्चाद्गमनविधिना, व्याकुलः= खिन्नचेतः, चलितः=अचलत्।

**व्याकरणम्-**

**समासः-**गोदावरीतीरे=गोदावर्याः तीरं गोदावरी तीरम्, तस्मिन्। अस्ताचलचूडावलम्बिनि=अस्ताचलस्य चूडा, अस्ताचलचूडा, तद् अवलम्बते इति अस्ताचलचूडावलम्बि, तस्मिन्। व्याकुलः=विशेषेण आकुलः।

**सन्धिविच्छेदः-**सोऽब्रवीत्=सः+अब्रवीत्। नानादिग्देशादागत्य=नानाादिक् +देशात्+आगत्य। पक्षिणो निवसन्ति=पक्षिणः+निवसन्ति। तमालोक्याचिन्तयत्=तम् +आलोक्य+अचिन्तयत्। प्रातरेवानिष्टदर्शनम्=प्रातः+एव+ अनिष्टदर्शनम्। इत्युक्त्वा =इति+उक्त्वा । व्याकुलश्चलितः=व्याकुलः+चलितः।

**प्रकृति प्रत्ययः-**आगत्य=आ+गम्+ल्यप् (य)। आलोक्य=आङ्+लुक् +ल्यप् (य)। अटन्तम्=अट् शतृ(अत्) अम्। दर्शनम्=दृश्+ल्युट् (यु=अन)। उक्त्वा =वच्+क्त्वा (त्वा)। चलितः=चल्+(इट्) क्त (त)।

यतः- **शोकस्थानसहस्राणि भयस्थानशतानि च।**
**दिवसे-दिवसे मूढमाविशन्ति न पण्डितम्॥3॥**

**प्रसङ्गः-**शोकभयादीनां कारणानां प्रभावो मूर्खोपरि बाहुल्येन आयाति, किन्तु विद्वत्सु तेषां प्रभावो न दृश्यते।

**अन्वयः-**शोकस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढम् आविशन्ति, पण्डितं न ( आविशन्ति)

**व्याख्या-**यतः=यतोहि, शोकस्थानसहस्राणि=परितापस्यसहस्रशः आस्पदानि (सन्ति), भयस्थानशतानि= भयोत्पादकानि शतशः निमित्तानि (सन्ति), च =तथा, दिवसे-दिवसे=प्रतिदिनम्, मूढम्=ज्ञानशून्यम्, आविशन्ति=व्याकुली कुर्वन्ति, (किन्तु) पण्डितं न=बुद्धिमन्तं पुरुषं नैव, ( आविशन्ति=पराभवन्ति)।

**सरलार्थः-**अस्मिन् जगति मनुष्याणां पुरतः सहस्राणि शोकस्थानानि, शतानि भयोत्पादकानि आस्पदानि च समायान्ति, किन्तु तानि मूर्खाणां कृते एव भवन्ति, न तु विदुषाम्। यतोहि विद्वांसो निजबुद्धिबलेन तानि नाशयितुं समर्थाः भवन्ति।

**व्याकरणम्-**

**समासः-**शोकस्थान-सहस्राणि=शोकस्य स्थानानि शोकस्थानानि, तेषां सहस्राणि।

**सन्धि विच्छेदः-**मूढमाविशन्ति=मूढम्+आविशन्ति।

**प्रकृति-प्रत्ययः-**मूढम्=मूह्+क्त(त)। आविशन्ति=आ+विश्+झि (अन्ति) पण्डितम्=पण्डा+इतच् (इत)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्यच्च-विषयिणामिदमवश्यं कर्तव्यम्-**

**उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।**
**मरणव्याधिशोकानां किमद्य निपतिष्यति॥4॥**

**प्रसङ्गः**-प्रातःकाले प्रतिदिनमुत्थाय भयमरणव्याधीनां विषये नूनं चिन्तनीयम्।

**अन्वयः**-उत्थाय उत्थाय अद्य-मरण-व्याधि-शोकानां (मध्ये) किं निपतिष्यति (इति यद्) महद् भयम् उपस्थितं (तद्) बोद्धव्यम्।

**व्याख्या**-अन्यच्च=अपि च, विषयिणाम्=गृहस्थानाम्, इदम्=एतत् (वक्ष्यमाणम्) अवश्यम्=नूनमेव, कर्तव्यम्=करणीयम्। उत्थाय-उत्थाय=प्रतिदिनं शयनात् प्रबुध्य, अद्य=अस्मिन् दिने, मरणव्याधिशोकानाम्=मृत्युरोगानुतापानां (मध्ये= अन्तराले) किं निपतिष्यति=किम् आगमिष्यति, (इति यत्=इत्येवं प्रकारेण यत्) महद् भयम्=अतिदारुणं भयकारणम्, उपस्थितम्=समागतम्, (तत्=तत्सर्वम्) बोद्धव्यम्= ज्ञातव्यम्।

**सरलार्थः**-प्रतिदिनं प्रातः काले शय्यां परित्यज्य एतच्चिन्तनीयं यद् अस्मिन् दिवसे मृत्युशोकभयेषु एतेषु त्रिषु कस्यागमनं भविष्यति। एतदर्थं दारुणभयस्य कारणं सम्यग् विचार्य कार्येषु प्रवर्तेत।

**व्याकरणम्-**

**समासः**-मरणव्याधिशोकानाम्=मरणं च व्याधिश्च शोकश्च मरणव्याधिशोकाः, तेषाम्।

**सन्धिविच्छेदः**-अन्यच्च=अन्यत्+च। उत्थायोत्थाय = उत्थाय + उत्थाय। महद्भयमुपस्थितम्=महत्+भयम्+उपस्थितम्।

**प्रकृति प्रत्ययः**-उत्थाय=उत्+स्था+ल्यप् (य)। उपस्थितम्=उपस्था+क्त (त)। मरणम्=मृ+ल्युट् (यु=अन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्। स च तत्र प्रछन्नो भूत्वा स्थितः।अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तान् तण्डुलकणान् अवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह-कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि प्रायेणाऽनेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।**

**व्याख्या**-अथ=किंिचत्कालानन्तरम्, तेन व्याधेन=पूर्वोक्तेन लुब्धकेन, तण्डुलकणान्=तण्डुलखण्डान्, विकीर्य=भूमौ प्रसार्य, जालं=पाशम्, विस्तीर्णम्= प्रसारितम्। स च=व्याधश्च, प्रच्छन्नो भूत्वा=निलीय, स्थितः=अतिष्ठत्। अस्मिन्नेव काले=एतस्मिन्नेव समये, चित्रग्रीवनामा=चित्रग्रीव नामकः, कपोतराजः=पारावतनृपः, सपरिवारो=सकुटुम्बम्, वियति=आकाशे, विसर्पन्=गच्छन्, तान् तण्डुलान्=पृथिव्यां निक्षिप्तान् तण्डुलखण्डान्, अवलोकयामास=दृष्टवान्। ततः = तण्डुलकणदर्शनानन्तरम्, कपोतराजः = पारावतनृपः, तण्डुलकणलुब्धान् = तण्डुलखण्डभक्षणोन्मुखान्, कपोतान्=पारावतान्, प्रत्याह=प्रत्यकथयत्, कुतः=कस्मात् स्थानात्, अत्र=अस्मिन्, निर्जने=पुरुषहीने, वने=कानने, तण्डुलकणानाम्=तण्डुलखण्डानाम्, सम्भवः=उत्पतिः? तत्=तस्मात् कारणात्, निरूप्यताम्=विचार्यताम्, तावत्=सर्वादौ। इदम्=एषां भक्षणम् भद्रं=हितकरम्, न=नैव, पश्यामि=अवलोकयामि, प्रायेण=बाहुल्येन, अनेन=एतेन, तण्डुलकणलोभेन=तण्डुलखण्डलाभेच्छया, अस्माभिरपि=सर्वैरपि पारावतैः, तथा=तेन प्रकारेण, भवितव्यम्=भाव्यम्। (तथा भवितव्यम् इत्यस्यान्वयः स पथिके यथा मृतः इत्यनेन भवतीति ज्ञेयः)

**व्याकरणम्-**

**समासः**-तण्डुलकणान्=तण्डुलानां कणाः तण्डुलकणाः तान्। सपरिवारः= परिव्रियन्ते एभिः इति परिवाराः, तैः सहितः। तण्डुलकणलुब्धान्=तण्डुलकणानां लुब्धाः तण्डुलकणलुब्धाः, तान्। निर्जने=न विद्यन्ते जना यत्र इति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

निर्जनम्, तस्मिन्।

**सन्धि विच्छेदः-**प्रछन्नो भूत्वा=प्रछन्नः +भूत्वा। अस्मिन्नेव=अस्मिन् +एव। विसर्पंस्तण्डुलकणान्=विसर्पन् +तण्डुलकणान्। कुतोऽत्र=कुतः+अत्र। प्राह=प्र+आह।

**प्रकृति प्रत्ययः-**विकीर्य=वि+कॄ+ल्यप् (य)। प्रछन्न=प्र+छद्+क्त (त)। भूत्वा=भू+क्त्वा। विसर्पन्=वि+सृप्+शतृ (अत्) कुतः=किम् (कु)+ तसिल् (तस्)। भवितव्यम्=भू+तव्यत् (तव्य )।

**कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।**
**वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा॥5॥**

**प्रसङ्गः-**लोभस्य परिणामोऽतीव दुःखदायको भवति।

**अन्वयः-**कङ्कणस्य तु लोभेन सुदुस्तरे पङ्के मग्नः पथिकः वृद्धव्याघ्रेण सम्प्राप्तः, स (पथिकः) यथा मृतः।

**व्याख्या-**कङ्कणस्य=कनकवलयस्य, तु लोभेन=प्राप्तिकामनया तु, सुदुस्तरे =निर्यातुमशक्ये, पङ्के=कर्दमे, मग्नः=निमज्जितः, पथिकः=यात्री पान्थो वा, वृद्धव्याघ्रेण=जीर्णकेसरिणा, सम्प्राप्तः=सम्यग् आक्रान्तः, (सन्) स पथिकः=लोभाविष्टः स पान्थः, यथा=येन प्रकारेण, मृतः=मृतवान्।

**सरलार्थः-**सुवर्णवलयलोभेन अतिकठिने पङ्के संलग्नो लोभाविष्टो ब्राह्मणो यथा वृद्धव्याघ्रेण सम्यग् आक्रान्तः सन् मृतः, तथैव वयमपि अत्र भवेम।

**व्याकरणम्-**

**समासः-**सुदुस्तरे=दुःखेन तरितुम् अशक्यं सुदुस्तरम्, तस्मिन्। वृद्धव्याघ्रेण= वृद्धश्चासौ व्याघ्रः वृद्धव्याघ्रः, तेन।

**सन्धिविच्छेदः-**स मृतो यथा=सः+मृतः+यथा।

**प्रकृति प्रत्ययः-**मग्नः=मस्ज् +क्त (त)। सम्प्राप्तः=सम्+ प्र+ आप्+ क्त(त)। पथिकः=पथिन्+ष्कन् (क)। मृतः=मृ+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**कपोता ऊचुः-कथमेतत्? सोऽब्रवीत्-**

**व्याख्या-**कपोताः=पारावताः, ऊचुः=कथितवन्तः, कथम्=केन प्रकारेण, एतत्=इदम्, सः=चित्रग्रीवनामकः कपोतराजः, अब्रवीत्=अकथयत्।

## अभ्यासार्थ-प्रश्नाः

**बहुचयनात्मक प्रश्नाः -**

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. धीमतां कालो गच्छति
   (अ) विवादेन (ब) व्यसनेन (स) काव्यशास्त्रविनोदेन (द) शयनेन ( )
2. विशालशाल्मलीतरु आसीत्-
   (अ) भागीरथीतीरे (ब) गोदावरीतीरे (स) नर्मदातीरे (द) गण्डकीतीरे ( )
3. मित्रलाभे काकस्य नाम आसीत्-
   (अ) लघुपतनकः (ब) चित्रग्रीवः (स) जरद्गवः (द) हिरण्यकः ( )
4. व्याधेन विकीर्य जालं विस्तीर्णम्-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(अ) गोधूमकणान् (ब) यवकणान् (स) चणकचूर्णानि (द) तण्डुलकणान् ( )

5. कङ्कणस्य लोभेन मग्नः-

(अ) गहने कूपे (ब) विशाले सागरे (स) पङ्के सुदुस्तरे (द) गण्डकी नद्याम् ( )

**अतिलघूत्तरात्मक प्रश्नाः -**

1. राजप्रासादे के सुखोपविष्टा आसन् ?
2. राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण कः अब्रवीत् ?
3. धीमतां कालः केनप्रकारेण गच्छति ?
4. मूर्खाणां कालः कथं याति?
5. राजपुत्राणां विनोदाय केषां कथा पं.विष्णुशर्मा कथयति?
6. राजकुमाराणां कृते विष्णुशर्मा कां कथयति?
7. काककूर्ममृगाखुवत् कानि साधयन्ति?
8. गोदावरी तीरे कीदृशः तरु आसीत्?
9. तत्र कुतः आगत्य खगाः निवसन्ति?
10. वायसः कीदृशं व्याधम् अपश्यत् ?
11. काको व्याधानुसरणक्रमेण कीदृशश्चलितः?
?2. कति शोकस्थानानि सन्ति?
13. महद् भयमुपस्थितमिति कथं बोद्धव्यम्।
14. व्याधः किं कृत्वा जालं विस्तीर्णम्।
15. स पथिकः केन सम्प्राप्तः मृतः।

**लघूत्तरात्मकप्रश्नाः -**

1. मित्रलाभे केषां मित्राणां कथा वर्तते।
2. पण्डित विष्णुशर्मा प्रस्तावक्रमेण किंमकरोत्।
3. धीमतां मूर्खाणाःा कालः कथं गच्छति।
4. विष्णुशर्मा किमर्थं राजप्रासादे कथां कथयति।
5. असाधनाः वित्तहीनाः कस्य प्रकरणस्य श्लोकोऽस्ति।
6. पक्षिणः कुत आगत्य शाल्मली वृक्षे निवसन्ति स्म।
7. लघुपतनक वायसः कदा प्रबुद्धः।
8. व्याधं दृष्ट्वा वायसः किमचिन्तयत्।
9. कति कानि भयस्थानानि शोकस्थानानि च सन्ति।
10. प्रातः उत्थाय प्रतिदिनं किं बोद्धव्यम्।
11. व्याधः अरण्यं गत्वा किम् अकरोत्।
12. कपोतराजः तण्डुलकणान् कदा दृष्टवान्।
13. तण्डुलकणान् दृष्ट्वा कपोतराजः किं प्राह।
14. तण्डुलकणलोभेन कपोतानां कीदृशी स्थिति र्भविष्यति।
15. मूढाः कुत्र कदाऽऽविशन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**निबन्धात्मकप्रश्नाः -**

1. पण्डित विष्णुशर्मणः परिचयो देयः?
2. मित्रलाभस्य सारांशो लिखत?
3. व्याधस्य वर्णनं कुरुत?
4. पण्डित विष्णुशर्मा कथं राजपुत्रान् नीतिविज्ञान् कृतवान्।

**उत्तरमाला (बहुचयनात्मकप्रश्नानाम्)**

(1) स (2) ब (3) अ (4) द (5) स

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | सुखोपविष्टानाम् | = | सुख+उपविष्टानाम् | = | गुणसन्धिः |
| | राजपुत्रैरुक्तम् | = | .............. | = | .......... |
| | यस्यायमाद्यः | = | .............. | = | .......... |
| | प्रातरेवानिष्टदर्शनम् | = | .............. | = | .......... |
| | व्याकुलश्चलितः | = | .............. | = | .......... |
| | कुतोऽत्र | = | .............. | = | .......... |
| | प्रायेणाऽनेन | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | उपविष्टानाम् | = | उप+विश्+क्त+आम् |
| | पण्डितः | = | .................... |
| | धीमताम् | = | .................... |
| | बुद्धिमन्तः | = | .................... |
| | सुहृत्तमाः | = | .................... |
| | आगत्य | = | .................... |
| | प्रबुद्धः | = | .................... |
| | विस्तीर्णम् | = | .................... |

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-

   1. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।(लोट्)
   2. भवतां विनोदाय कथां कथयिष्यामि।(लट्)
   3. विष्णुशर्मा उवाच। (लृट्)
   4. तत्र रात्रौ पक्षिणो निवसन्ति।(लङ्)
   5. कपोताः तान् तण्डुलकणान् पश्यन्तु। (लिङ्)

4. (अ) असमस्तपदानां समासो विधेयः -

| | | |
|---|---|---|
| सुखेन उपविष्टानाम् | = | ........................ |
| राज्ञः पुत्राः | = | ........................ |
| लघु (द्रुतं) पतनं यस्य सः | = | ........................ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चित्रग्रीव इति नाम यस्य सः = ........................
वृद्धश्चासौ व्याघ्रः = ........................
(ब) समस्तपदानां विग्रहः कार्यः -
राजप्रसादे = ........................
असाधनाः = ........................
गोदावरीतीरे = ........................
व्याकुलः = ........................
सपरिवारः = ........................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-
राजपुत्राः = ........................
यूयम् = ........................
धीमताम् = ........................
चन्द्रमसि = ........................
अस्माभिः = ........................
वृद्धव्याघ्रेण = ........................

6. कोष्ठके स्थितं शब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-
1. व्यसनेन च मूर्खाणां........... कलहेन वा।(निद्रा)
2. भवतां विनोदाय...........कथां कथयिष्यामि। (काककूर्मादि)
3. तत्रागत्य ........... पक्षिणो निवसन्ति।(रात्रि)
4. व्याधेन ........... विकीर्य जालं विस्तीर्णम्।(तण्डुलकण)
5. तण्डुलकणलोभेन ........... अपि तथा भवितव्यम्।(अस्मद्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# वृद्धव्याघ्र-पथिक-कथा

## तृतीयो भागः

**अहमेकदा दक्षिणारण्ये चरन्नपश्यम्- एको वृद्धो व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- 'भो भोः पान्थाः! इदं सुवर्णकङ्कणं गृह्यताम्'। ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्-**

**व्याख्या-**अहम्=चित्रग्रीवनामा कपोतराजः, एकदा=एकस्मिन् समये, दक्षिणारण्ये =दक्षिणदिग्भवे कानने, चरन्=गच्छन्, अपश्यम्=दृष्टवान्। एकः=एकाकी, वृद्धव्याघ्रः =जीर्णकेसरी, स्नातः=विहितस्नानादिकार्यः कुशहस्तः= दर्भपाणिः, सरस्तीरे= सरोवरस्य तटे, ब्रूते=कथयति, भो भोः पान्थाः=हे पथिकाः, इदम्=एतत् (मम पाणिस्थम्) सुवर्णकङ्कणम्=हेमवलयम्, गृह्यताम्=गृहणं क्रियताम्। ततः= तदनन्तरम्, लोभाकृष्टेन =लालसातिशयेन, केनचित्=केनापि, पान्थेन=पथिकेण (यात्रिणा) आलोचितम्= चिन्तितम्, भाग्येन=दृष्ट्या, (अदृष्टेन) एतत्=इदम् (सुवर्णवलयप्राप्तिः) सम्भवति= सञ्जायते। किन्तु=परन्तु, अत्र=अस्मिन् , आत्मसन्देहे= प्राणसंशयप्रदे, प्रवृत्तिः= प्रयत्नः, न विधेया=नैव करणीयः।

**व्याकरणम्-**

**समासः-**दक्षिणारण्ये=दक्षिणं चैतद् अरण्यं चेति दक्षिणारण्यम्, तस्मिन्। कुशहस्तः=कुशाः सन्ति हस्ते यस्य सः। सरस्तीरे=सरन्ति जलानि यस्मिन् इति सरः, तस्य तीरं सरस्तीरम्, तस्मिन्। लोभाकृष्टः=लोभेन आकृष्टः लोभाकृष्टः, तेन। आत्मसन्देहे- आत्मनः सन्देहः (प्राणविनाशशङ्का) यस्मिन् कार्ये वर्तते तद् आत्मसन्देहः, तस्मिन्।

**सन्धि-विच्छेदः-**दक्षिणारण्ये=दक्षिण+अरण्ये। चरन्नपश्यम् चरन्+ अपश्यम्। एको वृद्धो व्याघ्रः=एकः+वृद्धः+ व्याघ्रः। सरस्तीरे=सरः+तीरे। ततो लोभाकृष्टेन =ततः+लोभ+आकृष्टेन। प्रवृत्तिर्न=प्रवृत्तिः+न।

**प्रकृति प्रत्ययः-**चरन्=चर्+शतृ(अत्)वृद्धः=वृध्+क्त (त)। स्नातः=स्ना +क्त(त)। लोभाकृष्टेन= लोभाकृष्+क्त(त)+टा(इन)। पान्थेन=पथिन्+अण्(अ)+ टा(इन)। आलोचितम्=आ+लोच्+क्त(त) प्रवृत्तिः=प्र+ वृत्+क्तिन्(ति)।

यतः-

**अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।**
**यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥6॥**

**प्रसङ्गः-** अनिष्टादिष्टलाभः कदापि हितकरो न भवति।

**अन्वयः-**अनिष्टाद् इष्टलाभे अपि शुभा गतिः न जायते। यत्र विषसंसर्गः आस्ते तत् अमृतम् अपि मृत्यवे (भवति)।

**व्याख्या-**यतः=यतोहि अनिष्टात्=अशुभवस्तुनः, इष्टलाभेऽपि=अभिलषित- वस्तुप्राप्तेऽपि, शुभा=कल्याणप्रदा,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

गतिः=स्थितिः, न जायते=नैव भवति, यत्र=यस्मिन् (पदार्थे पात्रे वा) विषसंसर्गः=गरलसम्पर्कः, आस्ते=वर्तते, तत्= तादृशम्, अमृतम् अपि=मृत्युनिवारकमपि, मृत्यवे=मरणाय, अनिष्टाय एव भवतीति।

**व्याकरणम् -**

**समासः-**अनिष्टात्=न इष्टम् अनिष्टम्, तस्मात्। इष्टलाभे=इष्टस्य लाभः इष्टलाभः, तस्मिन्।

**संधि-विच्छेदः-** अनिष्टादिष्टलाभेऽपि = अनिष्टात् + इष्टलाभे + अपि। गतिर्जायते=गतिः+जायते। यत्रास्ते=यत्र+आस्ते। तदपि=तत्+अपि।

**प्रकृति प्रत्ययः-**अनिष्टात्=नञ्+इष्+क्त (त)+ङसि (आत्)। लाभे= लभ्+घञ्+ङि (इ)। गतिः=गम्+ क्तिन्(ति)। यत्र=यत्+त्रल् (त्र)।

छन्दः-अत्र अनुष्टुप् नामवृत्तं वर्तते।

किन्तु सर्वत्रार्थार्जनप्रवृत्तौ सन्देह एव तथा चोक्तम्।

**व्याख्या -** किन्तु=परन्तु, सर्वत्र=सर्वस्मिन् स्थाने, अर्थस्य=धनस्य पदार्थस्य वा, अर्जने=सङ्ग्रहे, प्रवृत्तिः=अभिलाषा, सन्देह एव=शङ्का विद्यते एव। तथा चोक्तं= कथितःI -

**व्याकरणम् -**

**समासः-**अर्थार्जने=अर्थस्य अर्जनम् अर्थाजनम्, तस्मिन्।

**सन्धि-विच्छेदः-**सर्वत्रार्थार्जनप्रवृत्तौ=सर्वत्र+अर्थाजनप्रवृत्तौ सन्देह एव= सन्देहः+एव।

**प्रकृति प्रत्ययः-**सर्वत्र=सर्व+त्रल् (त्र)। प्रवृत्तौ=प्र+वृत्+क्तिन् (ति) ङि (इ)। सन्देहः=सम्+दिह्+घञ् (अ)।

**न संशयमनारुह्य नरो भद्राणि पश्यति।**
**संशयं पुनरारुह्य यदि जीवति पश्यति॥7॥**

**प्रसङ्गः-**लोके साहसिकः पुरुषः स्वजीवने शुभानि फलानि लभते।

**अन्वयः-**नरः संशयम् अनारुह्य भद्राणि न पश्यति। पुनः संशयम् आरुह्य यदि जीवति (तदा) पश्यति।

**व्याख्या-**नरः=मनुष्यः, संशयम्=जीवनमरणसन्देहम्, अनारुह्य= अप्राप्य, भद्राणि=कल्याणानि, शुभानि वा, न पश्यति=नैव प्राप्नोति, पुनः=भूयः, संशयम्= जीवनमरणादिसन्देहम्, आरुह्य=अधिगम्य प्राप्य वा, यदि=चेत् जीवति=प्राणधारणं करोति, (तदा=तदानीम्) पश्यति=भद्राणि फलानि प्राप्नोति।

**व्याकरणम् -**

**समासः-**अनारुह्य=न आरुह्य।

**सन्धि-विच्छेदः-**नरो भद्राणि=नरः+भद्राणि। पुनरारुह्य=पुनः+आरुह्य।

**प्रकृति प्रत्ययः-**अनारुह्य=नञ्+आ+रुह्+ल्यप् (य)। नरः=नृ+अच्। आरुह्य=आ+रुह्+ल्यप् (य)।

छन्दः- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तन्निरूपयामि तावत्- प्रकाशं ब्रूते- 'कुत्र तव कङ्कणम्'? व्याघ्रो हस्तं प्रसार्य दर्शयति, पान्थोऽवदत्- कथं मारात्मके त्वयि विश्वासः? व्याघ्र उवाच- श्रृण, रे पान्थ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेक गोमानुषाणां वधाद् मे पुत्राः मृताः दाराश्च, वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमुपदिष्टः-'दानधर्मादिकं चरतु भवान्' इति। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः? यतः-**

**व्याख्या-** तत्=तस्मात् कारणात्, निरूपयामि=निश्चिनोमि, तावत्=तर्हि (यदस्य समीपे सुवर्णकङ्कणं वर्तते न वेति भावः) प्रकाशं ब्रूते=स्पष्टरूपेण यथा स्यात्तथा वदति, कुत्र=कस्मिन् स्थाने, तव=भवतः, कङ्कणम्=वलयम्, व्याघ्रः=सिंहः, हस्तं= पाणिम्, प्रसार्य=विस्तार्य, दर्शयति=(पथिकस्य कृते) अवलोकयति, पान्थः= पथिकः, अवदत्= अकथयत्, कथं=केन प्रकारेण, मारात्मके=घातुके, त्वयि=भवति (व्याघ्रे) विश्वासः=प्रतीतिः (प्रत्ययः) व्याघ्रः= शार्दूलः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उवाच=अवदत्, रे पान्थ!= अये पथिक! श्रृणु=आकर्णय, प्रागेव=पुराकाले एव, यौवनदशायाम्=युवावस्थायाम्, अहम् = व्याघ्रः, अतीव=अतिशयेन, दुर्वृत्तः=दुराचरणशक्तः, आसम्=अभूवम्, अनेकगोमानुषाणाम्=बहूनां धेनुमानवानाम्, वधात्=मारणात् मे=मम, पुत्राः=अपत्याः, दाराश्च= स्त्री च, मृताः=दिवंगताः, वंशहीनश्चाहम्=सन्ततिरहितोऽहम्, ततः=तदनन्तरम्, केनचित्=केनापि, धार्मिकेण=धर्मात्मना, अहम्=व्याघ्रः, उपदिष्टः=आज्ञयानुगृहीतः, दानधर्मादिकम्= दानधर्मादि-पुण्यकर्माणि, भवान्=त्वम्, चरतु=अनुतिष्ठतु, इति= एवम्, तदुपदेशात्=तस्य महापुरुषस्य आदेशात्, इदानीमहम्=साम्प्रतमहम्, स्नानशीलः =नित्यस्नानकर्ता, दाता=दानकर्ता, वृद्धः=अवस्थातीतः, गलितनखदन्तः= पतितनखदन्तः, कथं न=केन प्रकारेण नैव, विश्वासभूमिः=विश्वासयोग्यः, यतः=यतोहि।

**व्याकरणम् -**

**समासः-**मारात्मके=मारःस्वभावः यस्य सः मारात्मकः, तस्मिन्। यौवनदशायाम्=यूनो भावो यौवनम्, यौवनस्य दशा=यौवनदशा, तस्याम्। दुर्वृत्तः=दुष्टं वृत्तम् आचरणं यस्य सः। वंशहीनः=वंशेन हीनः। दानधर्मादिकम्=दानम् एव धर्मः दानधर्मः, दानधर्मः आदिः यस्य तत्। तदुपदेशात्=तस्य उपदेशः तदुपदेशः, तस्मात्। गलितनखदन्तः= नखाश्च दन्ताश्च नखदन्तम्, गलितं नखदन्तं यस्य सः।

**सन्धि-विच्छेदः-**तन्निरूपयामि=तत्+निरुपयामि। पान्थोऽवदत्=पान्थः+ अवदत्। प्रागेव=प्राक्+एव। दुर्वृत्त आसम्=दुर्वृत्तः+आसम्। पुत्रा मृता दाराश्च=पुत्राः+मृताः+दाराः+च वंशहीनश्चाहम्=वंशहीनः+च+अहम्। केनचिद् धार्मिकेणाहमुपदिष्टः=केनचित्+धार्मिकेण+अहम्+उपदिष्टः। तदुपदेशादिदानीमहम्=तत्+ उपदेशात् + इदानीम्+अहम्।

**प्रकृति प्रत्ययः-**प्रसार्य=प्र+सृ+णिच्(इ)ल्यप्(य)। विश्वासः=वि+श्वस् +घञ्। दुर्वृत्तः=दुर्+वृत्+क्त(त)। धार्मिकेण=धर्म+ठक्(इक)+टा(इन)। उपदिष्टः =उपदिश्+क्त। दाता=दा+तृच्(तृ)। बृद्धः=वृध्+क्त(त) उक्तम्=वच्+ क्त (त)।

**इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।**
**अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥8॥**

**प्रसङ्गः-** अत्र शास्त्रेषु वर्णिता धर्मस्य अष्टौ भेदाः अत्र परिगणिताः।

**अन्वयः-**इज्याध्ययनदानानि तपः सत्यं धृति क्षमा अलोभ इति अयं धर्मस्य अष्टविधः मार्गः स्मृतः।

**व्याख्या-** इज्या=क्रतुः (यज्ञः) अध्ययनम्=वेदशास्त्रादिपठनम्, दानं= सत्पात्रे दानम्, तानि=पूर्वोक्तान्येतानि, तपः=चान्द्रायणादिव्रतानुष्ठानम्, सत्यम्= तथ्यम्, ऋतं वा, धृतिः=धैर्यम्, क्षमा=सहनशीलता, अलोभः=लोभराहित्यम्, इति= एवंविधः, अयम्=एषः, धर्मस्य=पुण्यस्य, अष्टविधः=अष्टप्रकारकः, मार्गः=उपायः, स्मृतः=प्रतिपादितः।

**सरलार्थः-**विद्वांस इह लोके धर्मस्य अष्टौ पन्थानः प्रतिपादितवन्तः। तथाहि- यज्ञकरणम्, अध्ययनम्, सत्पात्रेषु दानम्, तपश्चरणम्, यथार्थकथनम्, धैर्यधारणम्, क्षमाशीलता, लोभाभावश्च चेति।

**व्याकरणम् -**

**समासः-**इज्याध्ययनदानानि=इज्या च अध्ययनं च दानं च इज्जाध्ययनदानम्, तानि। अष्टविधः=अष्टौ विधाः यस्य सः।

**सन्धि-विच्छेदः-**इज्याध्ययनदानानि=इज्या+अध्ययन+दानानि मार्गोऽयम् =मार्गः+अयम्। धर्मस्याष्टविधः= धर्मस्य+अष्टविधः।

**प्रकृति प्रत्ययः-**इज्या=इज्य+टाप् (आ)। अध्ययनम्=अधि+इ+ल्युट् (यु =अन)। दानानि=दा+ल्युट् (यु=अन)+जस् (अस्)। क्षमा=क्षम्+अङ्+टाप् (आ)। मार्गः=मृज्+घञ् (अ)। (उपधावृद्धिः रपत्वःा)। स्मृतः=स्मृ+ क्त (त)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

छन्दः- अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।**
**उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥9॥**

**प्रसङ्गः-** धर्मस्य अष्टविधवर्गेषु पूर्वस्य चत्वारो वर्गाः यशसे भवन्ति, तथोत्तरस्य चत्वारो महापुरुषेषु तिष्ठन्ति।

**अन्वयः-**तत्र पूर्वः चतुर्वर्गः दम्भार्थम् अपि सेव्यते, उत्तरः चतुर्वर्गः तु महात्मनि एव तिष्ठति।

**व्याख्या -** तत्र=पूर्वोक्तेषु अष्टप्रकारेषु, पूर्वः=प्रथमः, चतुर्वर्गः=यज्ञाध्ययनदानतपसां वर्गः, दम्भार्थमपि=यशः प्रतिष्ठाद्यर्थम्, सेव्यते=अनुष्ठीयते, उत्तरः चतुर्वर्गस्तु=चरमस्तु सत्यधृति-क्षमा-अलोभात्मकस्तु, महात्मनि=धार्मिके पुरुषे एव= निश्चयेन, तिष्ठति=वर्तते।

**सरलार्थः-**धर्मस्य अष्टविधमार्गेषु पूर्वस्थिताः यज्ञाध्ययनदानतपसः आत्मनः ख्यातिप्रतिष्ठादिवर्द्धनाय लोके आश्रीयते। परम् अपरस्थाः सत्यधैर्यक्षमासन्तोषाः इमे चत्वारो महापुरुषेषु एव तिष्ठन्ति।

**व्याकरणम् -**

**समासः-**चतुर्वर्गः-चतुर्णां वर्गः चतुर्वर्गः। दम्भार्थम्=दम्भाय इदम् इति। महात्मनि=महान् आत्मा यस्य स महात्मा, तस्मिन्।

**सन्धि-विच्छेदः-**पूर्वश्चतुर्वर्गो दम्भार्थमपि=पूर्वः+ चतुर्वर्गः+ दम्भार्थम्+ अपि। महात्मन्येव=महात्मनि+एव।

**प्रकृति प्रत्ययः-**तत्र=तत् +त्रल् (त्र)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**मम चैतावान् लोभविरहः, येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः।**

**व्याख्या-**मम=मे (व्याघ्रस्य) एतावान्=एतावन्मात्रम्, लोभविरहः=स्पृहाऽ-भावः,येन=येन हेतुना, स्वहस्तस्थमपि=निजपाणौविद्यमानमपि, सुवर्णकङ्कणम्= कनक-वलयम्, यस्मै कस्मैचित्=कस्मै पुरुषाय, दातुमिच्छामि= वितरितुमभिलषामि, तथापि =दानादिसत्कार्ये प्रवृत्तावपि, व्याघ्रः मृगपतिः, मानुषं=नरम्, खादतीति= भक्षयतीति, लोकापवादः=लोकोक्तिः, दुर्निवारः=कष्टातिशयेनापि निवारयितुं शक्यः।

**समासः-**लोभविरहः=लोभस्य विरहः। स्वहस्तस्थम्=स्वस्य हस्तः स्वहस्तः, स्वहस्ते तिष्ठतीति स्वहस्तस्थः, तम्। सुवर्णकङ्कणम्=सुवर्णस्य कङ्कणम्।

**संधि-विच्छेदः-**चैतावान्=च+एतावान्। तथापि=तथा+अपि। लोकापवादः =लोक+अपवादः। दुर्निवारः=दुर्+ निवारः।

**प्रकृति प्रत्ययः-**विरहः=वि+रह्+अच् (अ)। दातुम्=दा+तुमुन् (तुम्)। अपवादः=अप+वद्+घञ् (अ)। दुर्निवारः=दुर्+नि+वृ+णिच् (इ)+अच्।

यतः- **गताऽनुगतिको लोकः कुट्टनीमुपदेशिनीम्।**
**प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजम्॥10॥**

**प्रसङ्गः-** अयं लोकः अन्धपरम्परामनुसरति।

**अन्वयः-**गतानुगतिकः लोकः यथा गोघ्नम् अपि द्विजम्, धर्मे प्रमाणयति, तथा उपदेशिनीम् अपि कुट्टिनीं धर्मे नो प्रमाणयति।

**व्याख्या-** यतः=यतोहि, गतानुगतिकः=पूर्वजानुसृतमार्गानुयायी, लोकः= जनः, यथा=येनप्रकारेण, गोघ्नमपि=गोहत्याकारिणमपि, द्विजम्=ब्राह्मणम्, धर्मे= धर्मनिर्धारणविषये, प्रमाणयति=प्रमाणीकरोति, तथा=तेनैव प्रकारेण, उपदेशिनीम् अपि =उपदेशप्रदायिनीमपि, कुट्टिनीम्=कुलटां स्त्रीम्, धर्मे=धर्मनिर्धारणे, नो प्रमाणयति= नैव विश्वसिति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सरलार्थः**-अयं लोको गतानुगतिकोऽस्ति। धर्मविषये यथा गोघ्नस्य ब्राह्मणस्य वचनं प्रमाणयति तथा उपदेशिन्याः कुटिन्याः वचनं न कोऽपि प्रमाणरूपेणाङ्गीकरोति।

**व्याकरणम् -**

**समासः**-गतानुगतिकः=गतस्य मार्गस्यानुगतिः अनुसरणं यत्र सः। लोकः= लोकानां समुदायः। गोघ्नम्=गां हन्तीति गोघ्नः, तम्।

**सन्धि-विच्छेदः**-गतानुगतिको लोकः=गत+अनुगतिकः+लोकः। गोघ्नमपि=गोघ्नम्+अपि।

**प्रकृति प्रत्ययः**-गतस्य=गम्+क्त (त)+ङस् (स्य)। लोकः = लोक् + घञ् (अ)। गोघ्नम्=गो+हन्+क(अ)+अम् ।

छन्दः-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**मया च धर्मशास्त्राणि अधीतानि। श्रृणु -**

**व्याख्या -** मया च=व्याघ्रेण च, धर्मशास्त्राणि=धर्मप्रतिपादकानि शास्त्राणि, अधीतानि=पठितानि। श्रृणु=श्रवणं कुरु, आकर्णय वा।

**समासः**-धर्मशास्त्राणि=धर्मस्य शास्त्रं धर्मशास्त्रं, तानि।

**प्रकृति प्रत्ययः**-शास्+ष्ट-न् (त्र)+जस्(अस्)। अधीतानि=अधि+इ+क्त +जस् (अस्)।

**मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा।**
**द्ररिद्रे दीयते दानं सफलं पाण्डुनन्दन॥11॥**

**प्रसङ्गः**- अत्र धर्मशास्त्राणां व्याजेन व्याधः पथिकं स्वाधीनं कर्तुमिच्छति।

**अन्वयः**-हे पाण्डुनन्दन! यथा मरुस्थल्यां वृष्टिः (सफला भवति) (यथा च) क्षुधार्ते भोजनं सफलं (भवति) तथा दरिद्रे (यत्) दानं दीयते (तत्) सफलं भवति।

**व्याख्या -** हे पाण्डुनन्दन !=हे पाण्डुपुत्र! (युधिष्ठिर!) यथा=येन प्रकारेण, मरुस्थल्यां=जलरहितप्रदेशे मरुभूमौ वा, वृष्टिः=वर्षणम् (सफला भवति=सफलं जायते)। (यथा च=येन प्रकारेण) क्षुधार्ते=बुभुक्षा पीडिते प्राणिनि, भोजनम्=खाद्य वस्तु (सफलं भवति=सार्थकं भवति)तथा दरिद्रे=तेनैव प्रकारेण निर्धने, (यत्) दानं दीयते=यद्देयं द्रव्यं वितीर्यते, तत्=दानम्, सफलं भवति=फलदायकं भवति।

**सरलार्थः**-हे युधिष्ठिर! येन प्रकारेण मरुभूमौ वृष्टिः सफला भवति, क्षुधार्ताय प्रदत्तं भोजनं सफलं भवति, एवःा दरिद्राणां कृते दत्तं दानमपि सफलं मन्यते।

**व्याकरणम् -**

**समासः**-क्षुधार्ते=क्षुधया आर्तः क्षुधार्तः, तस्मिन्। पाण्डुनन्दनः=पाण्डोः (एतदाख्यो राज्ञः) (नन्दयतीति नन्दनः) नन्दनः (पुत्रः)।

**संधि-विच्छेदः**-क्षुधार्ते=क्षुधा+आर्ते।

**प्रकृति प्रत्ययः**-वृष्टिः=वृष्+क्तिन् (ति)। भोजनम्=भुज्+ल्युट् (यु=अन)। नन्दनः=नन्द्+ल्युट् (यु=अन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि ते तथा।**
**आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः॥12॥**

**प्रसङ्गः**- महापुरुषाः प्राणिमात्रेषु आत्मौपम्येन दयां कुर्वन्ति।

**अन्वयः**-यथा आत्मनः प्राणाः अभीष्टाः (भवन्ति) तथा भूतानाम् अपि ते (भवन्ति) साधवः आत्मौपम्येन भूतानामपि दयां कुर्वन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या-**यथा=येन प्रकारेण, आत्मनः=स्वस्य, प्राणाः=असवः, अभीष्टाः =अतिशयप्रियाः (भवन्ति= जायन्ते) तथा=तेनैव प्रकारेण, भूतानामपि=प्राणीनामपि, ते =प्राणाः, अभीष्टाः=इष्टाः(भवन्ति=जायन्ते) साधवः= सज्जनाः, आत्मौपम्येन= आत्मसदृशेन, भूतानामपि=प्राणिमात्रेष्वपि, दयां कुर्वन्ति=कृपां विदधति।

**सरलार्थः-**येन प्रकारेण आत्मनः प्राणाः स्वस्य कृते अभीष्टाः भवन्ति, तथैव सर्वेषां भूतानां कृतेऽपि प्राणाः अभीष्टा भवन्ति। एतदर्थं महापुरुषाः आत्मसदृशैव भूतेष्वपि दयां कुर्वन्ति।

**व्याकरणम् -**

**समासः-**आत्मौपम्येन=उपमायाः भावः औपम्यम्, आत्मनः औपम्यम् आत्मौपम्यं, तेन।

**संधि-विच्छेदः-**प्राणा यथाऽऽत्मनोऽभीष्टाः=प्राणाः+यथा+आत्मनः+ अभीष्टाः। आत्मौपम्येन=आत्मा= औपम्येन।

**प्रकृति प्रत्ययः-**अभीष्टाः=अभि+इष्+क्त(त)+जस्+(अस्)। औपम्येन-उपमा+ष्यञ् (य)+टा (इन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः। - **प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये।**
**आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति॥13॥**

**प्रसङ्गः-**सज्जनाः किमर्थं प्राणिषु दयां कुर्वन्तीति प्रतिपादयन् कथयति यत् -

**अन्वयः-**पुरुषः प्रत्याख्याने दाने च सुखदुःखे प्रियाप्रिये च आत्मौपम्येन प्रमाणमधिगच्छति।

**व्याख्या-** अपरः।=तथा च, पुरुषः=सज्जनः, प्रत्याख्याने=तिरस्कारे, दाने च धनार्पणे च, सुखदुःखे= इन्द्रियानुकूलप्रतिकूलत्वानुभवे, प्रियाप्रिये च=इष्टानिष्टे च, आत्मौपम्येन=स्वसादृश्येन, प्रमाणम्=दृष्टान्तम्, अधिगच्छति=प्राप्नोति, जानाति वा।

**सरलार्थः-**आत्मनः तिरस्कारे, धनागमे, सुखदुःखे इष्टानिष्टे च आत्मवत् सर्वे प्राणिन अनुभवन्ति। इत्थमेव विचार्य सज्जनाः प्राणिषु दयां कुर्वन्ति।

**व्याकरणम् -**

**समासः-**सुखदुःखे=सुखं च दुःखं चेति तयोः समाहारः सुखदुःखम्, तस्मिन्। प्रियाऽप्रिये=प्रियं च अप्रियं च तयोः समाहारः प्रियाप्रियम्, तस्मिन्। आत्मौपम्येन=आत्मनः स्वस्य औपम्येन सादृश्येन।

**सन्धि-विच्छेदः-**प्रियाप्रिये=प्रिय+अप्रिये। आत्मौपम्येन=आत्मा+औपम्येन।

**प्रकृति प्रत्ययः-** प्रत्याख्याने = प्रति + आ + ख्या+ल्युट्(यु=अन)+ङि। प्रमाणम् = प्र+माङ्+ल्युट् (यु=अन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अन्यच्च - मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः॥14॥**

**प्रसङ्गः-** अत्र महापुरुषस्य लक्षणं प्रतिपादितम्।

**अन्वयः-**यः परदारेषु मातृवत् परद्रव्येषु लोष्ठवत् सर्वभूतेषु आत्मवत् पश्यति सः पण्डितः (अस्ति)।

**व्याख्या-**यः=पुरुषः, परदारेषु=परकलत्रेषु, मातृवत्=स्वजननीवत्, परद्रव्येषु =परेषां धनसम्पत्तिसु, लोष्ठवत् मृत्तिकाखण्डानीव, सर्वभूतेषु=अखिलप्राणिषु, आत्मवत्=आत्मसदृशः, पश्यति=अवलोकयति मन्यते वा, स पण्डितः= पूर्वोक्त गुण-सम्पन्नः, विद्वान्, (अस्ति=वर्तते)।

**सरलार्थः-**यः पुरुषः परकलत्रं स्वजननीवद् अवगच्छति परेषां धनैश्वर्यादिकं मृत्तिकाखण्डमिव मनुते, सर्वेषु प्राणिषु आत्मतुल्यं व्यवहरति, यथार्थतः स एव नरो विद्वान् अस्तीति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम् -**

**समासः-**परदारेषु=परेषां दाराः परदाराः तेषु। परद्रव्येषु=परेषां द्रव्याणि परद्रव्याणि, तेषु। लोष्ठवत्=लोष्ठेषु इव इति। आत्मवत्=आत्मनि इव इति आत्मवत्।

**सन्धि-विच्छेदः-**अन्यच्च=अन्यत्+च। स पण्डितः=सः+पण्डितः।

**प्रकृति प्रत्ययः-**द्रव्येषु=द्रु+यत् (य)+सुप् (सु)। लोष्टम्, लोष्टः=लुष्+ तन् (त) टकारठकारावुभौ लभ्येते। पण्डितः=पण्डा+इतच् (इत)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**त्वं चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम्।**

**तथा चोक्तम् -**

**व्याख्या -** त्वं च=भवान् च, अतीव=अतिशयेन, दुर्गतः=दुःखावस्थायां स्थितः, तेन = तेन कारणेन, तत् = तत्सुवर्णवलयम्, तुभ्यं = भवतः कृते, दातुं= प्रदानार्थम्, सयत्नः=प्रयासरतः, अहम्=व्याघ्रोऽस्मि। तथा च=अपि च, उक्तम्= कथितम्।

**समासः-**सयत्नः=यत्नेन सहितः।

**संधि-विच्छेदः-**चातीव=च+अतीव। दुर्गतः=दुर्+गतः सयत्नोऽहम्= सयत्नः+अहम्।

**प्रकृति प्रत्ययः-**दुर्गतः=दुर्+गम्+क्त (त)। दातुम्=दा+तुमुन् (तुम्)। सयत्नः=सह (स) यत्+ नङ् (न)।

**दरिद्रान् भर कौन्तेय! मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः॥15॥**

**प्रसङ्गः-** अत्र व्याघ्रः स्वर्णाभूषणं दातुं पथिकमुत्साहयति।

**अन्वयः-**हे कौन्तेय! दरिद्रान् भर, ईश्वरे धनं मा प्रयच्छ (यतः) औषधं व्याधितस्य पथ्यं (भवति) नीरुजस्य औषधेः किम् (प्रयोजनम् अस्ति)।

**व्याख्या -** हे कौन्तेय=हे कुन्तीपुत्र युधिष्ठिर! दरिद्रान्=सम्पत्तिरहितान्, भर =अन्नवस्त्रधनादिना प्रतिपालय, ईश्वरे=अर्थसम्पन्ने पुरुषे, धनं=वित्तम्, मा प्रयच्छ=न देहि, (यतः=यतोहि) औषधम्=भेषजम्, व्याधितस्य=रुजापीडितस्य, पथ्यं=हितं, कल्याणकरं वा, (भवति=जायते) नीरुजस्य=व्याधिरहितस्य, औषधैः किम्=भेषजैः को लाभो भवतीत्याशयः।

**सरलार्थः-**हे युधिष्ठिर! त्वं निर्धनेभ्यो जनेभ्यः अन्नवस्त्रधनादीनि च प्रयच्छ, परं धनिकेभ्यो धनं मा देहि। यतोहि गदार्त्तस्य जनस्य कृते भेषजं हितकरं भवति, अरुग्णानां कृते तु भेषजं निष्प्रयोजनमेव।

**व्याकरणम् -**

**समासः-**हे कौन्तेय ! कुन्त्याः अपत्यं पुमान् कौन्तेयः तत्सम्बुद्धौ। व्याधितस्य=व्याधिः संजातोऽस्य इति व्याधितः, तस्य। नीरुजस्य=नास्ति रुजा यस्य स नीरुजः, तस्य।

**सन्धि-विच्छेदः-**प्रयच्छेश्वरे=प्रयच्छ+ईश्वरे। व्याधितस्यौषधम्=व्याधितस्य+औषधम्। किमौषधैः=किम्+ औषधैः।

**प्रकृति प्रत्ययः-** दरिद्रान्=दरिद्रा+क(अ)+शस्(अस्)। कौन्तेयः=कुन्ती +ढक् (एय)। व्याधितस्य=व्याधि+ इतच् (इत)+ ङस् (स्य)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **दातव्यमिति यद्दानं दीयतेऽनुपकारिणि।**
**देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम्॥16॥**

**प्रसङ्गः-**अत्र निःस्वार्थभावनया दत्तं दानं सात्त्विकं दानमस्तीति प्रतिपादितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**-दातव्यम् इति यद् दानं देशे काले च अनुपकारिणि पात्रे दीयते तत् दानं (बुधैः) सात्विकं स्मृतम्।

**व्याख्या**- अन्यच्च=अपि च, दातव्यम्=दातुं योग्यम्, इति=यावत्, यद् दानम्=यद् धनादिदानम्, देशे=काश्यादितीर्थस्थलेषु, काले च=सूर्यचन्द्रादिग्रहणसमये च, अनुपकारिणि=प्रत्युपकाररहिते, पात्रे=सत्पात्रे, दीयते=प्रदानं क्रियते, तद्दानम्=तद् वितरणवस्तु, सात्विकम्=पुण्यजनकम्, स्मृतम्=शास्त्रेषु कथितम्।

**सरलार्थः**-एतद् दातव्यमस्तीति भावनया यद् दानं काशीप्रयाग-पुष्करादितीर्थस्थलेषु तथा सूर्यचन्द्रादिग्रहणकाले पर्वणि च सत्पात्रेषु ब्राह्मणादिषु दीयते तद्दानमेव विद्वद्भिः सात्त्विकं दानं कथितम्।

**व्याकरणम्-**

**समासः**-अनुपकारिणि=उपकारः (प्रतिलाभः) अस्ति अस्य इति उपकारी, स न भवतीति अनुपकारी, तस्मिन्।

**सन्धि-विच्छेदः**-यद्दानम्=यत्+दानम्। दीयतेऽनुपकारिणि=दीयते+अनुपकारिणि।

**प्रकृति प्रत्ययः**-दातव्यम्=दा+तव्यत् (तव्य)। सात्त्विकम्=सत्त्व+ठक् (इक)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण। ततो यावदसौ तद्वचः प्रतीतो लोभात् सरः स्नातुं प्रविष्टः तावन्महापङ्के निमग्नः पलायितुमक्षमः। तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्- 'अहह! महापङ्के पतितोऽसि! अतस्त्वामहमुत्थापयामि' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्-**

**व्याख्या** - तत्=तस्माद्धेतोः, अत्र=अस्मिन्, सरसि=तडागे, सरोवरे वा, स्नात्वा=स्नानं कृत्वा, सुवर्णकङ्कणं=कनकवलयम्, गृहाण=स्वीकुरु। ततः=तद्वचनानन्तरम्, (तस्य=व्याघ्रस्य) यावदसौ=यावत्काले स पथिकः, तद्वचः=तस्य =व्याघ्रस्य वचनम्, प्रतीतः=विश्वस्तः सन्, लोभात्=लोभाकृष्टात्, सरः स्नातुं=सरोवरे स्नानं कर्तुम्, प्रविशति=प्रवेशं करोति, तावत् तस्मिन्नेव क्षणे, महापङ्के=घोरे कर्दमे, निमग्नः= पतितः, पलायितुमक्षमः= पलायनेऽसमर्थोऽभूदिति। तं=पथिकम्, पङ्के=कर्दमे, पतितं= निमग्नम्, दृष्ट्वा=अवलोक्य, व्याघ्रः=मृगपतिः, अवदत्=अकथयत्, अहह= अयमव्ययशब्दः खेदेऽर्थे, महापङ्के=घोरे कर्दमे, पतितोऽसि=निमग्नोऽसि, अतः= अस्मात् कारणात्, त्वामुत्थापयामि=भवन्तं महाकर्दमाद् बहिर्निस्सारयामि, इत्युक्त्वा= इत्थं कथयित्वा, शनैः शनैः=मन्दं मन्दम्, उपगम्य=समीपं गत्वा, तेन व्याघ्रेण=पूर्वोक्तेन वृद्धशार्दूलेन, धृतः=गृहीतः, पान्थः= पथिकः, अचिन्तयत्=अविचारयत्।

**व्याकरणम् -**

**समासः**-सुवर्णकङ्कणम्=सुवर्णस्य कङ्कणम्। महापङ्के=महांश्चासौ पङ्कः महापङ्कः, तस्मिन्। निमग्नः=नितराम् (अतीव गहने कर्दमे) मग्नः।

**संधि-विच्छेदः**-तदत्र=तत्+अत्र। ततो यावदसौ=ततः+यावत्+असौ। तावन्महापङ्के=तावत्+महापङ्के। व्याघ्रोऽवदत्=व्याघ्रः+अवदत्। अतस्त्वामहमुत्थापयामि=अतः+त्वाम्+अहम्+उत्थापयामि। इत्युक्त्वा = इति + उक्त्वा। शनैरुपगम्य= शनैः+उपगम्य पान्थोऽचिन्तयत्=पान्थः+अचिन्तयत्।

**प्रकृति प्रत्ययः**-स्नात्वा=स्ना+क्त्वा (त्वा)। प्रतीतः=प्रति+इ+क्त (त)। प्रविष्टः=प्रविश्+क्त(त)। निमग्नः=नि+मस्ज्+क्त (त)। पलायितुम्=परा+अय्+ तुमुन् (तुम्) रस्य लत्वःात्र भवति। पतितं=पत्+क्त(त)। दृष्ट्वा=दृश्+क्त्वा (त्वा)। उपगम्य=उप+गम्+ल्यप् (य)। धृतः=धृ+क्त (त)। किन्तु सर्वत्रार्थार्जने प्रवृत्तिः सन्देह एव। तथा चोक्तम् - **न धर्मशास्त्रं पठतीति कारणं,**

**न चापि वेदाध्ययनं दुरात्मनः।**

**स्वभाव एवात्र तथाऽतिरिच्यते,**

**यथा प्रकृत्या मधुरं गवां पयः॥**17॥

**प्रसङ्गः**- 'स्वभावो दुरतिक्रमः' इत्यभिप्रायस्य स्थापनात्र जाता।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**-दुरात्मनः(विचारपरिवर्तने)धर्मशास्त्रं पठतीति कारणं न, (भवति) न च वेदाध्ययनम् अपि कारणं (भवति) (किन्तु) अत्र स्वभाव एव तथा अतिरिच्यते यथा गवां पयः प्रकृत्या मधुरं (भवति)।

**व्याख्या** - दुरात्मनः=दुष्टजनस्य, (विचारपरिवर्तने=आशयस्य परिवर्तने) धर्मशास्त्रम्=धर्मप्रतिपादकं शास्त्रम्, पठतीति=तदधीते इत्यपि, कारणं=हेतुः, न=नैव (भवति=जायते) न च=तथा नैव, वेदाध्ययनमपि=ऋग्वेदादिपठनम् अपि, कारणं= निमित्तम् (भवति=जायते) (किन्तु=परन्तु) अत्र=हृदयपरिवर्तने, स्वभाव एव= जन्मजातप्रकृतिरेव, तथा=तेन प्रकारेण, अतिरिच्यते=मुख्यं कारणं भवति, यथा=येन प्रकारेण, गवां=धेनूनाम्, पयः=दुग्धम्, प्रकृत्या=स्वभावेन, मधुरं= स्वादु, (भवति= जायते)।

**सरलार्थः**-एष धर्मशास्त्रं पठति तथा चायं वेदाध्ययनं करोति, एतदर्थम् एष दुरात्मा सज्जनोऽभवद् इत्येतच्चिन्तनं नोचितम्, यतो हि स्वभावः सर्वान् अतिरिच्यते, तस्यातिक्रमणं दुष्करमस्ति, येन प्रकारेण धेनूनां पयः प्रकृत्यैव मधुरं भवति, तथैव दुरात्मनोऽपि स्वभावतो दुष्टाः भवन्ति।

**व्याकरणम्** -

**समासः**-धर्मशास्त्रम्=धर्मस्य प्रतिपादकं शास्त्रम्, वेदाध्ययनम्=वेदस्य अध्ययनम्। दुरात्मनः=दु=दुष्टः आत्मा यस्य स दुरात्मन्, तस्य।

**सन्धि-विच्छेदः**-पठतीति=पठति+इति। चापि=च+अपि। एवात्र=एव+ अत्र। तथातिरिच्यते=तथा+ अतिरिच्यते।

**प्रकृति प्रत्ययः**-अध्ययनम्=अधि+इ+ल्युट् (यु=अन)। प्रकृत्या=प्र+कृ+ क्तिन् (ति)+टा। अत्र=इदम्+ त्रल् (त्र)।

**छन्दः**-अत्र वंशस्थ नामवृत्तं वर्तते।

किंच - **अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।**
**दुर्भगाभरणं प्रायो ज्ञानं भारः क्रियां विना॥18॥**

**प्रसङ्गः**-अत्र क्रिया ज्ञानं विना नूनं भारभूता भवतीति प्रतिपादितम्।

**अन्वयः**- अवशेन्द्रियचित्तानां क्रिया हस्तिस्नानम् इव (निष्फला भवति) क्रियां विना ज्ञानं दुर्भगाभरणप्रायः भारः (भवति)।

**व्याख्या**-किंच = एतदतिरिक्तम्, अवशेन्द्रियचित्तानाम् = अवशीभूतानामन्तःकरणेन्द्रियाणाम्, क्रिया = सन्ध्यावन्दनयज्ञादिका समस्ता क्रिया, हस्तिस्नानमिव= गजस्नानमिव, (निष्फला भवति=प्रयोजनहीना जायते) क्रियां विना=यज्ञानुष्ठानाद्याचरणम् अन्तरा, ज्ञानं=धर्मादिबोधः, दुर्भगाभरणप्रायः=विधवास्त्रीधारिताभूषणानीव, भारः= निष्फलमेव, भवति=जायते।

**सरलार्थः**-येषां पुरुषाणामिन्द्रियाणि चेतांसि चावशीभूतानि सन्ति, तेषां नराणामखिलाः क्रियाः गजस्नानमिव निरर्थकं भवति। उचितां क्रियां विना ज्ञानं तथैव भारभूतं भवति यथा दुर्भगाभरणं तत्कृते निष्फलमेव भवतीति।

**विशेषः**-येन प्रकारेण गजः स्नानान्तरं धूलिप्रक्षेपेण पुनः स्वशरीरं मलिनं करोति, अतस्तस्य कृते जलस्नानं निरर्थकं भवति। तद्वदेव ये जनाः नित्यनैमित्तिक-क्रियानन्तरं धर्माचरणं न कुर्वन्ति तेषामपि अखिलाः क्रियाः निष्फलाः भवन्ति।

**व्याकरणम्** -

**समासः**- अवशेन्द्रियचित्तानाम्=अवशानि इन्द्रियाणि चित्तानि च येषां ते, तेषाम्। हस्तिस्नानमिव=हस्तिनः स्नानमिव (हस्तः=शुण्डादण्डः अस्ति यस्य स हस्ती) दुर्भगाभरणप्रायः=भगं पतिसौभाग्यम्, दुः नास्ति पतिसौभाग्यरूपं भगं यस्याः सा दुर्भगा (विधवा) तस्याः आभरणं तत्प्रायः।

**सन्धि-विच्छेदः**-किंच=किम्+च।अवशेन्द्रियचित्तानाम्=अवश+इन्द्रिय-चित्तानाम्। दुर्भगाऽऽभरणप्रायोज्ञानम्= दुर्भगा+आभरणप्रायः+ज्ञानम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः**-इन्द्रियम्=इन्द्र+घ (इय)। आभरणम्=आ+भृ+ल्युट् (यु=अन)। ज्ञानम्=ज्ञा+ल्युट् (यु=अन)। भारः=भृ+घञ् (अ)।

छन्दः-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तन्मया भद्रं न कृतम्, यदत्र मारात्मके विश्वासः कृतः। तथा चोक्तम् -**

**व्याख्या:**-तत्=तस्मात् कारणात्, मया=पथिकेन, भद्रं=मङ्गलमयम्, न कृतं=नैवाचरितम्, यदत्र=यदस्मिन्, मारात्मके=हिंसके, विश्वासः=प्रतीतिः, कृतः=विहितः। तथा चोक्तम्=कथितः। -

**सन्धि-विच्छेदः**-तन्मया=तत्+मया। यदत्र=यत्+अत्र। चोक्तम्=च+उक्तम्।

**प्रकृति प्रत्ययः**-कृतम्=कृ+क्त (त)। विश्वासः=वि+श्वस्+घञ् (अ)।

**सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।**
**अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते॥**19॥

**प्रसङ्गः**-अत्र स्वभावातिक्रमणं कर्तुं न कोऽपि समर्थो भवतीति वर्णितम्।

**अन्वयः**-हि (लोके) सर्वस्य स्वभावाः परीक्ष्यन्ते, इतरे गुणाः न। हि सर्वान् गुणान् अतीत्य स्वभावः मूर्ध्नि वर्तते।

**व्याख्या:**-अपरः।=अपि च, हि=निश्चयेन (लोके=जगति) सर्वस्य= अखिलस्य जनस्य, स्वभावाः=प्रकृतयः, परीक्ष्यन्ते=सम्यक् प्रकारेण विचार्यन्ते, इतरे= अन्ये, गुणाः न=दयादाक्षिण्यादयो न, हि=यतोहि, स्वभावः=प्रकृतिः, सर्वान् गुणान्= अखिलान् विद्यादीन् अपि श्रेष्ठतमान् गुणान्, अतीत्य=अतिक्रम्य, स्वभावः= मूलप्रकृतिः, मूर्ध्नि=मस्तके (सर्वोपरि इति भावः) वर्तते=विद्यते।

**सरलार्थः**-लोके सर्वेषां पुरुषाणां स्वभावस्यैव परीक्षा भवति नान्येषां दयादाक्षिण्यादि गुणानाम्। यतोहि स्वभावः सर्वान् गुणान् अतिक्रम्य तिष्ठति। अत एव ज्ञायते यत् स्वभावः सर्वगुणोपरि वर्तते।

**व्याकरणम्-**

**समासः**-नेतरे=न इतरः नेतरः, ते।

**सन्धि-विच्छेदः**-स्वभावा नेतरे, स्वभावाः+न+इतरे। स्वभावो मूर्ध्नि= स्वभावः+मूर्ध्नि।

**प्रकृति प्रत्ययः**-परीक्ष्यते=परि+ईक्ष्+यक्+झ (अन्त)। अतीत्य=अति+इ +(तुक्=त्) ल्यप् (य)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च- **स हि गगन विहारी कल्मषध्वंसकारी,**
**दशशतकरधारी ज्योतिषां मध्यचारी।**
**विधुरपि विधियोगाद् ग्रस्यते राहुणाऽसौ,**
**लिखितमपि ललाटे प्रोज्झितुं कः समर्थः॥**20॥

**प्रसङ्गः**-अत्र भाग्यमेव लोके बलवद् भवतीति समर्थितम्।

**अन्वयः**-स हि गगनविहारी, कल्मषध्वंसकारी, दशशतकरधारी, ज्योतिषां मध्यचारी, असौ विधुः अपि विधियोगाद् राहुणा ग्रस्यते, ललाटे लिखितं प्रोज्झितुम् अपि कः समर्थः (भवति)।

**व्याख्या:**- अन्यच्च=अपरः। स हि=प्रसिद्धः सः, गगनविहारी=व्योम-विहरणशीलः, कल्मषध्वंसकारी= सर्वान्धकारविनाशकः, दशशतकरधारी=सहस्ररश्मियुक्तो भास्करः, ज्योतिषाम्=नक्षत्राणाम्, मध्यचारी= मध्यविहरणशीलः, असौ विधुः अपि=एष ओषधीशः अपि, विधियोगाद्=दैववशात्, राहुणा=विधुन्तुदेन, ग्रस्यते= ग्रहणं क्रियते, (अतः=) ललाटे=मस्तके भाले वा, लिखितम्=विधिनाऽङ्कितम्, प्रोज्झितुम्=अन्यथा कर्तुम्, कः समर्थः=कोऽपि सक्षमो नास्ति।

**सरलार्थः**-यो विधुः आकाशे विहरति यः तमो विनाशयति, यः सहस्ररश्मिसम्पन्नोऽस्ति, तथा यो नक्षत्राणां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मध्ये, गृहाणां:ा मध्ये विराजते, एतादृशौ शक्तिसम्पन्नौ सूर्यचन्द्रौ अपि राहुणागृस्येते। अत एव निश्चीयते यद् ललाटे बृह्मणा यन्निर्धारितं तदन्यथा कर्तुं न कोऽपि प्रभुरस्ति।

**व्याकरणम् -**

**समासः**-गगनविहारी=गगने विहर्तुं शीलमस्य इति । कल्मषध्वंसकारी= कल्मषस्य (तमसः, पापस्य वा) ध्वंसं करोतीति। दशशतकरधारी=दशाऽवृतं शतं (सहस्रम्) करान् (रश्मीन्) धरतीति। मध्यचारी=मध्ये चरतीति।

**सन्धि-विच्छेदः**- विधुरपि = विधुः + अपि। राहुणाऽसौ=राहुणा+असौ। लिखितमपि =लिखितम्+अपि।

**प्रकृति प्रत्ययः**-विहारी=वि+हृ+णिनि(इन्)। चारी=चर्+णिनि(इन्)। योगात् =युज्+घञ् (अ) कुत्वःा। प्रोज्झितुम्=प्र+उज्झ्+तुमुन् (तुम्)। समर्थः=सम्+अर्थ+ अच् (अ)।

**छन्दः**-अत्र मालिनी नामवृत्तं वर्तते।

**लक्षणम् -** ननमययुतेयं मालिनीभोगिलोकैः।

**इति चिन्तयन्नेवाऽसौ व्याघ्रेण धृत्वा व्यापादितः खादितश्च। अतोऽहं बृवीमि (कङ्कणस्य तु लोभेन) इत्यादि।**

**व्याख्या -** इति=पूर्वोक्तप्रकारेण, चिन्तयन्नेव=विचारयन्नेव, असौ=एष पथिकः, व्याघ्रेण=वृद्धमृगराजेन, व्यापादितः=मारितः, खादितश्च=भक्षितश्च। अतः= अस्मात् कारणात् (यो जनोऽविचार्य्य कर्म करोति स मृत्युमुखं याति, अस्माद्धेतोः) अहम्=कपोतराजः, बृवीमि=कथयामि, कङ्कणस्य तु=सुवर्णवलयस्य तु, लोभेन= अभिलाषया इत्यादि।

**व्याकरणम् -**

**सन्धि-विच्छेदः**- चिन्तयन्नेवासौ = चिन्तयन् + एव + असौ। खादितश्च= खादितः+च।

**प्रकृति प्रत्ययः**-चिन्तयन्=चिन्त्+णिच् (इ)+शतृ (अत्)। धृत्वा=धृ+क्त्वा (त्वा)। व्यापादितः=वि+आ+पद्+णिच् (इ)+क्त (त)। खादितः=खाद्+क्त (त)।

## अभ्यासार्थ-प्रश्नाः

**बहुचयनात्मकप्रश्नाः -**

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

(अ) पात्रताम्  (ब) विनयम्  (स) धनम्  (द) धर्मम्  ( )

1. धर्मस्यायं मार्गः स्मृतः -
(अ) षट्विधः  (ब) प:ाविधः  (स) अष्टविधः  (द) त्रिविधः  ( )

2. साधवो दयां कुर्वन्ति-
(अ) भूतेषु  (ब) वृक्षेषु  (स) पाषाणेषु  (द) अन्नेषु  ( )

3. पण्डितो लोष्ठवत् पश्यति-
(अ) नृपद्रव्येषु  (ब) निजद्रव्येषु  (स) निर्धनद्रव्येषु  (द) परद्रव्येषु  ( )

4. पथिकः स्नात्वा सुवर्णकङ्कणं गृह्णाति-
(अ) सागरे  (ब) सरसि  (स) कूपे  (द) नद्याम्  ( )

5. प्रायः ज्ञानं भारं भवति-
(अ) पुरुषं विना  (ब) धनं विना  (स) क्रियां विना  (द) ज्ञानं विना  ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

6. धियोऽपि मलिना भवन्ति-

(अ) स्त्रीणाम् (ब) बालानाम् (स) पशूनाम् (द) पुंसाम् ( )

**अतिलघूत्तरात्मक प्रश्नाः -**

1. वृद्धो व्याघ्रः स्नात्वा किं ददाति?
2. कदा अमृतं मृत्यवे भवति?
3. मित्रलाभे धर्मस्य कतिविधो मार्गः स्मृतः?
4. वृष्टिः, भोजनं दानः। कुत्र सफलं भवति।
5. पुरुषं कथं प्रमाणमधिगच्छति ?
6. पथिकः कथं सुवर्णकङ्कणं गृह्णाति?
7. स्वभावः किं कृत्वा मूर्ध्नि तिष्ठति?
8. सुशासिता स्त्री कदा विक्रियां न याति?
9. वृद्धानां वचनं कदा ग्राह्यं भवति ?
10. भूतले शङ्काभिः किं-किंमाक्रान्तम् ?
11. कस्य कारणं लोभो भवति?
12. पुरुषाणां बुद्धिः कदा मलिना भवति?
13. यदा कार्यविपत्तिर्भवति तदा को हन्यते?
14. वत्सस्य बन्धने मातृजङ्घा किं करोति ?
15. हिरण्यकः केषां बन्धनं छिन्नत्ति?

**लघूत्तरात्मकप्रश्नाः -**

1. सुवर्णकङ्कणं दृष्ट्वा पथिकः किमचिन्तयत्।
2. व्याघ्रो यौवनदशायां किं कृतवान्।
3. धर्ममार्गस्य परिगणनं कुरुत।
4. गतानुगतिको लोकः किं करोति।
5. पण्डितस्य लक्षणं किं वर्तते।
6. दानं कदा सात्त्विकं भवति।
7. सरसि गत्वा पथिकः कीदृशः सञ्जातः।
8. व्याघ्रेण धृतः पान्थः किमचिन्तयत्।
9. सुदीर्घकालेऽपि के विक्रियां न यान्ति।
10. आपत्काले समागते किं करणीयम्।
11. दुःखभागिनः के भवन्ति।
12. कीदृशा लोभमोहिताः क्लिश्यन्ते।
13. लोभात् क्रमशः किं किं प्रभवति।
14. बन्धुः को भवति?

**निबन्धात्मकप्रश्नाः -**

1. लुब्धपथिकवृद्धव्याघ्रकथा सङ्क्षेपेण लिखत।
2. चित्रग्रीवहिरण्यककथासारः नातिविस्तरेण वर्णयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

3. मित्रलाभप्रकरणमधिकृत्य महापुरुषस्य लक्षणं प्रतिपादयत।
4. हिरण्यकोक्तं नीतिशास्त्रं प्रतिपादयत।

**उत्तरमाला (बहुचयनात्मकप्रश्नानाम्)**

(1) स (2) अ (3) द (4) ब (5) स (6) द

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | सरस्तीरे | = | सरः+तीरे | = | विसर्गसन्धिः |
| | अनिष्टादिष्टलाभे | = | .............. | = | .......... |
| | यत्रास्ते | = | .............. | = | .......... |
| | पुनरारुह्य | = | .............. | = | .......... |
| | पूर्वचतुर्वर्गः | = | .............. | = | .......... |
| | यथात्मनोऽभीष्टाः | = | .............. | = | .......... |
| | प्रत्याख्याने | = | .............. | = | .......... |
| | इत्युक्त्वा | = | .............. | = | .......... |
| | प्रोज्झितुम् | = | .............. | = | ........... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | आलोचितम् | = | आ+लोच्+इट्+क्त। |
| | आरुह्य | = | ................... |
| | वृष्टिः | = | ................... |
| | प्रत्याख्याने | = | ................... |
| | निमग्नः | = | ................... |
| | उपगम्य | = | ................... |
| | सुविचक्षणः | = | ................... |
| | पुण्यवान् | = | ................... |

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-
   1. इदं सुवर्णकङ्कणं गृह्यताम्।(लट्)
   2. व्याघ्रो हस्तं प्रसार्य दर्शयति।(लङ्)
   3. इदं सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि।(लृट्)
   4. व्याघ्रेण धृतः स पान्थोऽचिन्तयत्। (लिङ्)
   5. मूषकराजो गण्डकीतीरे निवसति। (लोट्)

4. **(अ) असमस्तपदानां समासो विधेयः -**

कुशाः सन्ति हस्ते यस्य सः = ........................
अष्टौ विधा यस्य सः = ........................
चतुर्णां वर्गः = ........................
क्षुधया आर्तः क्षुधार्तः तस्मिन् = ........................
परेषां दाराः परदाराः, तेषु = ........................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तस्य वचसि प्रतीतः = ......................

**(ब) समस्तपदानां विग्रहः कार्यः -**

सुवर्णकङ्कणम् = ......................

महात्मनि = ......................

क्षुधार्ते = ......................

प्रियाप्रिये = ......................

लोभमोहिताः = ......................

यथाशक्ति = ......................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

आत्मसन्देहे = ..............................

त्वयि = ..............................

मरुस्थल्याम् = ..............................

नीरुजस्य = ..............................

ज्योतिषाम् = ..............................

विपदि = ..............................

6. कोष्ठके स्थितशब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

1. वृद्धो व्याघ्रः कुशहस्तः........... ब्रूते। (सरस्तीर)
2. मा धनं ........... प्रयच्छ।(ईश्वर)
3. प्रकृत्या मधुरं पयः........... भवति। (गो)
4. सर्वस्य हि........... परीक्ष्यन्ते। (स्वभाव)
5. तृणैर्गुणत्वमापन्नैः ........... बध्यन्ते। (मत्तदन्तिन्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## कपोत-मूषक कथा

### चतुर्थो भागः

**अत एव सर्वथाऽविचारितं कर्म न कर्तव्यमिति। यत :-**

**व्याख्या-**अतः=अस्मात् कारणात्, एव=निश्चयेन, सर्वथा=सर्वतोभावेन, अविचारितम्=अविचिन्तितम्, कर्म=कार्यम्, न कर्तव्यम्=नैव करणीयम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः-**अविचारितम्=न विचारितमिति।

**सन्धि-विच्छेदः-**अत एव=अतः+एव। सर्वथाऽविचारितम् सर्वथा+ अविचारितम्।

**प्रकृति प्रत्ययः-** सर्वथा=सर्व+थाल् (था)। अविचारितम् न+वि+चर्+ णिच् (इ)+क्त (त)। कर्तव्यम्=कृ+ तव्यत् (तव्य)।

**सुजीर्णमन्नं सुविचक्षणः सुतः,**
**सुशासिता स्त्री नृपतिः सुसेवितः।**
**सुचिन्त्य चोक्तं सुविचार्य यत्कृतं,**
**सुदीर्घकालेऽपि न याति विक्रियाम्॥** 22॥

**प्रसङ्ग :-**इह लोके सदैव अखिलं कार्यं सम्यग् विचार्य एव कर्तव्यम्, न तु सहसेति।

**अन्वयः-**सुजीर्णम् अन्नम्, सुविचक्षणः सुतः, सुशासिता स्त्री, सुसेवितः नृपतिः यत् सुचिन्त्य च उक्तम्, सुविचार्य यत्कृतम्, तत् सुदीर्घकालेऽपि विक्रियां न याति।

**व्याख्या-**सुजीर्णम्=सुपक्वम्, अन्नम्=खाद्यान्नम्, सुविचक्षणः=सुशिक्षितः, सुतः=पुत्रः, सुशासिता=सुशिक्षिता, स्त्री=पत्नी, सुसेवितः=सुष्ठु आराधितः, नृपतिः =भूपतिः (यत्), सुचिन्त्य=पूर्वापरं सम्यक् विचार्य, उक्तम्=कथितम्, (यत्) सुविचार्य =पूर्वापरं विचिन्त्य, यत्कृतम्=यदनुष्ठितम्, (तत्) सुदीर्घकालेऽपि=बहुकाले व्यतीतेऽपि, विक्रियाम्=विकारभावम्, न याति=नैव प्राप्नोति।

**सरलार्थः-**सुपक्वं भोजनम्, शिक्षितः पुत्रः वशवर्तिनी भार्या, सम्यग् आराधितो नृपः, सम्यग् विचार्य उच्चारितं वचनम्, पूर्वापरं सुष्ठु विचार्य कृतं कार्यम्, एतानि षट् चिरकालपर्यन्तं विकारभावं न प्राप्नुवन्ति।

**व्याकरणम्-**

**समासः-**सुजीर्णम्=सुष्ठु जीर्णम्। सुशासिता=सुष्ठु शासिता। नृपतिः=नृणां पतिः। सुचिन्त्य=सम्यग् विचिन्त्य इति। सुदीर्घकाले=सुदीर्घश्चासौ कालः सुदीर्घकालः, तस्मिन्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धि-विच्छेदः**-सुजीर्णमन्नम्=सुजीर्णम्+अन्नम्। चोक्तम् = च + उक्तम्। सुदीर्घकालेऽपि=सुदीर्घकाले+ अपि।

**प्रकृति प्रत्ययः**-सुजीर्णम्=सु+जॄ+क्त (त)। सुविचक्षणः सु+वि+चक्ष्+ ल्युट् (यु=अन)। सुसेवितः= सु+सेव्+क्त (त)। सुचिन्त्य=सु+चिन्त्+यत्। उक्तम्= वच्+क्त (त)। कृतम्=कृ+क्त (त)।

**छन्द :**- अत्र वंशस्थ नामवृत्तं वर्तते।

**एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह - आः किमेवमुच्यते -?**

**व्याख्याः**-एतद्वचनम्=एतस्य कपोतराजस्य कथनम्, श्रुत्वा=आकर्ण्य, कश्चित्=कोऽपि, कपोतः= पारावतः, सदर्पम्=अभिमानपूर्वकम्, आह=अवदत्, आः =अनादरे, किम्=कथम्, एवम्=एवंविधम्, उच्यते=कथ्यते।

**व्याकरणम् -**

**समासः**-सदर्पम्=दर्पेण सहितम्।

**सन्धि-विच्छेदः**-एतद् वचनम्=एतत्+वचनम्। किमेवमुच्यते=किम्+एवम् +उच्यते।

**प्रकृति प्रत्ययः**-वचनम्=वच्+ल्युट् (यु=अन)। श्रुत्वा- श्रु+क्त्वा (त्वा)।

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैवं विचारे च भोजनेऽप्यप्रवर्तनम्॥23॥**

**प्रसङ्ग :**-भोजनादिसामान्यविषये वृद्धानां वचनमगाह्यं भवतीति।

**अन्वयः**-हि आपत् काले उपस्थिते वृद्धानां वचनं ग्राह्यम्। सर्वत्र एवं विचारे तु भोजने अपि अप्रवर्तनम् (स्यात्)।

**व्याख्या** - हि=निश्चयेन, आपत्काले=विपत्तिसमये, उपस्थिते=समागते, वृद्धानाम्=अवस्थातीतानाम्, वचनम्=कथनम्, ग्राह्यम्=स्वीकार्यम्, सर्वत्र=सर्वस्मिन् स्थाने, एवम्=इत्थम्, विचारे तु=विचारे कृतें सति, भोजनेऽपि= आहारेऽपि, अप्रवर्तनम् =अप्रवृत्तिः (स्यात्=भवेत्)।

**सरलार्थः**-आपत्काले समागते सति वयोवृद्धानां वचनं ग्राह्यम्। सर्वत्र तेषां वचनं समादरेत् चेत् भोजनेऽपि प्रवृत्ति र्न स्यादिति।

**व्याकरणम् -**

**समासः**-आपत्काले=आ (समन्तात्) पद्यते इति आपत्, आपदः कालः आपत्कालः, तस्मिन्।

**सन्धि-विच्छेदः**-ह्युपस्थिते=हि+उपस्थिते। सर्वत्रैवम्=सर्वत्र+ एवम्।

**प्रकृति प्रत्ययः**-वचनम्=वच्+ल्युट् (यु+अन)। ग्राह्यम्=गृह्+ ण्यत् (य)। उपस्थिते=उप+स्था+क्त (त)+ङि (इ)। सर्वत्र=सर्व+त्रल् (त्र)। अप्रवर्तनम्= न+प्र+वृत्+ल्युट (यु=अन)।

छन्द :-अत्र अनुष्टुप् नामवृत्तं वर्तते।

यतः- **शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले।**
**प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा॥24॥**

**प्रसङ्गः**-इह जगति प्रतिपदे संशयो विद्यते, प्रवृत्तिः कुत्र भवेदिति वर्णितम्।

**अन्वयः**-भूतले अन्नं पानं च सर्वं शङ्काभिः आक्रान्तम्, कुत्र प्रवृत्तिः कर्तव्या, कथं नु वा जीवितव्यम्।

**व्याख्या**- भूतले=धरायाम्, अन्नम्=खाद्यम्, पानःा=पानीयं च, सर्वम्= अखिलवस्तु, शङ्काभिः= आशङ्काभिः, आक्रान्तम्=व्याप्तं वर्तते, कुत्र=कस्मिन् विषये, प्रवृत्तिः=प्रवर्तनम्, कर्तव्या=करणीयम्, कथं=केन प्रकारेण, नु=इति प्रश्ने, वा= अथवा, जीवितव्यम्=जीवेत्।

**सरलार्थ :**-अस्मिन् भूतले भोजनं, जलम् अन्यानि सर्वाणि वस्तूनि सन्देहपूर्णानि सन्ति, अतः कुत्र प्रवृत्तिः स्यात्, तथा केन प्रकारेण प्राणान् धारयेत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम् -**

**समासः-**भूतले=भुवः तलं भूतलम्, तस्मिन्।

**सन्धि-विच्छेदः-**सर्वमाक्रान्तमन्नम्=सर्वम्+आक्रान्तम्+अन्नम्। पानःा= पानम्+च।

**प्रकृति प्रत्ययः-**आक्रान्तम्=आ+क्रम्+क्त (त)। पानम्=पा+ल्युट् (यु= अन)। प्रवृत्तिः=प्र+वृत्+क्तिन् (ति)। कुत्र=किम्+त्रल्(त्र)। कर्तव्या=कृ+ तव्यत् (तव्य)+टाप् (आ)। जीवितव्यम्=जीव्+तव्यत् (तव्य)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

तथा चोक्तम् - **ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनोनित्यशङ्कितः।**

**परभाग्योपजीवी च षडेते दुःख-भागिनः॥** 25॥

**प्रसङ्गः-**अत्र दुःखप्राप्तेः षट्कारणानि परिगणितानि।

**अन्वयः-**ईर्ष्यी, घृणी तु असन्तुष्टः क्रोधनः नित्यशङ्कितः परभाग्योपजीवी च एते षट् दुःखभागिनः (भवन्ति)।

**व्याख्या-** ईर्ष्यी=परोन्नत्यसहिष्णुः, घृणी=घृणाशीलः असन्तुष्टः= सन्तोषरहितः, क्रोधनः=कोपनशीलः, नित्यशङ्कितः=सततं शङ्कायुक्तः, परभाग्योपजीवी च=अन्याधीनजीवनश्च, एते=इमे, षट्=षट् संख्याकाः जनाः, दुःखभागिनः= दुःखं लभन्ते।

**सरलार्थ :-**अस्मिन् लोके ईर्ष्यी, घृणी, सदा असन्तुष्टः, कोपनशीलः सर्वदाशङ्कायुक्तः परभाग्योपजीवी च इमे षट्प्रकारकाः जनाः सदा दुःखिनो भवन्ति।

**व्याकरणम् -**

**समासः-**ईर्ष्यी=ईर्ष्या विद्यते अस्य इति। घृणी=घृणा विद्यते अस्य इति। परभाग्योपजीवी=परस्य भाग्यं परभाग्यम्, परभाग्येन जीवतीति। दुःखभागिनः=दुःखं भजन्तीति।

**सन्धि-विच्छेदः-**त्वसन्तुष्टः=तु+असन्तुष्टः। परभाग्योपजीवी= परभाग्य+ उपजीवी। षडेते=षट्+एते।

**प्रकृति प्रत्ययः-**असन्तुष्टः=न+सम्+तुष्+क्त (त)। क्रोधनः=क्रुध्+ ल्युट् (यु=अन)। शङ्कितः=शङ्क+क्त (त)। उपजीवी=उप+जीव्+णिनि (इन्)। भागिनः= भज्+घिनुण्=(इन्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतच्छ्रुत्वा तण्डुलकणलोभेन नभोमण्डलादवतीर्य सर्वे कपोताः तत्रोपविष्टाः। यत :-**

**व्याख्या-** एतत्=पूर्वोक्तं वचनम्, श्रुत्वा=आकर्ण्य, तण्डुलकणलोभेन= तण्डुलकणलिप्सया, नभोमण्डलाद्= आकाशात्, अवतीर्य=अधः आगत्य, सर्वे= समस्ताः, कपोताः=पारावताः तत्र=तण्डुलपूर्णे स्थाने, उपविष्टाः=अतिष्ठन्। यतः यतोहि -

**व्याकरणम् -**

**समासः-**तण्डुलकणलोभेन=तण्डुलानां कणाः तण्डुलकणाः, तेषां लोभः तण्डुलकणलोभः, तेन। नभोमण्डलात्=नभसः मण्डलं नभोमण्डलम्, तस्मात्।

**सन्धि-विच्छेदः-**एतच्छ्रुत्वा=एतत्+श्रुत्वा। कपोतास्तत्रोपविष्टाः=कपोताः+ तत्र+उपविष्टाः।

**प्रकृति प्रत्ययः-**श्रुत्वा=श्रु+क्त्वा (त्वा)। अवतीर्य=अव+तॄ+ल्यप् (य)। उपविष्टाः=उप+विश्+क्त (त)+ जस्(अस्)।

**सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः।**

**छेत्तारः संशयानाः क्लिश्यन्ते लोभमोहिताः॥**26॥

**प्रसङ्ग :-**इह लोके न केवलमज्ञाः अपितु विज्ञा अपि लोभवशात् सीदन्ति।

**अन्वयः-**सुमहान्ति शास्त्राणि धारयन्तः बहुश्रुताः अपि संशयानां छेत्तारः च लोभमोहिताः (सन्तः) क्लिश्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या-**सुमहान्ति=विशालानि, शास्त्राणि=वेदोपनिषदादिग्रन्थान्, धारयन्तः =अधीतवन्तः, बहुश्रुता अपि=प्रचुरज्ञानसम्पन्ना अपि, संशयानाम्= सन्देहानाम्, छेत्तारः=भेत्तारः(विद्वांसः) लोभमोहिताः=लोभपराधीनाः, क्लिश्यन्ते= दुःखमनुभवन्ति।

**सरलार्थः-**इह जगति शास्त्राणामध्येतारः, श्रोतारः, अन्येषां संशयानां भेत्तारो विद्वांसोऽपि लोभवशाद् दुःखिनो भवन्ति।

**व्याकरणम् -**

**समासः** बहुश्रुताः=बहूनि श्रुतानि येषां ते। लोभमोहिताः=लोभेन मोहिताः।

**सन्धि-विच्छेदः-**सुमहान्त्यपि=सुमहान्ति+अपि। संशयानाः=संशयानाम् +च।

**प्रकृति प्रत्ययः-**धारयन्तः=धारि+शतृ (अत्)+जस् (अस्)। श्रुताः=श्रु+ क्त(त)+जस्(अस्)। छेत्तारः= छिद्+तृच् (तृ)+जस् (अस्)। मोहिताः=मुह्+क्त(त) +जस् (अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते।**
**लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥**27॥

**प्रसङ्गः-**लोभ एव सर्वेषां पापानां कारणमस्ति।

**अन्वयः-**लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते, लोभात् मोहः च नाशः च (जायते) लोभः पापस्य कारणं (भवति)।

**व्याख्या -** अन्यच्च=अपरः। लोभात्=प्रलोभतः, क्रोधः=कोपः, प्रभवति= उत्पन्नो भवति, लोभात्= प्रलोभनात्, कामः=विषयोपभोगेच्छा, प्रजायते=उत्पद्यते, लोभात्=प्रलोभनतः, मोहश्च=चित्तविभ्रमश्च, नाशश्च= मृत्युश्च, (जायते=सम्पद्यते), लोभः=ईहा, (गृधः) पापस्य=सर्वदोषस्य, अघस्य वा, कारणं=हेतुः (भवति=जायते)।

**सरलार्थः-**लोभात् क्रोधः, लोभतो विषयेच्छा, लोभात् मोहो नाशश्च जायते। अत एव ज्ञायते यत् लोभ एव सर्वविधपापानां हेतुरस्ति।

**व्याकरणम् -**

**समासः-**प्रजायते=प्रकर्षेण जायते इति। प्रभवति=प्रकर्षेण भवतीति।

**सन्धिविच्छेदः-** अन्यच्च=अन्यत्+च। लोभान्मोहश्च=लोभात्+मोहः+ च। लोभात्=लुभ्+ घञ् (अ) +ङसि (आत्)। क्रोधः=क्रुध्+घञ् (अ)। कामः= कम्+घञ् (अ)। प्रजायते=प्र+जन्+श्यन् (य)+ त। कारणम्= कृ+णिच्+ (इ) +ल्युट् (यु=अन)।

**छन्द :-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **असम्भवं हेममृगस्य देहं,**
**तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले,**
**धियोऽपि पुंसां मलिना भवन्ति॥**28॥

**प्रसङ्ग :-**विपत्तिकाले समागते सति महताम् अपि बुद्धयो दूषिता भवन्ति।

**अन्वयः-**हेममृगस्य जन्म असम्भवं (वर्तते) तथापि रामः मृगाय लुलुभे। समापन्नविपत्तिकाले पुंसां धियः अपि प्रायः मलिनाः भवन्ति।

**व्याख्या -** अन्यच्च=अपि च, हेममृगस्य=सुवर्णहरिणस्य, जन्म=उत्पत्तिः, असम्भवम्=सम्भावनारहितमस्ति, तथापि=एतादृशे ज्ञाने प्राप्तेऽपि, रामः=दाशरथिः (दशरथपुत्रः) मृगाय=कनकहरिणाय, लुलुभे=लोभमकरोत्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

समापन्नविपत्तिकाले= समुपस्थितविपत् समये, पुंसाम्=पुरुषाणाम्, धियोऽपि=बुद्धय अपि, प्रायः= अधिकांशतः, मलिनाः=मलेनाच्छादिताः भवन्ति=जायन्ते।

**सरलार्थः-** कनकमृगस्योत्पत्तिर्यद्यपि असम्भवमेव, तथापि दाशरथिरामो मृगोपरि आसक्तो बभूव। प्रायो लोके एवं दृश्यते यद् यदा विपत्तिकाल आयाति चेत् तदा पुंसां धियो नूनमेव कुण्ठिताः भवन्ति।

**व्याकरणम् -**

**समासः-**हेममृगस्य=हेम्नः मृगः हेममृगः, तस्य। रामः=रमन्ते योगिनो यस्मिन् सः। समापन्विपत्तिकाले= समापन्नाश्च ताः विपत्तयः समापन्नविपत्तयः, तासां कालः, तस्मिन्।

**सन्धि-विच्छेदः-**तथापि=तथा+अपि। रामो लुलुभे=रामः+लुलुभे। धियोऽपि=धियः+ अपि। मलिना भवन्ति=मलिनाः+ भवन्ति।

**प्रकृति प्रत्ययः-**असम्भवम्=न+सम्+भू+अप्(अ)। समापन्नः=सम्+आ+ पत्+क्त(त)। विपत्तिः= वि+पद्+क्तिन् (ति)। मलिनाः=मल्+इनन् (इन) टाप् (आ)+ जस् (अस्)।

**छन्दः-**अत्र उपजाति नामवृत्तं वर्तते।

**अनन्तरं ते सर्वे जालनिबद्धा बभुवुः, ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म। यत :-**

**व्याख्या -** अनन्तरम्=तण्डुलकणस्थाने उपवेशनानन्तरम्, ते सर्वे=अखिलाः कपोताः, जालेन=पाशेन, बद्धाः=नियन्त्रिताः बभूवुः=अभूवन्, ततः=तस्मिन् स्थाने, अवलम्बिताः=उपविष्टाः, तं=पारावतम्, सर्वे=समस्ताः, तिरस्कुर्वन्तिस्म= अधिक्षिपन्ति स्म। यतः=यतोहि -

**व्याकरणम् -**

**समासः-**अनन्तरम्=नास्ति अन्तरं (व्यवधानम्) अस्य तत्। जालनिबद्धाः= जालेन निबद्धाः।

**सन्धि-विच्छेदः-**ततो यस्य=ततः+यस्य। तत्रावलम्बितास्तम्=तत्र+ अवलम्बिताः+तम्।

**प्रकृति प्रत्ययः-**निबद्धाः=नि+बन्ध्+क्त (त)+जस् (अस्)। तत्र=तत् + त्रल्(त्र)। अवलम्बिताः= अव+लम्ब्+क्त (त)+ जस्(अस्)।

**न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम्।**
**यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते॥** 29॥

**प्रसङ्ग :-**कस्मिन्नपि कार्ये समुदायस्याग्रणीः मा भवितव्यः।

**अन्वयः-**गणस्य अग्रतः न गच्छेत्, कार्ये सिद्धे फलं समं (भवति) यदि कार्यविपत्तिः स्यात् तत्र मुखरः हन्यते।

**व्याख्या-** गणस्य=समूहस्य, अग्रतः=अग्रगामी भूत्वा, न गच्छेत्=नैव यायात्, कार्ये=कर्मणि, सिद्धे=सफले, फलं=परिणामः समं=तुल्यम् (भवति=जायते) यदि=चेत्, कार्यविपत्ति :=कार्यस्य अनिष्पत्तिः स्यात्=भवेत्, तत्र=तस्मिन् विषये, मुखरः=अग्रगामी=हन्यते=तिरस्क्रियते।

**सरलार्थ :-**कस्यापि समूहस्याग्रे कदापि न गच्छेत्, यतोहि कार्ये सिद्धे सति फलं समं प्राप्नोति, परं यदा कार्यं न सिध्यति तदा यो नेता भवति स अन्यैः सर्वैः तिरस्क्रियते।

**व्याकरणम् -**

**समासः-**कार्यविपत्तिः कार्यस्य विपत्तिः। मुखरः=मुखंवाग् अस्ति अस्य इति।

**सन्धिविच्छेदः-**गणस्याग्रतो गच्छेत्=गणस्य +अग्रतः+गच्छेत्। स्यान्मुखरस्तत्र=स्यात्+मुखरः+तत्र।

**प्रकृति प्रत्ययः-**अग्रतः=अङ्ग+रन् (नकारलोपः)+तसिल् (तस्)। सिद्धे= सिध्+क्त (त)+ङि (इ)। कार्ये=कृ+ण्यत् (य)+ ङि (इ)। विपत्ति :=वि+पत्+क्तिन् (ति)। मुखरः=मुख+रा+क(अ)।

**छन्द :-**अत्र अनुष्टुप् नामवृत्तं वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - नायमस्य दोषः।**

**व्याख्या -** तस्य=प्रवर्तकस्य कपोतस्य, तिरस्कारम्=अपमानम्, श्रुत्वा= आकर्ण्य, चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, अयम्=एषः, अस्य=कपोतस्य, दोषः=अपराधः, न=नास्ति।

**समासः-**तिरस्कारम्=तिरस्करोतीति तिरस्कारः, तम्।

**सन्धि-विच्छेदः-**चित्रग्रीव उवाच=चित्रग्रीवः+उवाच। नायमस्य=न+ अयम्+अस्य।

**प्रकृति प्रत्ययः-**तिरस्कारः=तृ+असुन् (अस्) कृ+अण् (अ)। श्रुत्वा=श्रु +क्त्वा (त्वा)।

यत :- **आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।**
**मातृजङ्घा हि वत्सस्य स्तम्भी भवति बन्धने॥**30 **॥**

**प्रसङ्ग :-**हितकारकोऽपि जनः अवश्यं भाविन्यां विपत्तौ कारणभूतो भवति।

**अन्वयः-**हितः अपि आपतन्तीनाम् आपदां हेतुताम् आयाति हि मातृजङ्घा वत्सस्य बन्धने स्तम्भी भवति।

**व्याख्या -** यतः=यतोहि, हितोऽपि=प्रियकारकोऽपि, आपतन्तीनाम्= आगच्छन्तीनाम्, आपदाम्=विपदाम्, हेतुताम्=कारणताम्, आयाति=प्राप्नोति, हि= यतः, मातृजङ्घा=परमहितकारी मातुः ऊरुः, वत्सस्य=धेनुसुतस्य, बन्धने=संयमने, स्तम्भीभवति=स्तम्भ इव आचरतीति।

**सरलार्थ :-**सदा प्रियकारकोऽपि सुहृद् आगच्छन्तीनां विपत्तीनां बन्धने स्तम्भस्य कार्यं करोति।

**व्याकरणम् -**

**समासः-**मातृजङ्घा=मातुः जङ्घा। स्तम्भी भवति=न स्तम्भः अस्तम्भः, अस्तम्भः स्तम्भो यथा सम्पद्यमानस्तथा भवतीति।

**सन्धि-विच्छेदः-**आपदामापतन्तीनाम्=आपदाम् +आपतन्तीनाम्। हितोऽप्यायाति=हितः +अपि+ आयाति।

**प्रकृति प्रत्ययः-** आपदाम्=आ+पद्+क्विप्+आम्। हितः=धा (हि)+क्त (त)। हेतुताम्=हेतु+तल्(त)टाप्(आ) +अम्। बन्धने=बन्ध्+ल्युट्(यु=अन)+ङि (इ)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः।**
**न तु भीतपरित्राणवस्तूपालम्भपण्डितः॥**31 **॥**

**प्रसङ्गः-**अत्र को बन्धुः कश्चाबन्धुर्भवतीति प्रतिपादितम्।

**अन्वयः-**यः विपन्नानाम् आपदुद्धरणक्षमः स बन्धुः अस्ति (यः) तु भीत-परित्राणवस्तूपालम्भपण्डितः (स बन्धुः) न (अस्ति)।

**व्याख्या-** अन्यच्च=अपरःा, यः=पुरुषः, विपन्नानाम्=विपद्ग्रस्तानाम्, आपदुद्धरणक्षमः=विपद्भ्यो मोचयितुं समर्थः, सः=तादृशो जनः, बन्धुः=मित्रम्, (अस्ति-वर्तते) (यः=पुमान्) तु=पुनः, भीतपरित्राणवस्तूपलम्भपण्डितः= भयभीतानां परित्राणवस्तुषु तिरस्कारकरणे समर्थः (स बन्धुः=तन्मित्रम्) न=नैव (अस्ति=वर्तते)।

**सरलार्थः-**यो नरो विपद्ग्रस्तानामुद्धरणाय समर्थो भवति स एव सद्बन्धु र्भवति। तथा यः पुरुषो भीतानां जनानां रक्षणस्थाने उपालम्भनप्रदाने निपुणो भवति स तु अबन्धु र्जायते।

**व्याकरणम् -**

**समासः-**आपदुद्धरणक्षमः=आपद्भ्यः उद्धरणम् आपदुद्धरणम्, तस्मिन् क्षमः(समर्थः)।

**सन्धिविच्छेदः-**बन्धुर्यः=बन्धुः+यः। विपन्नानामापदुद्धरणक्षमः= विपन्नानाम् +आपद्+उद्धरणक्षमः।

**प्रकृति- प्रत्ययः-**बन्धुः=बन्ध्+उ। विपन्नानाम्=वि+पत्+क्त (त)+ आम्। उद्धरणम्=उद्+हृ+ल्युट् (यु=अन)। परित्राणम्=परि+त्रै+ल्युट् (यु=अन)। पण्डितः=पण्डा+इतच् (इत)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। यतः-**

**व्याख्या-** विपत्काले = आपत्समये (दुःखावस्थायाम्) विस्मय एव = व्याकुलत्वमेव, कापुरुषस्य= कुत्सितपुरुषस्य, लक्षणम्=चिह्नम्। तत्=तस्माद्धेतोः, अत्र =अस्मिन् संकटकाले, धैर्यम्=धीरताम्, अवलम्ब्य=आश्रित्य, प्रतिकारः=उद्धारोपायः, चिन्त्यताम्=विचार्यताम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः**-विपत्काले=विपदां कालः विपत्कालः, तस्मिन्। कापुरुष-लक्षणम्=कुत्सितः पुरुषः, तस्य लक्षणम्।

**सन्धि-विच्छेदः**-तदत्र=तत्+अत्र।प्रतीकारश्चिन्त्यताम्=प्रतीकारः+चिन्त्यताम्।

**प्रकृति प्रत्ययः**-विपत्=वि+पत्+क्विप्।अत्र=इदम्+त्रल्(त्र)। अवलम्ब्य =अव+लम्ब्+ल्यप्(य)। यतः=यत्+तसिल् (तस्)।

**विपदिधैर्यमथाभ्युदये क्षमा,**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ,**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥32॥**

**प्रसङ्गः**-महापुरुषेषु स्वभावतो विद्यमानानां गुणानामत्र परिगणनं वर्तते।

**अन्वयः**-विपदिधैर्यम् अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः यशसि च अभिरुचिः, श्रुतौ व्यसनम् इदं हि महात्मनां प्रकृतिसिद्धं भवति।

**व्याख्या-** विपदिसंकटकाले, धैर्यम्=चित्तस्थैर्यम्, अथ अभ्युदये=उन्नति समये, क्षमा=सहनशीलता, सदसि= सभायाम्, वाक्पटुता=वाणीनां चातुर्यम्, युधि= सङ्ग्रामे, विक्रमः=पराक्रमः, यशसि=कीर्तौ, चाभिरुचिः=अतीवानुरागश्च, श्रुतौ= शास्त्रे व्यसनम्=आसक्तिः, इदम्=एतत् सर्वम्, हि=निश्चयेन, महात्मनाम्=महापुरुषाणाम्, प्रकृतिसिद्धं= स्वभावजम्, (भवति=जायते)।

**सरलार्थः**-विपत्तौ धैर्यम्, अभ्युदये सहनशीलता, सभायां वाक्पटुता सङ्ग्रामे पराक्रमः, यशसि अभिरुचिः, शास्त्रेषु अत्यन्तासक्तिः एते गुणा महापुरुषेषु स्वभावत एव विद्यन्ते।

**व्याकरणम् -**

**समासः**-वाक्पटुता=वाचां पटुता। महात्मनाम्=महान् चासौ आत्मा महात्मा, तेषाम्। प्रकृतिसिद्धम्=प्रकृत्या सिद्धम्।

**सन्धि-विच्छेदः**- धैर्यमथाभ्युदये = धैर्यम् + अथ+अभ्युदये। चाभिरुचि-र्व्यसनम् =च+अभिरुचिः+ व्यसनम्।

**प्रकृति प्रत्ययः**-विपदि=वि+पद्+क्विप्+ङि (इ)। धैर्यम्=धीर+ष्यञ् (य)। पटुता=पटु+तल् (त)+टाप् (आ)। अभिरुचिः=अभि+रुच्+इन् (इ)। व्यसनम् =वि+अस्+ल्युट् (यु=अन)।

**छन्दः**-अत्र वंशस्थ नामवृत्तं वर्तते।

**सम्पदि यस्य न हर्षो, विपदि विषादो रणे च भीरुत्वम्।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥33॥**

**प्रसङ्गः**-लोके गुणसम्पन्नाः पुरुषाः विरला एव भवन्ति।

**अन्वयः**-यस्य सम्पदि हर्षः न (भवति) विपदि विषादः (न भवति) रणे च भीरुत्वं (न भवति) तं भुवनत्रय तिलकं सुतं जननी विरलं जनयति।

**व्याख्या -** यस्य=यस्य महापुरुषस्य, सम्पदि-धनागमकाले, हर्षः=आनन्दः, न=नैव, (भवति=जायते)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विपदि=विपन्नायां स्थितौ, विषादः=खेदः, (न भवति=नैव जायते) तम्=तादृशगुणोपेतम्, भुवनत्रयतिलकम्=भुवनत्रयश्रेष्ठम्, सुतम्=पुत्रम्, जननी =माता, विरलम्=स्तोकं स्वल्पं वा, जनयति=उत्पादयति।

**सरलार्थ :**-धनागमकाले यो न प्रसीदति, विपत्तौ न सीदति, सङ्ग्रामे च कातरत्वं नाश्रयति, एतादृशं गुणयुक्तं त्रिभुवनरत्नं पुत्रं माता स्वल्पमेव जनयति।

**व्याकरणम् -**

**समासः**-भुवनत्रयतिलकम्=भुवनानां त्रयं भुवनत्रयम्, तस्य तिलकः भुवनत्रयतिलकः, तम्।

**सन्धि-विच्छेदः**-हर्षो विपदि=हर्षः +विपदि। विषादो रणे=विषादः+रणे।

**प्रकृति प्रत्ययः**- हर्षः = हृष्+घञ् (अ)। विषादः=वि+सद्+घञ्(अ)। भीरुत्वम्=भी+रु+त्व। विरलम्=वि+रा+कलन् (अल)।

**छन्दः**-अत्र 'आर्या' नामवृत्तं वर्तते।

अन्यच्च- **षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता॥34॥**

**प्रसङ्गः**-पुरुषाणां कृते षण्णां दोषाणां परित्यागार्थमत्र परिगणनं कृतम्।

**अन्वयः**-इह भूतिमिच्छतापुरुषेण निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं दीर्घसूत्रता (एते) षड्दोषाः हातव्याः।

**व्याख्या**- अन्यच्च=अपरः, इह=अस्मिन् जगति, भूतिमिच्छता=वैभवमभिलषता, पुरुषेण=मनुष्येण, निद्रा=शयनम्, तन्द्रा=अलसनम्, भयं=भीतिः, क्रोधः= कोपः, आलस्यं=परिश्रमाभावः, दीर्घसूत्रता=दीर्घकालीनयोजना, (एते=इमे) षड्दोषाः =षट्संख्याका अवगुणाः, हातव्याः=सर्वथा त्याज्याः।

**सरलार्थः**-इह लोके वैभवेच्छुकैर्जनैः निद्रा-तन्द्रा-भीति-क्रोध-आलस्यं दीर्घसूत्रता इमे षड्गुणाः सर्वथा परिहार्याः।

**समासः**-दीर्घसूत्रता=दीर्घं सूत्रं यस्य स दीर्घसूत्री, तस्य भावः।

**सन्धि-विच्छेदः**-अन्यच्च=अन्यत्+च। षड् दोषाः=षट्+दोषाः पुरुषेणेह= पुरुषेण+इह। क्रोध आलस्यम्=क्रोधः+आलस्यम्।

**प्रकृति प्रत्ययः**-हातव्या=हा+तव्यत्(तव्य)+टाप्(आ) भूतिम्=भू+ क्तिन् (ति)। इच्छता=इच्छ्+शतृ (अत्)+टा(आ)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इदानीमपि एवं क्रियताम्-सर्वैरेकचित्तीभूय जालमादाय उड्डीयताम्। यतः -**

**व्याख्या -** इदानीमपि- साम्प्रतमपि (समागतायां विपत्तावपि) एवम्=अनेन प्रकारेण, क्रियताम्=विधियताम्, सर्वैः-अखिलैः कपोतैः, एकचित्तीभूय= ऐक्यमाश्रित्य, जालमादाय=पाशं नीत्वा, उड्डीयताम्=विहायसा गम्यताम्।

**सन्धि-विच्छेदः**-सर्वैरेकचित्तीभूय=सर्वैः+एकचित्तीभूय। जालमादाय= जालम्+आदाय।

**प्रकृति प्रत्ययः**- आदाय=आ+दा+ल्यप् (य)।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥35॥**

**प्रसङ्गः**-निर्बलमपि वस्तु ऐक्यमधिगम्य बलवद् भवतीति।

**अन्वयः**-अल्पानामपि वस्तूनां संहतिः कार्यसाधिका (भवति) (यथा) गुणत्वमापन्नैः तृणैः मत्तदन्तिनः बध्यन्ते।

**व्याख्या**-अल्पानामपि=क्षुद्राणामपि, वस्तूनाम्=पदार्थानाम्, संहतिः= मेलनम्, कार्यसाधिका=कार्यसम्पादयित्री, (भवति=जायते), (यथा=येनप्रकारेण) गुणत्वमापन्नैः =रज्जुभावं प्राप्तैः, तृणैः=घासादिभिः, मत्तदन्तिनः=मदोन्मताः गजाः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बध्यन्ते= नियम्यन्ते।

**सरलार्थः**-स्वल्पानामपि वस्तूनां संहतिः कार्यसाधिका भवति, येन प्रकारेण रज्जुभावमुपगतैर्तृणैर्गजराजोऽपि नियम्यते।

**व्याकरणम् -**

**समासः**-कार्यसाधिका=कार्यस्य साधिका। मत्तदन्तिनः=मत्ताश्च ते दन्तिनः।

**सन्धि-विच्छेदः**-तृणैर्गुणत्वमापन्नैः=तृणैः+गुणत्वम्+आपन्नैः।

**प्रकृति प्रत्ययः**-संहतिः=सम्+हन्+क्तिन् (ति)। साधिका=साध्+ण्वुल् (वु+अक)+टाप्(आ)। आपन्नैः= आ+पत्+क्त (त)+भिस् (ऐस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।**
**तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः॥36॥**

**प्रसङ्गः**-अत्र प्राणिनां संहतिः तुषतण्डुलवद् अतीव विशिष्टा भवति।

**अन्वयः**-पुंसाम् अल्पकैः अपि स्वकुलैः संहतिः श्रेयसी (भवति) (यथा) तुषेण अपि परित्यक्ताः तण्डुलाः न प्ररोहन्ति।

**व्याख्या** - पुंसाम्=पुरुषाणाम्, अल्पकैरपि=स्वल्पसंख्याकैरपि, स्वकुलैः= स्वबान्धवैः, संहतिः=मेलनम्, श्रेयसी=मङ्गलदायिनी, (भवति=जायते), (यथा= येन प्रकारेण)=तुषेणापि=धान्यत्वचाऽपि (बुसेनापि), परित्यक्यक्ताः= रहिताः, तण्डुलाः =धान्याः, न प्ररोहन्ति=अङ्कुरिता न भवन्ति।

**सरलार्थः**-आत्मनः कुलस्य स्वल्पजनानां समूहोऽपि कल्याणकरो भवति, येन प्रकारेण बुसरहितास्तण्डुलाः उद्गमयितुं समर्थाः नैव भवन्ति।

**व्याकरणम् -**

**समासः**-स्वकुलैः=स्वस्य कुलानि स्वकुलानि तैः।

**सन्धि-विच्छेदः**-स्वकुलैरल्पकैरपि=स्वकुलैः+अल्पकैः+अपि। परित्यक्ता न=परित्यक्ताः+न।

**प्रकृति प्रत्ययः**-संहतिः=सम्+हन्+क्तिन् (ति)। श्रेयसी=प्रशस्य (श्र)+ ईयसुन् (ईयस्)+ङीप् (ई)। अल्पकैः- अल्प+कन् (क)+भिस् (ऐस्)। परित्यक्ता= परि+त्यज्+क्त (त) जस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः। अनन्तरं स व्याघः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्।**

**व्याख्या**-इति=इत्थम्, विचिन्त्य=विचार्य, सर्वे पक्षिणः=अखिलाः कपोताः, जालम्=पाशम्, आदाय=नीत्वा, उत्पतिताः=नभे उड्डीय चलिताः, अनन्तरम्=अथ च, स व्याघः=तल्लुब्धकः, सुदूरात्=अतिदूरदेशात्, जालापहारकान्=पाशमादायोत्पतितान्, तान्=पारावतान्, अवलोक्य=दृष्ट्वा, पश्चाद्धावन्= अनुगच्छन्, अचिन्तयत्= चिन्तयतिस्म।

**व्याकरणम् -**

**समासः**-जालापहारकान्=जालस्य अपहारकः, जालापहारकः, तान्।

**सन्धि-विच्छेदः**-जालमादाय = जालम् + आदाय। सुदूराज्जालापहारकां स्तानवलोक्य = सुदूरात् + जाल + अपहारकान् + तान्+अवलोक्य। पश्चाद्धावितोऽचिन्तयत्=पश्चात्+धावितः+अचिन्तयत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः**-विचिन्त्य=वि+चिन्त् +ल्यप् (य)। आदाय=आ+दा+ ल्यप् (य)। उत्पतिताः=उत्+पत्+क्त (त) जस् (अस्)। अपहारकान्=अप+हृ+ण्वुल् (वु=अक) शस् (अस्)। अवलोक्य=अव+लोक्+ल्यप् (य)।

**संहतास्तु हरन्त्येते मम जालं विहङ्गमाः।**
**यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा॥37॥**

**प्रसङ्गः**-अत्र जालमादाय उड्डीयमानान् कपोतान् विलोक्य व्याधश्चिन्तयति।

**अन्वयः**-एते विहङ्गमाः तु संहताः (सन्तः) मम जालं हरन्ति यदा तु-निपतिष्यन्ति तदा मे वशम् आगमिष्यन्ति।

**व्याख्या**- एते=इमे, विहङ्गमाः=पक्षिणः (कपोताः) तु संहताः=एकत्रिताः (सन्तः) मम=व्याधस्य, जालम्=शणसूत्रम्, हरन्ति=आदाय गच्छन्ति, यदा तु= यस्मिन् काले तु, निपतिष्यन्ति=भूमावागमिष्यन्ति, तदा=तस्मिन् समये, मे=मम, (लुब्धकस्य) वशम्=अधीनम्, एष्यन्ति=आगमिष्यन्ति।

**सरलार्थ** :-एते सर्वे कपोताः युगपत् सम्मिलिताः पवित्रकमादाय (जालं नीत्वा) आकाशमार्गेण गच्छन्ति, किन्तु यदा एते भूमौ निपतिष्यन्ति तदा मे वशमागमिष्यन्ति।

**व्याकरणम्** -

**समासः**-विहङ्गमाः=विहायसा (आकाशमार्गेण) गच्छन्तीति।

**सन्धि-विच्छेदः**-संहतास्तु=संहताः+तु। हरन्त्येते=हरन्ति+एते। वशमेष्यति =वशम्+एष्यति।

**प्रकृति प्रत्ययः**-संहताः=सम्+हन्+क्त (त) जस् (अस्)। विहङ्गमाः= विहायस्+गम्+खच् (अ)(मुमागमो विहादेशश्च)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**ततस्तेषु चक्षुर्विषयातिक्रान्तेषु स व्याधो निवृत्तः। अथ लुब्धकं निवृत्तं दृष्ट्वा, कपोता ऊचुः-किमिदानीं कर्तुमुचितम्? चित्रग्रीव उवाच** -

**व्याख्या**-ततः=तदनन्तरम्, तेषु=कपोतेषु, चक्षुर्विषयातिक्रान्तेषु=नेत्रदेशातीत्यगतेषु, स व्याधः=तल्लुब्धकः, निवृत्तः=प्रत्यावृत्तः। अथ= अनन्तरम्, लुब्धकम्= व्याघम्, निवृत्तम्=प्रत्यावृत्तम्, दृष्ट्वा=विलोक्य, कपोताः= पारावताः। ऊचुः=जगदुः (उक्तवन्तः) इदानीम्=साम्प्रतम्, किं कर्तुम्=किं विधातुम्, उचितम्= समीचीनम् ? चित्रग्रीवः=कपोत राजः, उवाच=जगाद।

**व्याकरणम्**

**समासः**-चक्षुर्विषयम्=चक्षुषोर्विषयः चक्षुर्विषयः, तम्।

**सन्धि-विच्छेदः**- ततस्तेषु = ततः + तेषु। चक्षुर्विषयमतिक्रान्तेषु = चक्षुः+ विषयम्+अतिक्रान्तेषु। कपोता ऊचुः=कपोताः +ऊचुः।

**प्रकृति प्रत्ययः**-अतिक्रान्तेषु=अति+क्रम्+क्त (त)। दृष्ट्वा=दृश्+क्त्वा (त्वा)। उचितम्=उच् +इट्+क्त(त)

**माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्।**
**कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः॥38॥**

**प्रसङ्ग** :-लोके स्वभावतो ये त्रयो हितकारिणो भवन्ति तेषां परिगणनमत्र वर्तते।

**अन्वयः**-माता मित्रं पिता च इति त्रितयं स्वभावात् हितम् (भवति) अन्ये च कार्यकारणतः हितबुद्धयः भवन्ति।

**व्याख्या**- माता=जननी, मित्रं=सखा (सुहृत्) पिता=जनकः, च=तथा, इति= एतत्, त्रितयं=त्रयम्, स्वभावात्=प्रकृतितः, हितम्=हितकरम्, (भवति=जायते) अन्ये च=अपरे च, कार्यकारणतः=स्वार्थवशात्, हितबुद्धयः= हितकराः, भवन्ति= जायन्ते।

**सरलार्थ** :-लोके माता पिता मित्रञ्चैतत्त्रयं स्वभावतो हितकरं भवति। अन्ये च केचन जनाः कार्यवशात् केचन



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

च कारणवशाद् हितकराः भवन्ति।

**व्याकरणम्**

**समासः**-त्रितयम्=त्रयोऽवयवा यस्य इति। कार्यकारणतः=कार्यं च कारणं च ताभ्याम्। हितबुद्धयः= हिताबुद्धिर्येषां ते।

**सन्धि-विच्छेदः**- चेति = च + इति। कार्यकारणतश्चान्ये=कार्यकारणतः+ च+अन्ये।

**प्रकृति-प्रत्ययः**-पिता=पा+तृच् (तृ)। माता=मान् (पूजायां) +तृच् (तृ) (नलोपः)। हितम्=धा (हि)+क्त (त)। बुद्धयः=बुध्+क्तिन् (ति)+जस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तन्मे मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशांश्छेत्स्यति इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः। हिरण्यकश्च सर्वदाऽपायशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच - 'सखे हिरण्यक! किमस्मान्न सम्भाषसे?' ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञायं ससम्भ्रमं बहिर्निसृत्य अब्रूवीत्- 'आः पुण्यवानस्मि प्रियसुहन्मे चित्रग्रीवः समायातः।'**

**व्याख्या** - तत्=तस्मात् कारणात्, मे=मम (चित्रग्रीवस्य) मित्रम्=सुहृत्, हिरण्यको नाम=एतन्नामधेयः, मूषिकराजः=मूषकाणां राजा, गण्डकीतीरे=एतदाख्याया नद्यास्तटे, चित्रवने=एतदाख्येऽरण्ये, निवसति=निवासं करोति। सः= मूषिकराजः, अस्माकम्=नः (कपोतानाम्) पाशान्=बन्धनानि, छेत्स्यति=भेत्स्यति, इत्यालोच्य= इत्थं विचार्य, सर्वे:=अखिलाः कपोताः, हिरण्यकस्य= एतदाख्यस्य मूषकस्य, विवरसमीपम्=विलप्रदेशं निकषा, गताः=प्राप्ताः। हिरण्यकश्च= मूषकराजश्च, सर्वदा सततम् (निरन्तरम्) अपायशङ्कया=नाशभीत्या, शतद्वारं= शतमार्गम्, विवरं=विलम्, कृत्वा=निर्माय, निवसति=वासं करोति । ततः=तदनन्तरम्, हिरण्यकः=मूषिकराजः, कपोतावपातभयात्=पारावतानां वेगागमनभीतेः, चकितः= विह्वलः, तूष्णीं=मौनम्, स्थितः=अतिष्ठत्। चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, सखे हिरण्यक! मित्रहिरण्यक! कथं=केन कारणेन, अस्मान्-नः (कपोतान्) न भाषसे=नैव ब्रूवीषि, ततः= कपोतराजस्य वचनानन्तरम्, हिरण्यकः=मूषकराजः, तद्वचनम्=चित्रग्रीवस्य वाचम्, प्रत्यभिज्ञाय=अवगम्य, ससम्भ्रमम्= अत्युत्साहपूर्वकम्, बहिः=विवराद् बहिः, निःसृत्य=निर्गत्य, अब्रूवीत्=अवदत्, आः=अरे (आश्चर्यसूचकमव्ययम्) पुण्यवानस्मि=पुण्यभाग् अस्मि, प्रियसुहृत्=प्रियमित्रम्, मे=मम, चित्रग्रीवः=कपोतराजः, समायातः=समागच्छत्।

**व्याकरणम् :-**

**समासः**-गण्डकीतीरे=गण्डकी नाम नदी तस्यास्तीरम्, तस्मिन्। चित्रवने= चित्रं च तद्वनं च तस्मिन्। हिरण्यकस्य विवरसमीपम्=हिरण्यकस्य विवरं हिरण्यकविवरम्, तस्य समीपम्। अपायशङ्कया=अपायस्य (नाशस्य) शङ्का अपायशङ्का, तया। कपोतावपातभयात्=कपोतानामवपातः कपोतावपातः, तस्माद् भयं कपोतावपातभयम्, तस्मात्। प्रियसुहृत्=प्रियश्चासौ सुहृच्चेति (प्रीणतीति प्रियः, शोभनं हृदयं यस्य सः सुहृत्)।

**सन्धि-विच्छेदः**- तन्मे=तत्+मे।सोऽस्माकम्=सः+अस्माकम्। पाशांश्छेत्स्यति =पाशान्+छेत्स्यति। इत्यालोच्य= इति+आलोच्य। कपोतावपातभयाच्चकितः= कपोत+अवपातभयात्+चकितः। कथमस्मान्न=कथम्+ अस्मात्+न। बहिर्निःसृत्य= बहिः+निःसृत्य।

**प्रकृति प्रत्ययः**-आलोच्य=आ+लोच्+ल्यप् (य)। गताः गम्+क्त (त)+जस् (अस्)। सर्वदा=सर्व+दाच् (दा)। कृत्वा=कृ+क्त्वा (त्वा)। चकितः= चक्+क्त (त) स्थितः=स्था +क्त (त)। प्रत्यभिज्ञाय=प्रति+अभि+ ज्ञा+ल्यप्(य)। निःसृत्य=निस्+सृज् +ल्यप् (य)। समायातः=सम्+आ+या+क्त (त)।

**यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः।**
**यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥39॥**

**प्रसङ्गः**-अत्र मित्रस्य महत्त्वं प्रतिपादितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**-यस्य मित्रेण (सह) सम्भाषः (भवति) यस्य मित्रेण (सह) संस्थितिः (भवति) यस्य मित्रेण (सह) संलापः (भवति) ततः इह पुण्यवान् नास्ति।

**व्याख्या-** यस्य=पुरुषस्य, मित्रेण=सुहृदा (सह=साकम्) सम्भाषः= वार्तालापः, (भवति=जायते) यस्य=नरस्य, मित्रेण=सख्या, (सह=सार्द्धम्) संस्थितिः= एकत्रनिवासः (भवति=जायते)यस्य=पुंसः, मित्रेण=सुहृदा (सह=समम्) संलापः= परस्परं विचारविमर्शः (भवति) ततः=तस्मात् पुरुषात्, इह=अस्मिन् लोके, पुण्यवान्= सौभाग्यवान्, नास्ति=अन्यः कश्चिद् न वर्तते।

**सरलार्थः**-अस्मिन् जगति स एव पुण्यवान् अस्ति यस्य मित्रेण सह वार्तालापो भवति, मित्रेण सार्द्धं निवासो भवति, तथा मित्रेण सह परस्परं विचार-विमर्शो भवति।

**समासः**-सम्भाषः=सम्यक् प्रकारेण भाषः। पुण्यवान्=पुण्यमस्ति यस्य इति।

**सन्धि-विच्छेदः**-संस्थितिः=सम्+स्थितिः। संलापस्ततः=संलापः+ततः। नास्तीह=नास्ति+इह।

**प्रकृति प्रत्ययः**-सम्भाषः=सम्+भाष्+घञ् (अ)। संस्थितिः=सम्+ स्था+क्तिन् (ति)। पुण्यवान्=पुण्य+मतुप् (मत्) मस्य वः।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच-सखे! किमेतत्? चित्रग्रीवोऽवदत् - सखे! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।**

**व्याख्या** - अथ=एतदनन्तरम्, पाशबद्धान्=जालेन संनियमितान्, च=तथा, एतान्=कपोतान्, दृष्ट्वा= अवलोक्य, सविस्मयः=आश्चर्ययुक्तः, क्षणं= किञ्चित्-कालम्, स्थित्वा=विरम्य, उवाच=अवदत्, सखे!=हे मित्र! एतत् किम्= पाशबन्धनं किं निमित्तम्। चित्रग्रीवः=कपोतराजः, अवदत्=अकथयत्, सखे!=हे सुहृत्! अस्माकं=नः (कपोतानाम्) प्राक्तनजन्मकर्मणः=पूर्वस्मिन् जन्मनिविहितासत्कृत्यस्य, एतत्= पुरोदृश्यमानम्, फलम्=परिणाम अस्तीति।

**व्याकरणम् -**

**समास** :-पाशबद्धान् =पाशेन बद्धाः पाशबद्धाः, तान्। सविस्मयः= विस्मयेन सहितः। प्राक्तनजन्मकर्मणः = प्राक्तनं च तज्जन्मप्राक्तनजन्म, तस्मिन् कृतं कर्म प्राक्तनजन्मकर्म, तस्य।

**सन्धि-विच्छेदः**-पाशबद्धांश्चैतान्=पाशबद्धान्+च+एतान्। किमेतत्=किम् +एतत्।

**प्रकृति प्रत्ययः**-दृष्ट्वा=दृश्+क्त्वा (त्वा)। सविस्मयः=सह (स)+ वि+स्मि+अच् (अ)।

**यस्माच्च येन च यथा च यदा च यच्च,**
**यावच्च यत्र च शुभाशुभमात्मकर्म।**
**तस्माच्च तेन च तथा च तदा च तच्च,**
**तावच्च तत्र च विधातृवशादुपैति॥40॥**

**प्रसङ्गः**- अवश्यम्भाविनी घटना भवत्येव, तां परिवर्तयितुं न कोऽपि समर्थः।

**अन्वयः**-यस्मात् च येन च यथा च यदा च यत् च यावत् च यत्र च शुभाशुभम् आत्मकर्म (भवति)। विधातृवशात् तस्मात् च तेन च तथा च तदा च तत् च तावत् च तत्र च उपैति।

**व्याख्या**=यस्मात् च=यद्धेतोश्च, येन च=यत्कारणेन च, यथा च=येन प्रकारेण च, यदा च=यस्मिन् काले च, यत् च=यादृशं च, यावत् च=यत्परिमाणः।, यत्र च=यस्मिन् देशे च, शुभाशुभम्=पुण्यं पापं च, आत्मकर्म=स्वस्यकर्म, (भवति=जायते) विधातृवशात्=दैववशात्, तस्मात् च=तत्कारणाच्च, तेन च=तत् कारणेन च, तथा च=तेन प्रकारेण च, तदा च=तस्मिन् समये च, तत् च=तत् कर्मफलः।, तावत् च=तत् परिमितः।, तत्र च=तस्मिन् स्थाने च, उपैति=प्राप्नोति।

**सरलार्थः**-इह लोके यस्मात् कारणाद् येन हेतुना येन प्रकारेण यदा यादृशं यत्परिमाणं यस्मिन् काले शुभाऽशुभं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वाऽऽत्मकृतं कर्म भवति, तत्कमफलं दैववशात् तस्मात् कारणात् तेन प्रकारेण तस्मिन् समये तस्मिन् स्थाने च नूनमेव मनुष्यः प्राप्नोति।

**विशेष :-**अत्र चतुर्दश चकाराणां प्रयोगः पादपूर्तयेऽभवत्।

**व्याकरणम् -**

**समासः-**शुभाऽशुभम्=शुभः अशुभः । आत्मकर्म आत्मनः (स्वस्य) कर्म। विधातृवशात्=विधातुः वशः विधातृवशः, तस्मात्।

**सन्धि-विच्छेदः-**यस्माच्च=यस्मात्+च। यावच्च=यावत्+च। शुभाऽशुभमात्मकर्म=शुभ+अशुभम्+आत्मकर्म। तच्च=तत्+च। विधातृवशादुपैति= विधातृ-वशात्+उपैति।

**प्रकृति प्रत्ययः-**यदा=यत्+दाच् (दा)। विधातृ=वि+धा+तृच् (तृ)।

**छन्दः-**अत्र वसन्ततिलका नामवृत्तं वर्तते।

**रोग-शोक-परीताप-बन्धन-व्यसनानि च॥**
**आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्॥41॥**

**प्रसंङ्ग :-** पूर्वकृतकर्मणां फलान्येवात्र पुरुषः प्राप्नोति।

**अन्वयः-**रोगशोकपरीतापबन्धनव्यसनानि एतानि च देहिनाम् आत्मापराधवृक्षाणां फलानि (सन्ति)।

**व्याख्या-** रोगः=शरीरव्याधिः, शोकः=मानसिकचिन्ता, परीतापः=अनेकविधसन्तापः, बन्धनम्=पाशादिना नियन्त्रणम्, व्यसनम्=विपत्तिश्च, एतानि=इमे रोगशोकादयः, च=तथा, देहिनाम्=मनुष्याणाम्, आत्मापराधवृक्षाणाम्= स्वस्य दुष्कर्मतरूणाम्, फलानि=परिणामाः, (सन्ति=वर्तन्ते)।

**सरलार्थः-**अस्मिन् जगति रोगशोकसन्तापबन्धनविपत्तयश्च प्राणिनां कृते स्वस्यापराधरूपवृक्षाणां फलान्येव सन्ति।

**व्याकरणम् -**

**समासः-** रोगशोकपरीतापबन्धनव्यसनानि=रोगश्च शोकश्च परीतापश्च बन्धनं च व्यसनं च इति।
ते एव वृक्षाः, आत्मापराधवृक्षाः, तेषाम्।

**सन्धि-विच्छेदः-**आत्मापराधवृक्षाणाम्=आत्मा+अपराधवृक्षाणाम्। फलान्येतानि=फलानि+एतानि।

**पृकृति-प्रत्ययः-** व्यसनानि=वि+अस्+ल्युट् (यु=अन)+जस् (शि=इ)। देहिनाम्=देह+इनि (इन्)+आम्।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच- 'मित्र! मा मैवं कुरु'। प्रथममस्मदाश्रितानामेतेषां तावत् पाशांश्छिन्धि, तदा मम पाशं पश्चात् छेत्स्यसि। हिरण्यकोप्याह - अहमल्पशक्तिः दन्ताश्च मे कोमलाः, तदेतेषां पाशांश्छेत्तुं कथं समर्थो भवामि? तद् यावन्मे दन्ता न त्रुट्यन्ति तावत् तव पाशं छिनद्मि। तदनन्तरमप्येतेषां बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच 'अस्त्येवं तथापि यथाशक्त्येतेषां बन्धनं खण्डय'। हिरण्यकेनोक्तम् आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्। यतः-**

**व्याख्या-** एतत्=तद्वचनम्, श्रुत्वा=आकर्ण्य, हिरण्यकः=एतदाख्यो मूषकराजः, चित्रग्रीवस्य=कपोतराजस्य, बन्धनं=नियन्त्रणम्, छेत्तुम्=भेदनं कर्तुम्, सत्वरम्=शीघ्रम्,उपसर्पति=समीपं गच्छति। चित्रग्रीवः=कपोतराजः,उवाच= अब्रवीत्, मित्र!=सखे! मा मैवम्=एवं न कुरु, (आदौ मम पाशछेदनप्रयासं मा कुरु) प्रथमम् = आदौ, अस्मदाश्रितानाम्= ममाधीनवर्तिनाम्, एतेषाम्=एषां कपोतानाम्, तावत् =पूर्वम्, पाशान्=बन्धनानि, छिन्धि=कर्तय, तदा=तदनन्तरम्, मम=मे (चित्रग्रीवस्य) पाशम्= बन्धनम्, पश्चात्=अनन्तरम्, छेत्स्यसि=छेदनं करिष्यसि, हिरण्यकोऽपि= मूषकराजोऽपि, आह=उवाच, अहम्=हिरण्यकः, अल्पशक्तिः=स्वल्पबली, दन्ताश्च= दशनाश्च, मे=मम, कोमलाः=मृदुलाः, तत्=तस्माद्धेतोः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एतेषाम्=कपोतानाम्, पाशान्= बन्धनानि, छेतुम्=भेतुम्, कथम्=केन प्रकारेण, समर्थो भवामि=शक्तो भवामि। तत्=तस्मात् कारणात्, यावत्=यावत्कालपर्यन्तम्, मे=मम, दन्ताः=दशनाः, न=नहि, त्रुट्यन्ति=भग्नाः भवन्ति, तावत्=तावत् कालपर्यन्तम्, तव=भवतः (चित्रग्रीवस्य) पाशम्=जालम्, छिनद्मि=खण्डशः करोमि। तदनन्तरम्=तदनु एतेषामपि=एषाम् (कपोतानाम्) अपि, बन्धनम्=पाशम्, यावच्छक्यम्=यथाशक्ति (स्वसामर्थ्यानुसारम्) छेत्स्यामि=खण्डनं करिष्यामि। चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, अस्त्वेवम्= भवत्वेवम्, तथापि=इत्थंभूतेऽपि, यथाशक्ति=निजसामर्थ्यानुसारम्, एतेषाम् =एषां पारावतानाम्, बन्धनं=जालम्, खण्डय=कर्तय। हिरण्यकेन मूषकेन, उक्तम्= कथितम्, आत्मपरित्यागेन= निजरक्षणमपहाय, यद् आश्रितानाम्=सेवकानाम् (कुटुम्बसदस्यानाम्) परिरक्षणम्=सर्वतस्त्राणम्, तत्=नीतिज्ञानम् न=नहि, नीतिविदाम्= नीतिज्ञानाम्, सम्मतम्=अभिमतम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः-** अस्मदाश्रितानाम् अस्मान् आश्रिताः अस्मदाश्रिताः तेषाम्। अल्पशक्तिः=अल्पा शक्तिर्यस्य सः। यथाशक्ति=शक्तिमनतिक्रम्य। आत्मपरित्यागेन =आत्मनः परित्यागःतेन ।

**सन्धिविच्छेदः-** एतच्छ्रुत्वा=एतत्+श्रुत्वा। मैवम्=मा+एवम्। प्रथममस्मदाश्रितानामेतेषाम्=प्रथमम्+ अस्मत्+आश्रितानाम्+एतेषाम्। पश्चाच्छेत्स्यसि= पश्चात्+छेत्स्यसि। हिरण्यकोप्याह=हिरण्यकः+अपि+आह दन्ताश्च=दन्ताः+च। पाशांश्छेतुम्=पाशान्+छेतुम्। यावन्मे=यावत्+मे। तदनन्तरमप्येतेषाम्=तत्+अनन्तरम् अपि+ एतेषाम्। अस्त्वेवम्=अस्तु+एवम्।

**प्रकृति प्रत्ययः-**श्रुत्वा=श्रु+क्त्वा(त्वा)बन्धनम्+बन्ध्+ल्युट् (यु=अन)। छेत्तुम्=छिद्-तुमुन् (तुम्)। शक्यम्=शक्+यत् (य)। उक्तम्=वच्+क्त (त)। परित्यागेन=परि+त्यज्+घञ् (अ)+टा(इन)। परिरक्षणम्=परि+रक्ष्+ ल्युट् (यु= अन)। सम्मतम्=सम्+मन्+क्त (त)। यतः=यत्+तसिल् (तस्)।

**आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि।**
**आत्मानं सततं रक्षेद् दानैरपि धनैरपि॥42॥**

**प्रसङ्गः-**इह जगति आत्मनो रक्षणं सर्वोपरि मन्यते।

**अन्वयः-**आपदर्थे धनं रक्षेत्, धनैः अपि दारान् रक्षेत्, आत्मानं दारैः अपि धनैः अपि सततं रक्षेत्।

**व्याख्या-**आपदर्थे=विपत्तिपरिहारार्थम्, धनं=धनसम्पत्तिम्, रक्षेत्=सङ्ग्रहणं कुर्यात्, धनैरपि=वित्तैरपि, दारान्=स्त्रियम्, रक्षेत्=रक्षणं कुर्यात् (पालयेत्) आत्मानम् = स्वकीयम्, दारैरपि धनैरपि=स्त्रीधनादिभिरपि, सततम्= निरन्तरम्, रक्षेत्=पालयेत्।

**सरलार्थः-**अस्मिन् संसारे मनुष्यः संकटकालार्थं धनसंरक्षणं कुर्यात्। धनादिभिः स्त्रीं रक्षेत्। आत्मरक्षणन्तु, धनदारादिभिरपि सततं कर्तव्यम्।

**व्याकरणम् -**

**समासः-**आपदर्थे=आपदाम् अर्थः आपदर्थः, तस्मिन्।

**सन्धिविच्छेद-** आपदर्थे=आपद्+अर्थे। धनैरपि=धनैः+अपि।

**प्रकृति प्रत्ययः-** आपद्=आ+पद्+क्विप् (सर्वापहारलोपः)। आत्मानम् =अत् मनिन्(मन्)+अम्।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।**
**तन्निघ्नता किं न हतं रक्षता किं न रक्षितम्॥43॥**

**प्रसङ्गः-** लोके प्राणसंरक्षणं सर्वोपरि मन्यते।

**अन्वयः-**प्राणाः धर्मार्थकाममोक्षाणां संस्थिति हेतवः (भवन्ति) तान् निघ्नता किं हतं न (भवति) (तान्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

रक्षता (च) किं रक्षितं न (भवति)।

**व्याख्या -** प्राणाः=असवः (स्वजीवनम्) धर्मार्थकाममोक्षाणाम्=पुरुषार्थ- चतुष्टयस्य, संस्थितिहेतवः= संस्थितौ सम्यक् परिरक्षणे, हेतवः=कारणानि (भवन्ति= जायन्ते) तान्=असून्, निघ्नता=विनाशं कुर्वता, किं न हतम्=किं न विनाशितम्, (भवति=जायते) (तान्=प्राणान्) रक्षता च=पोषयता च (जनेन=पुरुषेण) किं रक्षितं न= किं न गोपायितम् (अखिलं पुरुषार्थपालितमित्यर्थः), (भवति=जायते)।

**सरलार्थः-**लोके प्राणाः पुरुषार्थचतुष्टयस्य हेतवो मन्यन्ते, प्राणान् विनाशयता जनेन किं न विनाशितम्, तथा असून् रक्षता पुरुषेण किं न गोपायितम् अर्थात् सर्वं तेन रक्षितम् इत्यर्थः।

**व्याकरणम् -**

**समासः-**धर्मार्थकाममोक्षाणाम्=धर्मश्च अर्थश्च कामश्च मोक्षश्चेति धर्मार्थकाममोक्षाः, तेषाम्। संस्थिति हेतवः=संस्थितेः (संरक्षणस्य) हेतवः।

**सन्धि-विच्छेदः-** अन्यच्च=अन्यत्+च। किन्न=किम्+न।

**प्रकृति प्रत्ययः-**प्राणाः=प्र+अन्+अच् घञ् वा (अ)+जस् (अस्)। संस्थितिः=सम्+स्था+क्तिन् (ति)। निघ्नता=नि+हन्+क(अ)+तृच् (तृ)। रक्षितम्= रक्ष्+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**चित्रग्रीव उवाच - सखे! नीतिस्तावत् ईदृश्येव, किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः तेनेदं ब्रूवीमि।**

**व्याख्या-** चित्रग्रीवः=कपोतराजः, उवाच=अब्रूवीत्, सखे!=हे मित्र!, नीतिः =नयः, तावत्=निस्सन्देहः, ईदृश्येव=इत्थंभूतैव, किन्तु=परन्तु, अहम्= कपोतराजः, अस्मदाश्रितानाम्=स्वपरिचराणाम्, दुःखं=कष्टम्, सोढुं=सहनं कर्तुम्, सर्वथा= पूर्णरूपेण, असमर्थः=अयोग्यः,(अस्मि), तेन=तेन हेतुना, इदम्=एतत्, ब्रूवीमि= वच्मि।

**व्याकरणम् -**

**समासः-**अस्मदाश्रितानाम्=अस्माकमाश्रिताः अस्मदाश्रिताः, तेषाम्। असमर्थः=न समर्थः।

**सन्धि-विच्छेदः-**चित्रग्रीव उवाच=चित्रग्रीवः+उवाच। नीतिस्तावत्=नीतिः +तावत्। ईदृश्येव=ईदृशी+एव। किन्त्वहमस्मदाश्रितानाम्=किन्तु+अहम्+अस्मत्+ आश्रितानाम्।

**प्रकृति प्रत्ययः-**नीतिः=नी+क्तिन् (ति)। आश्रितानाम्=आ+श्रि+क्त (त)+आम्। सोढुम्=सह्+तुमुन् (तुम्)। सर्वथा=सर्व+थाल् (था)।

यत :-

**धनानि जीवितःैव परार्थे प्राज्ञः उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥44॥**

**प्रसङ्गः-**श्रेष्ठ कार्यसम्पादनाय जीवनस्य वित्तस्य च त्यागः श्रेयष्करो भवति।

**अन्वयः-**प्राज्ञः परार्थे एव धनानि जीवितं च उत्सृजेत्, विनाशे नियते सति सन्निमित्ते त्यागः वरम् (अस्ति)।

**व्याख्या -** यतः=यतोहि, प्राज्ञः=बुद्धिमान् पुरुषः, परार्थे=अन्यस्य (जनस्य) कृते, एव=अवश्यमेव, धनानि=वसूनि, जीवितःा=स्वप्राणांश्च, उत्सृजेत्=त्यजेत् (यतोहि) विनाशे=वित्तजीवनस्य नाशे, नियते सति=निश्चिते सति, सन्निमित्ते=परोपकारकरणाय, त्यागः=धनजीवनयो र्विसर्जनम्, वरम्=उत्कृष्टम् (अस्तीति)।

**सरलार्थः-**अस्मिन् जगति प्राज्ञो जनः परेषां कल्याणाय स्वकीयं जीवनं धनानि च विसर्जयेत्, यतोहि धनजीवितयोर्विनाशं सुनिश्चितमस्ति तर्हि श्रेष्ठकार्य-सम्पादनार्थं धनस्य प्राणानाःा विसर्जनं वरं भवति।

**व्याकरणम् -**

**समासः-**परार्थे=परेषाम् अर्थः परार्थः, तस्मिन्। सन्निमित्ते=सत् निमित्तम् सन्निमित्तम्, तस्मिन्।

**सन्धि-विच्छेदः-**जीवितःैव=जीवितम्+च+एव ।सन्निमित्ते=सत्+निमित्ते। त्यागो विनाशे=त्यागः+विनाशे।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः-** जीवितम्=जीव्+क्त (त)। प्राज्ञः=प्र+ज्ञा+क (अ) ततः स्वार्थे अण्। सन्निमित्ते=सत्+नि+मित्+क्त (त)+ङि (इ)। नियते=नि+यम्+क्त (त) +ङि (इ)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अयमपरश्चासाधारणो हेतुः।**

**व्याख्या -**अयम्=एषः, अपरश्च=अन्यश्च, असाधारणः=प्रमुखः, हेतुः= निमित्तम् (वर्तते)।

**व्याकरणम् -**

**समासः-**असाधारणः=न साधारणः।

**सन्धि-विच्छेदः-**अयमपरश्चासाधारणो हेतुः=अयम्+अपरः+च+ असाधारणः+हेतुः।

**जातिद्रव्यबलानाः। साम्यमेषां मया सह।**
**मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति॥45॥**

**प्रसङ्गः-**यत्र कपोतराजः स्वसमीपस्थितानां कपोतानां रक्षणार्थं स्वकीयान् प्राणान् अपि प्रदातुं तत्परो दृश्यते।

**अन्वयः-**मया सह एषां जातिद्रव्यबलानां च साम्यम् (अस्ति) तत् मत्प्रभुत्वफलं (कदा) किं भविष्यति? (इति) ब्रूहि।

**व्याख्या-**मया=चित्रग्रीवेण, सह=साकम्, एषाम्=एतेषां कपोतानाम्,जातिद्रव्यबलानाः = जातिः = कपोतत्वम्, द्रव्यं = शरीरावयवम्, बलम् = शक्तिः, सहवासादिगुणानां सङ्ग्रहश्च,साम्यं= तुल्यम्, (अस्ति= वर्तते),तत्=तर्हि,मत्प्रभुत्वफलम् =मम स्वामित्वस्य कर्तव्यफलम् (कदा=कस्मिन् काले) किं भविष्यति=कस्मिन् स्वरूपे भविष्यति, इति ब्रूहि=एष कथय।

**सरलार्थः-**एतेषां कपोतानां मया (कपोतराजेन) सहजातिद्रव्यगुणेषु च तुल्यता वर्तते, तदा त्वमेव कथय ममाधिपत्यस्य कर्त्तव्यफलं कस्मिन् समये कस्मिन् स्वरूपे भविष्यति।

**व्याकरणम् -**

**समासः-**जातिद्रव्यबलानाम्=जातिश्च द्रव्यःा बलःोति जातिद्रव्यबलानि, तेषाम्। मत्प्रभुत्वम्=मम प्रभुत्वम्।

**सन्धि-विच्छेदः-**साम्यमेषाम्=साम्यम्+एषाम्। तद् भविष्यति=तत्+ भविष्यति।

**प्रकृति प्रत्ययः-**प्रभुत्वम्=प्रभु+त्व। कदा=किम्+दा (किमः कादेशः)

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **विना वर्तनमेवैते न त्यजन्ति ममान्तिकम्।**
**तन्मे प्राणव्ययेनापि जीवयैतान् ममाश्रितान्॥46॥**

**प्रसङ्गः-**अत्र चित्रग्रीवः स्वबन्धनभेदनापेक्षया पूर्वं कपोतानां पाशमुक्तये मित्राय निवेदयति।

**अन्वयः-**एते वर्तनं विना एव मम अन्तिकं न त्यजन्ति, तत् मे प्राणव्ययेन अपि मम आश्रितान् एतान् जीवय।

**व्याख्या-** अन्यच्च=अपरःा, एते=इमे कपोताः, वर्तनं=वृत्तिम् (जीविकाम्) विना=अतिरिक्तम्, ममान्तिकम्=मम (चित्रग्रीवस्य) साहचर्यम्, न=नहि, त्यजन्ति= मुःान्ति,तत्=तस्मात् कारणात्, मे=मम, प्राणव्ययेनापि=असुपरित्यागेनापि, ममाश्रितान् =मद्भृत्यान् कपोतान्, एतान्=इमान्, जीवय=पूर्वं रक्ष।

**सरलार्थ :-**जीविकां विनापि इमे कपोता मम साहचर्यं नैव त्यजन्ति, एतदर्थं पूर्वं ममाश्रितान् एतान् कपोतान् परिपालय।

**व्याकरणम् -**

**समासः-** प्राणव्ययेनापि=प्राणानां व्ययः प्राणव्ययः तेन।

**सन्धि-विच्छेदः-**वर्तनमेवैते=वर्तनम्+एव+एते।ममान्तिकम् मम+अन्तिकम्। जीवयैतान्=जीवय+एतान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः**-वर्तनम्=वृत्+ल्युट् (यु=अन)। अन्तिकम्=अन्त+ठन् (ठ=इक)। आश्रितान्=आ+श्रि+क्त (त)+शस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

किंच -

**मांसमूत्रपुरीषाऽस्थिपूरितेऽत्र कलेवरे।**
**विनश्वरे विहायऽऽस्थां यशः पालय मित्र मे ॥47॥**

**प्रसङ्गः**-अत्र शरीररक्षणापेक्षया कीर्तिरक्षणं श्रेष्ठतरमस्तीति वर्णितम्।

**अन्वयः**-मित्र! मांसमूत्रपुरीषास्थिपूरिते विनश्वरे अत्रकलेवरे आस्थां विहाय, मे यशः पालय।

**व्याख्या**- किंच=अपि च, मित्र!=हे सखे!, मांसमूत्रपुरीषास्थिपूरिते= मांसंच=पिशितंच, मूत्रंच=प्रस्रावश्च, पुरीषंच=मलंच, अस्थि च=सक्थि च तैः पूरितं=परिपूर्णे, तस्मिन्, विनश्वरे=विनाशशीले, अत्र=अस्मिन्, कलेवरे=शरीरे, आस्थाम्=आसक्तिम्, विहाय=परित्यज्य, मे=मम, यशः=कीर्तिम्, रक्ष=परिपालय।

**सरलार्थः**-हे मित्र ! मांसमलमूत्रास्थिपरिपूर्णेऽस्मिन् विनाशशीले शरीरे आसक्तिं विहाय शरणागतस्य मित्रस्य वचनं परिरक्ष्य स्वयशः परिपालय।

**व्याकरणम् -**

**समासः**-मांसमूत्रपुरीषास्थिपूरिते=मांसंच मूत्रंच पुरीषंच अस्थि च तैः पूरितं मांसमूत्रपुरीषास्थिपूरितम्, तस्मिन्।

**सन्धि-विच्छेदः**- किंच=किम्+च। मांसमूत्रपुरीषास्थिपूरितेऽत्र=मांस-मूत्रपुरीष+अस्थिपूरिते+अत्र। विहायास्थाम्= विहाय+आस्थाम्।

**प्रकृति प्रत्ययः**-पूरित=पूर्+क्त (त)+ङि(इ)। अत्र=इदम्+त्रल्(त्र) (प्रकृतेः अश् भावश्च)। विहाय=वि+हा+ल्यप्(य)। आस्थाम्=आ+स्था+अङ् (अ)+अम्।

**छन्द :**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरंच पश्य-

**यदि नित्यमनित्येन निर्मलं मलवाहिना।**
**यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम्॥48॥**

**प्रसङ्गः**-शरीररक्षणमत्यावश्यकं, परं तस्यापेक्षया यशो रक्षणं श्रेष्ठतरं मन्यते।

**अन्वयः**-यदि अनित्येन मलवाहिना कायेन नित्यं निर्मलं यशः लभ्येत, तत् किं नु लब्धं न भवेत्।

**व्याख्या**-अपरंच=अन्यच्च, पश्य=अवलोकय, यदि=चेत्, अनित्येन= नश्वरेण, मलवाहिना=पुरीषयुक्तेन, कायेन=शरीरेण, नित्यं=विनाशरहितम्, निर्मलं= पवित्रम्, यशः=कीर्तिः, लभ्येत=प्राप्येत, तत्=तर्हि, नु=इति वितर्के, किं=वस्तु, न लब्धं=नैव प्राप्तम्, भवेत्=लभेत (स्यात्)।

**सरलार्थः**-विनाशशीलेन मलमूत्रधारिणाऽनेन शरीरेण यदि नित्यं निर्मलंच यशः प्राप्येत तर्हि लोकस्य अखिलं वस्त्वधिगतमिति बोध्यम्।

**व्याकरणम् -**

**समासः**-अपरम्=न परो यस्मात् तत्। मलवाहिना=मलानि वहतीति मलवाही, तेन।

**सन्धि-विच्छेदः**- अपरंच=अपरम्+च। तन्न=तत्+न। भवेन्नु=भवेत्+नु।

**प्रकृति प्रत्ययः**-अनित्येन=न+नि+त्यप् (त्य)+टा (इन)। वाहिना= वह्+णिनि (इन्)+टा (आ)। लब्धम्=लभ्+क्त (त)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

यतः-

**शरीरस्य गुणानांच दूरमत्यन्तमन्तरम्।**
**शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः॥49॥**

**प्रसङ्गः**-अत्र कपोतराजश्चित्रग्रीव आत्मनो यशः प्रति चिन्तितो दृश्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**-शरीरस्य गुणानाञ्च अन्तरम् अत्यन्तं दूरम् (अस्ति), शरीरं क्षणविध्वंसि (भवति) गुणाः कल्पान्तस्थायिनः (भवन्ति)।

**व्याख्या**-यतः=यतोहि, शरीरस्य=देहस्य, गुणानाञ्च=दयादाक्षिण्यादिगुणानाञ्च, अन्तरं=भेदः, अत्यन्तम्= अधिकम्, दूरम्=नान्तिकम्, (अस्ति=वर्तते) शरीरं =वपुः, क्षणविध्वंसि = क्षणभङ्गुरम्, (भवति = जायते) गुणाः = दयादाक्षिण्यादयस्तु, कल्पान्तस्थायिनः=युगान्तस्थायिनो भवन्ति।

**सरलार्थः**-दयादाक्षिण्यादिगुणेषु शरीरे चातीव भेदो वर्तते, यतोहि शरीरं क्षणभङ्गुरं भवति गुणाश्च बहुकालस्थायिनो भवन्ति। अतो यशसो रक्षणमेव श्रेष्ठतरं मन्यते।

**व्याकरणम् -**

**समासः**-क्षणविध्वंसि=क्षणेन विध्वंसते इति। कल्पान्तस्थायिनः=कल्पस्य अन्तः कल्पान्तः, तं यावत् तिष्ठन्तीति।

**सन्धि-विच्छेदः**- गुणानाञ्च = गुणानाम् + च। दूरमत्यन्तमन्तरम् = दूरम् + अत्यन्तम्+अन्तरम्।

**प्रकृति प्रत्ययः**-शरीरस्य=शॄ+ईरन्(ईर)+ङस् (स्य) विध्वंसि= वि+ध्वंस्+णिनि (इन्)। स्थायिनः=स्था+ णिनि (इन्)+युक् (य्)+जस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत् - 'साधु मित्र! साधु, अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते।' एवमुक्त्वा तेन सर्वेषां कपोतानां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान् सादरं सम्पूज्य आह-सखे चित्रग्रीव! सर्वथाऽत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मनि अवज्ञा न कर्तव्या।**

**व्याख्या** - इति=इत्थं कपोतराजस्य वचनम्। आकर्ण्य=संश्रुत्य, प्रहृष्टमनाः= प्रसन्नचेताः, पुलकितः= रोमाञ्चितः, सन्=भवन्, अब्रवीत्=उवाच, साधु मित्र!= शोभनं सखे!, साधु=शोभनम्, अनेनाश्रितवात्सल्येन=एतेन अनुचरानुरागेण, त्रैलोक्यस्य= स्वर्गमर्त्यपाताललोकस्यापि, प्रभुत्वं=स्वामित्वम्, त्वयि=भवति (कपोतराजे) युज्यते= युक्तं भवति। एवम्=इत्थम्, उक्त्वा=कथयित्वा, तेन= हिरण्यकेन, सर्वेषां=अखिलानां कपोतानाम्, बन्धनानि= जालनियन्त्रणानि, छिन्नानि= खण्डितानि। ततः=तदनन्तरम्, हिरण्यकः=मूषकराजः, सर्वान्= अखिलान्कपोतान्, सादरम्=सम्मानपूर्वकम्, सम्पूज्य =सुष्ठु पूजयित्वा (अतिथि सत्कारं कृत्वा) आह=अवोचत्, सखे चित्रग्रीव!=मित्र चित्रग्रीव! सर्वथा=सर्वप्रकारेण, अत्र=अस्मिन्, जालबन्धनविधौ= व्याधपाशनियन्त्रणकार्ये, सति=जाते, दोषम्= स्वस्यापमानम्, आशङ्क्य=सम्भाव्य, आत्मनि=स्वस्मिन्, अवज्ञा=तिरस्कृतिः, न कर्तव्या=नैव करणीया।

**व्याकरणम् -**

**समासः**-प्रहृष्टमनाः=प्रहृष्टं मनो यस्य सः। आश्रितवात्सल्येन=आश्रितेषु वात्सल्यः आश्रितवात्सल्यः, तेन। त्रैलोक्यस्य=त्रयाणां लोकानां समाहारः, त्रिलोकी, त्रिलोकी एव त्रैलोक्यम्, तस्य।

**सन्धि-विच्छेदः**-इत्याकर्ण्य=इति+आकर्ण्य। त्रैलोक्यस्यापि=त्रैलोक्यस्य+ अपि। ततो हिरण्यकः=ततः+ हिरण्यकः। दोषमाशङ्क्य=दोषम्+आशङ्क्य।

**प्रकृति प्रत्ययः**-आकर्ण्य=आ+कर्ण+ल्यप् (य)। प्रहृष्टः=प्र+हृष्+ क्त(त)। पुलकितः=पुलक+इतच् (इत)। वात्सल्येन=वत्सल+ष्यञ् (य) (भावार्थेऽयं प्रत्ययः)+टा (इन)। उक्त्वा=वच्+क्त्वा(त्वा)। छिन्नानि=छिद्+ क्त(त)+जस् (शि= इ)। आशङ्क्य=आ+शङ्क्+ल्यप् (य)। कर्तव्या=कृ+तव्यत् (तव्य)+टाप् (आ)।

यतः- **योऽधिकाद् योजनशतात् पश्यतीहामिषं खगः।**
**स एव प्राप्तकालस्तु पाशबन्धं न पश्यति॥50॥**

**प्रसङ्गः**-अत्र कालस्य महत्त्वं प्रतिपादितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः-**इह यः खगः योजनशतात् अधिकात् आमिषं पश्यति, स एव प्राप्तकालः तु पाशबन्धं न पश्यति।

**व्याख्या-** यतः=यतोहि, इह=अस्मिन् जगति, यः खगः=यः पक्षिविशेषः श्येनः, योजनशतात्=शतयोजनात् (क्रोशशतात्) अधिकात्=अधिकदूरतः, आमिषं= भक्षणयोग्यं मांसादिकम्, पश्यति=अवलोकयति, स एव=स खग एव, प्राप्तकालस्तु= समये आगते सति, पाशबन्धनं=जालस्य बन्धनम्, न पश्यति=नैवावलोकयति।

**सरलार्थः-**इह लोके यः श्येनाख्यः खगः शतयोजनादपि अधिकदूरादामिषं पश्यति, स एव खगः समये आगते सति जालबन्धनमपि द्रष्टुं न शक्नोति।

**व्याकरणम् -**

**समासः-**योजनशतम्=योजनानां शतं योजनशतम्, तस्मात्। प्राप्तकालः= प्राप्तःकालः यस्य सः। पाशबन्धम्=पाशस्य बन्धः पाशबन्धः, तम्।

**सन्धि-विच्छेदः-**पश्यतीहामिषम्=पश्यति+इह+आमिषम्, प्राप्तकालस्तु= प्राप्तकालः+तु।

**प्रकृति+प्रत्ययः-**योजनम्=युज्+ल्युट्(यु=अन)। आमिषम्=अम्+टिषच् (इष) दीर्घश्च। प्राप्तः=प्र+आप्+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः। -

**शशिदिवाकरयोर्ग्रहपीडनम्,**
**गजभुजंगमयोरपि बन्धनम्।**
**मतिमतां च विलोक्य दरिद्रतां,**
**विधिरहो बलवानिति मे मतिः ॥51॥**

**प्रसङ्गः-**अस्मिन् श्लोके भाग्यमेव बलवद् भवतीति प्रतिपादितम्।

**अन्वयः-**शशिदिवाकरयोः ग्रहपीडनम्, गजभुजङ्गमयोः अपि बन्धनम्, मतिमतां दरिद्रतां च विलोक्य, अहो विधिः बलवान् इति मे मतिः (अस्ति)।

**व्याख्या-** अपरः।=अन्यच्च, शशिदिवाकरयोः=चन्द्रसूर्ययोः ग्रहपीडनम्= राहुणाग्रसनम्, गजभुजङ्गमयोरपि= हस्तीसर्पयोरपि, बन्धनम्=नियन्त्रणम्, मतिमताम्= बुद्धिमताम्, दरिद्रताः।=निर्धनताः।, विलोक्य=दृष्ट्वा, अहो=इत्यव्ययं खेदे, विधिः= भाग्यम्, बलवान्=सर्वशक्तिसम्पन्नः, इति=इत्थम्, मे=मम, मतिः=बुद्धिः (अस्ति= वर्तते)।

**सरलार्थः-**चन्द्रसूर्ययोर्राहुणा ग्रहेण पीडनम्, हस्तीसर्पयोर्नियन्त्रणम्, विदुषाः। दारिद्र्यं दृष्ट्वा भाग्यं नूनमेव बलवद् भवतीति सिध्यति।

**व्याकरणम् -**

**समासः-**शशिदिवाकरयोः=शशिश्च दिवाकरश्च शशिदिवाकरौ, तयोः। ग्रहपीडनम्=ग्रहेण पीडनम् (ग्रसनम्) गजभुजङ्गमयोः=गजश्च भुजङ्गमश्च गजभुजङ्गमौ तयोः। मतिमताम्=मतिः अस्ति एषाम् इति मतिमन्तः, तेषाम्। दरिद्रताम्=दरिद्रस्य भावो दरिद्रता, ताम्।

**सन्धि-विच्छेदः-**अपरः।=अपरम्+च। विधिरहो=विधिः+अहो।

**प्रकृति प्रत्ययः-**पीडनम्=पीड्+ल्युट् (यु=अन)। बन्धनम्=बन्ध्+ल्युट्= (यु+अन) मतिमताम्=मन्+क्तिन् (ति)+मतुप् (मत्) +आम्। विलोक्य=वि+लोक्+ ल्यप् (य)। बलवान्=बल+मतुप् (मत्) मस्य वत्म्।

**छन्दः-**अत्र द्रुतविलम्बितनामधेयं वृतं वर्तते।

अन्यच्च -

**व्योमैकान्तविहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदः,**
**वध्यन्ते निपुणैरगाधसलिलान् मत्स्याः समुद्रादपि।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः।**
**कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥52॥**

**प्रसङ्गः-**अत्र मृत्योः (कालस्य) माहात्म्यं वर्णितम्।

**अन्वयः-**व्योमैकान्तविहारिणः अपि विहगाः आपदं सम्प्राप्नुवन्ति निपुणैः अगाधसलिलात् समुद्रात् अपि मत्स्याः वध्यन्ते। इह दुर्नीतं किम् अस्ति? सुचरितं किम् अस्ति? स्थानलाभे कः गुणः अस्ति, हि व्यसनप्रसारित करः कालः दूरात् अपि गृह्णाति।

**व्याख्या-** अन्यच्च=अपरः, व्योमैकान्तविहारिणः=व्योमस्य=आकाशस्य एकान्ते = निर्जनप्रदेशे (उपरि भागे) विहारिणः = भ्रमणशीलाः, अपि विहगाः = पक्षिणोऽपि, आपदं-पाशबन्धनरूपां विपत्तिम्, सम्प्राप्नुवन्ति=समधिगच्छन्ति, निपुणैः =कुशलैः धीवरैः, अगाधसलिलात्=अतलस्पर्शाज्जलात्, समुद्रादपि= रत्नाकरादपि, मत्स्याः=मीनाः, बध्यन्ते=ध्रियन्ते। इह=अस्मिन् लोके, दुर्नीतम्=दुश्चरितम्, किमस्ति= किं वर्तते, सुचरितं=शोभनमाचरणम्, किमस्ति=किं वर्तते, स्थानलाभे= सुरक्षितप्रदेशप्राप्तौ, कः:गुणः=किं फलम्, अस्ति=वर्तते, हि=यतोहि, व्यसनप्रसारितकरः= विपत्तौप्रसारितहस्तः, कालः=मृत्युः समयो वा, दूरादपि=विप्रकृष्टादपि, गृह्णाति=गृहणं करोति।

**सरलार्थ :-**गगने भ्रमणशीलाः खगाः अपि विपत्तिं सम्प्राप्नुवन्ति, धीवराः सागरादपि मत्स्याः ध्रियन्ते, अस्मिन् जगति न काचिद् दुर्नीतिः वर्तते न च सुनीतिः। श्रेष्ठस्थानलाभेऽपि न किमपि प्रयोजनं सिध्यति। यतोहि विपदिआगतायां सत्यां दूरत एव हस्तौ प्रसार्य गृह्णाति।

**व्याकरणम् -**

**समासः-**व्योमैकान्तविहारिणः=व्योम्नः एकान्तः व्योमैकान्तः, तस्मिन् विहरन्तीति। अगाधसलिलात्= अगाधानि सलिलानि यस्मिन् स अगाधसलिलः, तस्मात्। स्थानलाभे=स्थानस्य लाभः स्थानलाभः तस्मिन्। व्यसनप्रसारितकरः=व्यसने (दुःखसमये) प्रसारितौ हस्तौ येन सः।

**सन्धि-विच्छेदः-**व्योमैकान्तविहारिणोऽपि=व्योम+एकान्तविहारिणः+अपि।सम्प्राप्नुवन्त्यापदम्=सम्+ प्राप्नुवन्ति+ आपदम्। समुद्रादपि=समुद्रात्+अपि। किमिहास्ति=किम्+इह+अस्ति।

**प्रकृति प्रत्ययः-**विहारिणः=वि+हार+इनि=(इन्)+जस् (अस्)। दुर्नीतम् =दुर्+नी+क्त (त)। सुचरितम्=सु+ चर्+क्त (त)। प्रसारितः=प्र+सृ+णिच् (इ)+ क्त(त)। करः=कृ+अप्(अ)।

**छन्दः-**अत्र शार्दूलविक्रीडितं नामवृत्तं वर्तते।

इति प्रबोध्य आतिथ्यं कृत्वा आलिङ्ग्य च तेन सम्प्रेषितश्चित्रग्रीवोऽपि सपरिवारो यथेष्टदेशान् ययौ, हिरण्यकोऽपि स्वविवरं प्रविष्टः।

**व्याख्या-** इति=एवंविधम्, प्रबोध्य=आश्वासनं प्रदाय, आतिथ्यम्= अतिथिसत्कारम्, कृत्वा=विधाय, आलिङ्ग्य च=आलिङ्गनं च कृत्वा, चित्रग्रीवः= कपोतराजः, तेन=हिरण्यकेन, सम्प्रेषितः=विसर्जितः, यथेष्टदेशान्= स्वाभिलषितस्थानानि, सपरिवारः=सबान्धवः, ययौ=प्रस्थितवान्। हिरण्यकोऽपि= मूषकराजोऽपि स्वविवरम्= निजबिलम्, प्रविष्टः=प्रविशति स्म।

**व्याकरणम् -**

**समासः-**आतिथ्यम्=अतति गच्छतीति अतिथिः, अतिथये इदम् आतिथ्यम्। सपरिवारः=परिवारेण सहितः। स्वविवरम्=स्वस्य विवरम्।

**सन्धि-विच्छेदः-**सम्प्रेषितश्चित्रग्रीवोऽपि=सम्प्रेषितः+चित्रग्रीवः+अपि। हिरण्यकोऽपि=हिरण्यकः+अपि।

**प्रकृति प्रत्ययः-**प्रबोध्य=प्र+बुध्+णिच्+ल्यप् (य)। कृत्वा=कृ+क्त्वा (त्वा)। सम्प्रेषितः=सम्+प्र+इष्+ क्त(त)। प्रविष्टः=प्र+विश्+क्त (त)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**यानि कानि च मित्राणि कर्तव्यानि शतानि च।**
**पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥53॥**

**प्रसङ्गः-**लोके लघुदीर्घयोः शिक्षिताशिक्षितयो र्भेदं विना बहूनि मित्राणि कर्तव्यानि।

**अन्वयः-**(पुरुषेण) यानि कानि च शतानि च मित्राणि कर्तव्यानि, पश्य, कपोताः मूषिकमित्रेण मुक्तबन्धनाः (जाताः)।

**व्याख्या-**पुरुषेण=मनुष्येण, यानि कानि च=यादृशानि तादृशानि दुर्बलानि सबलानि धनानि निर्धनानि वा, शतानि=बहुसंख्याकानि, मित्राणि=सुहृदः, कर्तव्यानि= करणीयानि, पश्य=अवलोकय, कपोताः=पारावताः, मूषिकमित्रेण=आखु (मित्रेण) सुहृदा, मुक्तबन्धनाः=बन्धनरहिताः (जाताः=अभूवन्)।

**सरलार्थः-**इह लोके सर्वैः प्राणिभिः यानि कानि सबलानि दुर्बलानि च बहूनि मित्राणि कार्याणि। यतोहि एकेन सामान्येन हिरण्यकमित्रेण सर्वे कपोताः व्याधपाशात् मुक्ताः सञ्जाताः।

**व्याकरणम् -**

**समासः-**मूषिकमित्रेण=मूषिकः एव मित्रं मूषिकमित्रम्, तेन। मुक्तबन्धनाः= मुक्तं बन्धनं येषां ते।

**सन्धि-विच्छेदः-** कपोता मुक्तबन्धनाः=कपोताः+मुक्तबन्धनाः।

**प्रकृति प्रत्ययः-**कर्तव्यानि=कृ+तव्यत्(तव्य)+जस्=शि((इ)। मुक्तम्= मुच्+क्त (त)। बन्धनाः=बन्ध्+ल्युट्(यु=अन)+जस्=(अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदामाह- 'अहो हिरण्यक! श्लाघ्योऽसि, अतोऽहमपि त्वया सह मैत्री कर्तुमिच्छामि, अतस्त्वं मां मैत्र्येणानुगृहीतुमर्हसि' एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- 'कस्त्वम्'? स ब्रूते लघूपतनकनामा वायसोऽहम्। हिरण्यको विहस्याह- 'का त्वया सह मैत्री'?

**व्याख्या-** अथ=एतदनन्तरम्, लघुपतनकनामा=लघुपतनाख्यः, काकः= वायसः, सर्ववृत्तान्तदर्शी= अखिलवृत्तान्तदर्शकः, साश्चर्यम्=आश्चर्यपूर्वकम्, इदमाह= एतद् उवाच, अहो=अये!, हिरण्यक!=मूषकराज!, श्लाघ्योऽसि= प्रशंसनीयोऽसि, अतः=अस्माद्धेतोः, अहमपि=वायसोऽपि, त्वया सह=हिरण्यकेन सार्द्धम्, मैत्रीम्= सख्यम्, कर्तुं=विधातुम्, इच्छामि=अभिलषामि, अतः=अस्मात् कारणात्, माम्= लघुपतनकम्, मैत्र्येण=सौहार्देन, अनुगृहीतुम्= कृतकृत्यं कर्तुम्, अर्हसि= योग्योऽसि। एतत्=वायसवचनम्, श्रुत्वा=आकर्ण्य, हिरण्यकोऽपि=एतदाख्यो वायसोऽपि विवरा-भ्यन्तराद्=बिलस्य मध्यतः, आह=अवदत्, कस्त्वम्=त्वं कः, सः= वायसः, ब्रूते= वदति, लघुपतनकनामा=एतदाख्यः, वायसोऽहम्=काकोऽहमस्मि। हिरण्यकः= मूषकराजः, विहस्य=हसित्वा, आह=अब्रवीत्, का=कीदृशी, त्वया=भवता (काकेन) सह=साकम्=मैत्री, सौहार्दम् इति।

**व्याकरणम् -**

**समासः-**लघुपतनकनामा=लघुपतनक इति नाम यस्य सः। सर्ववृत्तान्तदर्शी = सर्वं च तद् वृत्तान्तं च सर्ववृत्तान्तम्, तत् पश्यतीति। साश्चर्यम्= आश्चर्येण सहितम्। विवराभ्यन्तरात्=विवरस्याभ्यन्तरं विवराभ्यन्तरम्, तस्मात्।

**सन्धि-विच्छेदः-**साश्चर्यम्=स+ आश्चर्यम्। श्लाघ्योऽसि=श्लाघ्यः+ असि। अतोऽहमपि=अतः+अहम्+ अपि। अतस्त्वम्=अतः+त्वम्। एतच्छ्रुत्वा= एतत् +श्रुत्वा, विवराभ्यन्तरादाह=विवर+अभ्यन्तरात्+आह। कस्त्वम्=कः+ त्वम्। हिरण्यको विहस्याह=हिरण्यकः+विहस्य+आह।

**प्रकृति प्रत्ययः-**दर्शी=दृश्+णिनि (इन्)। गृहीतुम्=गृह्+तुमुन् (तुम्) इटो दीर्घश्च। श्रुत्वा=श्रु+क्त्वा (त्वा)। विहस्य=वि+हस्+ल्यप् (य)।

यतः- **यद् येन युज्यते लोके बुधस्तत् तेन योजयेत्।**
**अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥54॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः-**अस्मिन् श्लोके भक्ष्यभक्षकयोर्मैत्री भवितुं नार्हतीति प्रतिपादितम्।

**अन्वयः-**लोके येन यत् युज्यते बुधः तेन तत् योजयेत्, अहम् (भवतः) अन्नम् (अस्मि) भवान् (मम) भोक्ता (अस्ति) (अतः) प्रीतिः कथं भविष्यति।

**व्याख्या-** यतः=यतोहि, लोके=जगति, येन=पुरुषेण सह, यत्=यो नरः, युज्यते=योजयितुं योग्यो भवति, बुधः=विद्वान्, तत्=व्यक्तिविशेषम्, तेन=व्यक्तिविशेषेण सार्धम्, योजयेत्=सम्मेलयेत्, अहम्=हिरण्यकाख्यो मूषकः(भवतः= तव) अन्नम्-भक्ष्यम्, (अस्मि) भवान्=त्वम् (काकः) (मम=मे)(मूषकस्य) भोक्ता= खादिता (भक्षणकर्ता) (अस्ति) (अतः=अस्मात्, कारणात्) प्रीतिः=मैत्री, कथं=केन प्रकारेण, भविष्यति=सम्पत्स्यते।

**सरलार्थः-**लोके यः पुरुषः येन पुरुषेण सह योजयितुं योग्यो भवति, प्राज्ञः पुरुषः तेन योग्येन साकं तं योग्यं नरं योजयति। अतोऽहं मूषकः तव भक्ष्यमस्मि भवाःा मम भक्षको वर्तते। एतदर्थं भवता सह मम मैत्री कथमपि भवितुं न शक्नोति।

**व्याकरणम् -**

**सन्धि-विच्छेदः-**यद् येन=यत्+येन। बुधस्तत्=बुधः+तत्। प्रीतिर्भविष्यति = प्रीतिः+भविष्यति।

**प्रकृति प्रत्ययः-**बुधः=बुध्+क(अ)। भोक्ता=भुज्+तृच्(तृ)। प्रीतिः=प्री +क्तिन् (ति)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरःा - **भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम्।**
**शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥55॥**

**प्रसङ्गः-**अत्र भक्ष्य भक्षकयोर्मैत्री मृगशृगालवद् विपत्तेः कारणं भवतीति वर्णितम्।

**अन्वयः-**भक्ष्यभक्षकयोः प्रीतिः विपत्तेः एव कारणं (भवति) शृगालात् पाशबद्धः असौ मृगः काकेन रक्षितः।

**व्याख्या-**भक्ष्यभक्षकयोः=खाद्यखादकयोः,प्रीतिः=मित्रता, विपत्तेः=आकस्मिक- दुःखस्य, एव=नूनम्, कारणं=हेतुः, (भवति=जायते), शृगालात्= जम्बूकात्, पाशबद्धः =जालनियन्त्रितः, असौ हरिणः=स मृगः काकेन= वायसेन, रक्षितः =पाशान्मुक्तः।

**सरलार्थः-**लोके खाद्यखादकयोर्मैत्री विपदः करिका भवति यथा भक्षकेन शृगालेन संयमितो भक्ष्यो मृगस्तेन वायसेन स्वोपायेन संरक्षितः।

**व्याकरणम् -** भक्ष्यभक्षकयोः=भक्षितुं योग्यः भक्ष्यः, भक्ष्यश्च भक्षकश्च भक्ष्यभक्षकौ, तयोः ।पाशबद्धः=पाशेन बद्धः।

**सन्धि-विच्छेदः-**प्रीतिर्विपत्तेः=प्रीतिः+विपत्तेः। पाशबद्धोऽसौ=पाशबद्धः +असौ।

**प्रकृति प्रत्ययः-**भक्ष्यः=भक्ष्+ण्यत्(य)।भक्षकः=भक्ष्+ण्वुल्(वु+अक)। विपत्तेः=वि+पत्+क्तिन्(ति)+ङस्(अस्)। कारणम्=कृ+णिच्(इ)+ल्युट्(यु=अन)। रक्षितः=रक्ष्+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**वायसोऽब्रवीत्- कथमेतत्? हिरण्यकः कथयति-**

**व्याख्या -** वायसः=काकः, अब्रवीत्=उवाच, कथम्=केन प्रकारेण, एतत्= इदं जातम्, हिरण्यकः=मूषकराजः, कथयति-वदति।

**व्याकरणम् -**

**सन्धि-विच्छेदः-**वायसोऽब्रवीत्=वायसः+अब्रवीत्।

**प्रकृति प्रत्ययः-**कथम्=किम्+थमु (थम्) किमःकश्चादेशः।

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## 'शृगाल-मृग-वायस-कथा'

**अस्ति मगधदेशे चम्पकवतीनाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छयाभ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत्। आः कथमेतन्मांसं सुललितं भक्षयामि? भवतु विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत्- मित्र! कुशलं ते? मृगेणोक्तम् कस्त्वम्? स ब्रूते- क्षुद्रबुद्धिनामा जम्बुकोऽहम्। तत्रारण्ये बन्धुहीनो मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा भवितव्यमिति। मृगेणोक्तम् एवमस्तु।**

**व्याख्या-**

मगधदेशे=एतन्नामके देशे, चम्पकवतीनाम्=चम्पकवती नाम्ना प्रसिद्धम्, अरण्यानी=महावनम्, अस्ति=वर्तते, तस्याम्=तस्मिन् महावने, चिरात्=बहोःकालात् महता=अतिशयेन, स्नेहेन=अनुरागेण, मृगकाकौ=हरिणवायसौ, निवसतः=निवासं कुरुतः। स च=तथा प्रसिद्धः, मृगः=हरिणः, स्वेच्छया=निजाभिलाषया, भ्राम्यन्=भ्रमणं कुर्वन्, हृष्टपुष्टाङ्गः=पुष्टशरीरयुक्तः, केनचित्=केनापि अपरिचितेन, शृगालेन= जम्बूकेन, अवलोकितः=दृष्टः। तम्=मृगम्, दृष्ट्वा=अवलोक्य, शृगालः=जम्बूकः, अचिन्तयत्=अविचारयत्, आः=इति प्रसन्नार्थे, कथम्=केन प्रकारेण, एतन्मांसम् =अस्य मृगस्य आमिषम्, सुललितम्=अतीव मनोहरम्, भक्षयामि=खादिष्यामि, भवतु=अस्तु, विश्वासम्=प्रतीतिम्, तावत्=सर्वादौ, उत्पादयामि=उत्पन्नं करोमि। इति =एतत् आलोच्य=मनसि विचार्य, उपसृत्य=मृगस्य समीपं गत्वा, अब्रवीत्=अवोचत्, मित्र!= सखे!, ते=तव, कुशलं=कल्याणं वर्तते, मृगेण=हरिणेन, उक्तम्=कथितम्, कस्त्वम्= त्वं कोऽसि, सः=शृगालः, ब्रूते=वदति, क्षुद्रबुद्धिनामा=क्षुद्रबुद्धिनामकः, जम्बूकोऽहम् =शृगालोऽस्मि। तत्र=तस्मिन्, अरण्ये=कानने, बन्धुहीनः=स्वजनरहितः, मृतवत्=मृतेन सदृशः, निवसामि=तिष्ठामि, इदानीम्=सम्प्रति, त्वां=भवन्तम्, मित्रमासाद्य=सुहृदो-ऽवाप्य, पुनः=भूयः, सबन्धु=स्वजनेन, (त्वया सह) जीवलोकं=प्राणिजगत्, प्रविष्टो-ऽस्मि=प्रविष्टवान् अस्मि। अधुना=इदानीम्, तव=भवतः, अनुचरेण=सेवकेन, मया= जम्बुकेन, सर्वथा=पूर्णतया, भवितव्यमिति =वर्तितव्यमिति। मृगेण=हरिणेन, उक्तम्= कथितम्, एवम्=इत्थम्, अस्तु=भवतु।

**व्याकरणम् -**

**समासः**-मृगकाकौ=मृगश्च काकश्च तौ मृगकाकौ। हृष्टपुष्टाङ्गः=हृष्टानि पुष्टानि च अङ्गानि यस्य सः। स्वेच्छया=स्वस्य इच्छा, तया। क्षुद्रबुद्धिनामा= क्षुद्राबुद्धिः यस्य स क्षुद्रबुद्धिः, स एव नाम यस्य स इति। जीवलोकम् =जीवानां लोकः जीवलोकः तम्। अनुचरेण=अनु (पश्चात्) चरतीति अनुचरः , तेन।

**सन्धि-विच्छेदः-** चिरान्महता= चिरात् + महता।स्वेच्छया=स्व+इच्छया। केनचिच्छृगालेनावलोकितः= केनचित्+शृगालेन+अवलोकितः। इत्यालोच्य=इति+ आलोच्य। उपसृत्याब्रवीत्=उपसृत्य+अब्रवीत्। कस्त्वम्=कः+ त्वम्। सबन्धुर्जीवलोकम्=सबन्धुः+जीवलोकम्। प्रविष्टोऽस्मि=प्रविष्टः+अस्मि। मृगेणोक्तम्=मृगेण+ उक्तम्।

**प्रकृति प्रत्ययः**-अरण्यानि=अरण्य+आनुक् ङीष् च (आन्-ई)। अव-लोकितः=अव+लोक्+क्त (त)। दृष्ट्वा=दृश्+क्त्वा (त्वा)। विश्वासम्= वि+श्वस् +घञ् (अ)। आलोच्य=आ+लोच्+ल्यप् (य)। उपसृत्य=उप+ सृज्+ल्यप् (य)। आसाद्य=आ+सद्+णिच् (इ)+ल्यप् (य)। भवितव्यम् =भू+तव्यत् (तव्य)।

**ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत् - 'सखे! चित्राङ्ग! कोऽयं द्वितीयः?' मृगो ब्रूते- जम्बूकोऽयमस्मत्सख्यमिच्छन्नागतः। काको ब्रूते- मित्र! अकस्मादागन्तुना सह मैत्री न युक्ता।**

**व्याख्या -** ततः=तदनन्तरम्, पश्चात्=अनु, अस्तङ्गते=अस्ताचलप्रस्थिते, सवितरि=दिवाकरे, भगवति= ऐश्वर्ययुक्ते, मरीचिमालिनि=मयूखसमूहयुक्ते, तौ= मृगजम्बूकौ, मृगस्य=हरिणस्य, वासभूमिम्=निवासस्थानम्, गतौ= गतवन्तौ, तत्र= तस्मिन् निवासस्थाने, चम्पकवृक्षशाखायां=चम्पकाख्यपादपस्यांशे, सुबुद्धिनामा= सुबुद्धिनाम्ना प्रसिद्धः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

काकः=वायसः, मृगस्य=हरिणस्य, चिरमित्रम्=दीर्घकालीनं सुहृत्, निवसति=निवासं करोति। तौ=मृगशृगालौ, दृष्ट्वा= अवलोक्य, काकः=वायसः, अवदत्=अब्रवीत्, सखे चित्राङ्ग!=मित्र चित्राङ्ग!, कोऽयं द्वितीयः=कोऽसावपरः, मृगः =हरिणः, ब्रूते=ब्रवीति, जम्बुकोऽयम्=असौ शृगालः, अस्मत्=अस्माकम्, सख्यम्=मैत्रीम्, इच्छन् आगतः= अभिलषन् समायातः। काकः=वायसः ब्रूते=प्राह, मित्र =सखे, अकस्मात्=सहसैव, आगन्तुना=प्राघुणिकेन, सह=साकम्, मैत्री= मित्रता, न युक्ता=नैव समीचीना वर्तते।

**व्याकरणम् -**

**समास :**-मरीचिमालिनि=मरीचीनां (किरणानां) माला अस्ति अस्य इति मरीचिमाली, तस्मिन्। सुबुद्धिनामा=सु शोभना बुद्धिर्यस्य सः सुबुद्धिः, सुबुद्धि नाम यस्य सः। अस्मत्सख्यम्=आवयोः सख्यम्।

**सन्धि-विच्छेदः**-पश्चादस्तङ्गते=पश्चात्+ अस्तङ्गते। काकोऽवदत्= काकः+अवदत्। कोऽयम्=कः+अयम्। जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः= जम्बूकः +अयम्+अस्मत् सख्यम्+इच्छन्+आगतः। तन्न=तत्+न। चोक्तम्=च+ उक्तम्।

**प्रकृति प्रत्ययः**-सवितरि=सू+तृच् (तृ)+ङि (इ)। गतौ=गम्+क्त(त)+ औ। दृष्ट्वा=दृश्+क्त्वा (त्वा)। इच्छन् इष्+श (अ)+शतृ (अत्)। आगतः=आ+ गम्+क्त (त)। आगन्तुना=आ+गम्+तुन् (तु)+टा (ना)। युक्ता= युज्+क्त (त)+टाप् (आ)

तथा चोक्तम् - **अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।**
**मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥56॥**

**प्रसङ्गः**- अपरिचितानां कृते कदापि निवासस्थानं नैव दातव्यम्।

**अन्वयः**-अज्ञातकुलशीलस्य कस्यचित् वासः न देयः। हि मार्जारस्य दोषेण जरद्गवः गृघ्रः हतः।

**व्याख्या**- अज्ञातकुलशीलस्य=अपरिचितवंशस्वभावस्य, कस्यचित्= कस्यापि अपरिचितस्य, वासः=निवासाश्रयः,न देयः=नैव दातव्यः। हि=यतः,मार्जारस्य=विडालस्य दोषेण=अपराधेन, जरद्गवः=एतदाख्यः, गृध्रः=खगविशेषः,हतः= विनाशितः (अन्यैः खगैः)।

**व्याकरणम् -**

**समासः**-अज्ञातकुलशीलस्य=कुलं च शीलं च कुलशीले, न ज्ञाते अज्ञाते, अज्ञाते कुलशीले यस्य सः, तस्य। जरद्गवः=जरन्तौ (जीर्णौ) गावौ (दृशौ) यस्य सः।

**सन्धि-विच्छेदः**-वासो देयो न=वासः+देयः+न। हतो गृध्रो जरद्गवः= हतः+गृध्रः+जरद्गवः।

**प्रकृति प्रत्ययः**-अज्ञाते=न+ज्ञा+क्त(त)+ङि(इ)। वासः=वस्+णिच् (इ) +घञ् (अ)। दोषेण=दुष्+घञ् (अ)। हतः=हन्+क्त (त)।

छन्दः-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तावाहतुः-कथमेतत्। काकः कथयति -**

**व्याख्या**- तौ=मृगशृगालौ, आहतुः=कथितवन्तौ, एतत्=इदम्, कथम्= केन प्रकरेण (सञ्जातम्) काकः=वायसः, कथयति=ब्रवीति।

**व्याकरणम् -**

**सन्धि-विच्छेदः**-तावाहतुः=तौ+आहतुः। कथमेतत्=कथम्+एतत्।

**प्रकृति प्रत्ययः**-तौ=तद्+औ। कथम्=किम्+थम् (थ) किमः कादेशश्च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासार्थ-प्रश्नाः

**बहुचयनात्मकप्रश्नाः -**

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. आपत्काले उपस्थिते वचनं ग्राह्यम्-
   (अ) बालकस्य (ब) मित्रस्य (स) वृद्धस्य (द) खलस्य ( )
2. शङ्काभिरन्नं पानं सर्वःा आक्रान्तम् -
   (अ) आकाशे (ब) भूतले (स) नगरे (द) ग्रामे ( )
3. लोभः कारणमस्ति-
   (अ) पापस्य (ब) जीवनस्य (स) धनस्य (द) ज्ञानस्य ( )
4. पुंसां धियोऽपि मलिना भवन्ति-
   (अ) सम्पत्तिकाले (ब) प्रातःकाले (स) सायंकाले (द) विपत्तिकाले ( )
5. लोके स पुण्यवान् अस्ति-
   (अ) यस्य मित्रेण विरोधः (ब) यस्य मित्रेण विवादः
   (स) यस्य मित्रेण संलापः (द) यस्य मित्रेण असम्भाषः ( )
6. धर्मार्थकाममोक्षाणां संस्थितिहेतवः सन्ति-
   (अ) प्राणाः (ब) ज्ञानानि (स) धनानि (द) शरीराणि ( )

**अतिलघूत्तरात्मकप्रश्नाः -**

1. सर्वथाऽविचारितं किं न कर्तव्यम् ?
2. वृद्धस्य वचनं कदा ग्राह्यम्?
3. लोभात् कः प्रजायते?
4. मुखरः कदा हन्यते?
5. वत्सस्य बन्धने मातृजङ्घा भवति?
6. विपदि धैर्यं केषां प्रकृतिसिद्धम्?
7. पुरुषेण कति दोषा हातव्याः?
8. गुणत्वमापन्नैः तृणैः के बध्यन्ते?
9. कदा तण्डुला न प्ररोहन्ति?
10. अन्ये कस्मात् हितबुद्धयो भवन्ति ?
11. कपोतानां पाशबन्धनं कस्य फलमासीत् ?
12. आत्मापराधवृक्षाणां कानि फलानि सन्ति ?
13. कैः सततम् आत्मानं रक्षेत्?
14. प्राज्ञः परार्थे किं परित्यजेत्?
15. कीदृशानि कति मित्राणि कर्त्तव्यानि?

**लघूत्तरात्मकप्रश्नाः -**

1. कीदृशः सुतः कस्मिन् काले विक्रियां न याति ?
2. के दुःखभागिनो भवन्ति?
3. तण्डुलकणलोभेन कपोताः कुत आगत्योपविष्टाः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

4. आपत्काले समागते किं करणीयम्?
5. लोभात् क्रमशः किं किं प्रजायते?
6. गणस्याग्रे कथं न गच्छेत्?
7. पुंसां धियः कदा मलिना भवन्ति?
8. बन्धोर्लक्षणं प्रतिपादयत?
9. कीदृशं विरलं सुतं जननी जनयति?
10. हिरण्यकाख्यो मूषिकराजः कुत्र निवसति?
11. मूषिकराजस्य तत्र कथं निवसति स्म?
12. हिरण्यकस्य समीपे कपोताः कथं गतवन्तः?
13. चित्रग्रीवस्य वचनं श्रुत्वा हिरण्यकः किमुवाच?
14. प्राणाः केषां संस्थितिहेतवः ?
15. शरीरगुणयोरन्तरं प्रतिपादयत।

**निबन्धात्मक प्रश्नाः -**

1. हिरण्यकचित्रग्रीवयोः कथासारः सङ्क्षिप्य लिखत।
2. मृगकाकशृगालानां मैत्री संवादः सङ्क्षेपेण वर्णयत।
3. भाग्यं बलवद् अस्तीति प्रतिपादयत।
4. महापुरुषाणां लक्षणं निरूपयत।

**उत्तरमाला (बहुचनात्मकप्रश्नानाम्)**

(1) स (2) ब (3) अ (4) द (5) स (6) अ

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | ह्युपस्थिते | = | हि+उपस्थिते | = | यण्सन्धिः |
| | षडेते | = | .............. | = | .......... |
| | एतच्छ्रुत्वा | = | .............. | = | .......... |
| | हितोप्यायाति | = | .............. | = | .......... |
| | उड्डीयताम् | = | .............. | = | .......... |
| | पाशांश्छेत्स्यति | = | .............. | = | .......... |
| | संस्थितिः | = | .............. | = | .......... |
| | ईदृश्येव | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | कर्तव्यम् | = | कृ+तव्यत्। |
| | उपविष्टाः | = | ................... |
| | सम्पदि | = | ................... |
| | इच्छता | = | ................... |
| | संस्थितिः | = | ................... |
| | पुण्यवान् | = | ................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्राज्ञः = ..................
मतिमताम् = ..................

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-
1. लोभात् कामः प्रजायते। (लोट्)
2. ते सर्वे कपोताः जालनिबद्धाःबभूवुः। (लङ्)
3. स व्याधः पश्चाद् धावितोऽचिन्तयत्।(लृट्)
4. हिरण्यकश्चित्रवने निवसति। (लिङ्)
5. मूषिकराजः स्वविवरं प्राविशत्। (लट्)

4. **(अ) असमस्तपदानां समासो विधेयः -**
ईर्ष्या विद्यते अस्य इति = ......................
परभाग्येन उपजीवतीति = ......................
प्रकर्षेण जायते इति = ......................
रमन्ते योगिनोऽस्मिन् सः = ......................
मत्ताश्च ते दन्तिनः = ......................
हिता बुद्धिः येषां ते = ......................

**(ब) समस्तपदानां विग्रहः कार्यः -**
आपत्काले = ......................
कापुरुषलक्षणम् = ......................
मत्तदन्तिनः = ......................
हितबुद्धयः = ......................
यथाशक्ति = ......................
आपदर्थे = ......................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-
शङ्काभिः = ......................
संशयानाम् = ......................
महात्मनाम् = ......................
विपदि = ......................
दरिद्रताम् = ......................
बलवान् = ......................

6. कोष्ठके स्थितं शब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-
1. अहमन्नं भवान् ........... कथं प्रीतिर्भविष्यति।(भोक्तृ)
2. विधिरहो ........... इति मे मतिः।(बलवत्)
3. ........... प्राणाः संस्थिति हेतवः। (धर्मार्थकाममोक्ष)
4. यावच्छक्यं ........... बन्धनं छेत्स्यामि। (एतद्)
5. इदं हि ........... प्रकृतिसिद्धम्। (महात्मन्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# मूषक-परिव्राजककथा

## षष्ठो भागः

**अस्ति चम्पकाऽभिधानायां नगर्यां परिव्राजकाऽऽवसथः। तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति। स च भोजनाऽवशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति, अहं च तदन्नम् उत्प्लुत्य उत्प्लुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः, तेन सह नानाकथाप्रसङ्गाऽवस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत्। तं तथाविधं दृष्ट्वा वीणाकर्ण उवाच-सखे किमिति मम कथाविरक्तोऽन्यासक्तो भवान्?**

**व्याख्या-**चम्पकाभिधानायां='चम्पका'इति नाम यस्याः सा तस्याम्, नगर्यां=पुर्याम्, परिव्राजकावसथः=सन्यासिनाम् आश्रमः (सर्वं परित्यज्य व्रजन्ति ये ते परिव्राजकाः) अस्ति=वर्तते, तत्र=तस्मिन् स्थाने, आश्रमे इत्यर्थः, चूडाकर्णो नाम= 'चूडाकर्ण' इति नाम्ना प्रसिद्धः, परिव्राजकः=सन्यासी, प्रतिवसति=निवसति, कथायां भूते वर्तमानस्य प्रयोगः, स च=असौ (चूडाकर्णः), भोजनावशिष्टभिक्षान्नसहितं= भोजनात् अदनात् अवशिष्टं च तत् भिक्षान्नम्, याचनात् प्राप्तमन्नं तेन सहितं युक्तम्, भिक्षापात्रं=याचनार्थं भाजनम्, नागदन्तके=दारुमयकीलके ('खूँटी'इति भाषायाम्), अवस्थाप्य=निधाय, स्वपिति=शेते, अहं च=एष हिरण्यकः, तदन्नम् =अवशिष्टान्नम्, उत्प्लुत्य उत्प्लुत्य=बारं-बारं कूर्दित्वा, प्रत्यहं=प्रतिदिनम्, भक्षयामि =खादामि, अनन्तरं=ततः, तस्य=चूडाकर्णस्य इत्यर्थः, प्रियसुहृद्=प्रियमित्रम्, वीणकर्णो नाम='वीणाकर्ण' इति नाम्ना प्रसिद्धः, परिव्राजकः=सन्यासी, समायातः= आगतः, तेन सह=चूडाकर्णेन साकम्, नानाकथाप्रसङ्गावस्थितः=बहुकथावतरणे समासक्तोऽपि, मम=मूषकस्य इत्यर्थः, त्रासार्थं=भयार्थम्, जर्जरवंशखण्डेन= जर्जरःजीर्णः वंशखण्डः-यष्टिकारूपः तेन('बाँस' इति भाषायाम्), चूडाकर्णः=प्रसिद्धः परिव्राजकः, भूमिम्= धराक्षेत्रम्, अताडयत्=ताडयति स्म, तम्=अमुम् चूडाकर्णम् इत्यर्थः, तथाविधं=ताडने एव मनः यस्य तथाभूतम्, दृष्ट्वा=विलोक्य, वीणाकर्णः= अभ्यागतः सन्यासी, उवाच =आह, सखे=हे मित्र चूडाकर्ण!, किमिति=किमर्थम्, मम =वीणाकर्णस्य इत्यर्थः, कथाविरक्तः=कथायां निरनुरागः, अन्यासक्तः= अन्यमनस्कः, भवान्=तत्र भवान्, पूजनीयः इत्यर्थः।

**व्याकरणम्-**

**समासः-**भोजनावशिष्टभिक्षान्नसहितं=भोजनात् अवशिष्टम् इति भोजनावशिष्टं च तत् भिक्षान्नम् इति भोजनावशिष्टभिक्षान्नं तेन सहितः तम् (तृतीया तत्पुरुषः)। नानाकथाप्रसङ्गावस्थितः=नाना च ताः कथाः इति तासां प्रसङ्गः इति नानाकथाप्रसङ्गः तस्मिन् अवस्थितः नानाकथाप्रसङ्गावस्थितः (सप्तमी तत्पुरुषः)।

**प्रकृति प्रत्ययः-**समायातः=सम्+आ+या+क्त+सु। परिव्राजकः=परि+ व्रज्+ण्वुल्+सु। अवस्थितः=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अव+स्था+क्त+सु। दृष्ट्वा=दृश्+क्त्वा।

**सन्धिः**-परिव्राजकावसथः=परिव्राजक+आवसथः(अ+आ=आ दीर्घः)। नागदन्तकेऽवस्थाप्य = नागदन्तके+ अवस्थाप्य (ए+अ= ए पूर्वरूपम्)। अभ्यासक्तः= अभिः+आसक्तः (इ+आ='या'यण्)।

**मुखं प्रसन्नं विमला च दृष्टिः कथानुरागो मधुरा च वाणी।**
**स्नेहोऽधिकः सम्भ्रमदर्शनः। सदानुरक्तस्य जनस्य लक्ष्म॥1॥**

**प्रसङ्गः**-अत्र सदानुरागयुक्तस्य पुरुषस्य लक्षणं निरूपयन् प्राह-

**अन्वयः**-मुखम् प्रसन्नम्, दृष्टिः च विमला, कथानुरागः, वाणी च मधुरा, स्नेहः अधिकः सम्भ्रमदर्शनं च सदा अनुरक्तस्य जनस्य लक्ष्म।

**व्याख्या**-मुखम्=आननम्, प्रसन्नम्=प्रसादयुक्तम्, दृष्टिः च=अवलोकनम् च, विमला=दोषरहिता, कथानुरागः=वार्तालापप्रीतिः, वाणी च=वाक् च, मधुरा= मनोरञ्जनी, स्नेहः=अनुरागः, अधिकः=प्रचुरः, सम्भ्रमदर्शनम् च= त्वरयावलोकनं च, सदा = सर्वदा, अनुरक्तस्य = अनुरागयुक्तस्य, जनस्य = पुरुषस्य, लक्ष्म = लक्षणम् (भवतीति शेषः)।

**सरलार्थः**-यस्य जनस्य मुखं सदैव प्रसन्नं भवति, दृष्टिः शुद्धा भवति, वार्तालापे प्रीतिः दृश्यते, वाण्यां च कटुता न भवति। स्नेहाधिक्यं यस्मिन् दरीदृश्यते। मित्रान् द्रष्टुं यः सर्वदा तत्परो भवति। स सदानुरक्तो जनो भवति।

**व्याकरणम्**- कथानुरागः=कथायाम् अनुरागः इति कथानुरागः(स. तत्पु.)। सम्भ्रमदर्शनम्=सम्भ्रमेण दर्शनम् इति (तृ.तत्पु.)। प्रसन्नम्=प्र+सद्+ क्त+सु (अम्)। दृष्टिः=दृश्+क्तिन्+सु। स्नेहः=स्निह्+घञ्+सु। दर्शनम्=दृश्+ल्युट्+ सु(अम्)। सदानुरक्तस्य = सदा + अनुरक्तस्य (आ+अ=आ दीर्घः)। स्नेहोऽधिकः=स्नेहो+अधिकः (ओ+अ=ओ पूर्वरूपम्)।

**अदृष्टिदानं कृतपूर्वनाशनममाननं दुश्चरितानुकीर्तनम्।**
**कथाप्रसङ्गेन च नामविस्मृतिर्विरक्तभावस्य जनस्य लक्षणम्॥2॥**

**प्रसङ्गः**-विरक्तजनस्य लक्षणमत्र वर्णितमस्ति-

**अन्वयः**-अदृष्टिदानम्, कृतपूर्वनाशनम्, अमाननम्, दुश्चरितानुकीर्तनम्, कथाप्रसङ्गेन च नामविस्मृतिः, विरक्तभावस्य जनस्य लक्षणम्(भवति)।

**व्याख्या**- अदृष्टिदानम् = अवीक्षणम्, कृतपूर्वनाशनम् = विहितपूर्वोपकारचिन्तनम्, अमाननम्= सत्काराभावः, दुश्चरितानुकीर्तनम्=दुराचारचर्चा, कथाप्रसङ्गेन च =वार्तालापावसरेण च, नामविस्मृतिः= नामधेयविस्मरणम्, विरक्तभावस्य=विरक्तभावोपेतस्य, जनस्य=पुरुषस्य, लक्षणम्=चिह्नम् (भवतीति शेषः)।

**व्याकरणम् -**

अदृष्टिदानम्=दृष्टेः दानम् इति दृष्टिदानम्, न दृष्टिदानम् इति अदृष्टिदानम् (नञ् तत्पुरुष)। कथाप्रसङ्गेन= कथायाः प्रसङ्गः कथाप्रसङ्गः तेन (षष्ठी तत्पुरुषः)। अमाननम्=न+मान्+ल्युट्+सु। विस्मृतिः=वि+स्मृ+क्तिन्+सु। दुश्चरितानुकीर्तनम्= दुश्चरित+अनुकीर्तनम्।

**सरलार्थः**- यो जनो लोकस्य कस्मिन्नपि पदार्थे दृष्टिं न ददाति, परोपकारं करोति परं श्रेयो नेच्छति, सत्कारभावस्यापि इच्छां न करोति, दुराचारचर्चायां प्रवृत्तो न भवति, वार्तालापसमये अभिधेयमपि विस्मरति, एतत्सर्वं विरक्तजनस्य लक्षणं वर्तते।

**चूडाकर्णेन उक्तम् -भद्र! नाहं विरक्तः, किन्तु पश्य अयं मूषको मम अपकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति। वीणाकर्णो नागदन्तमवलोक्य आह-क थमयं मूषकः स्वल्पबलोऽप्येतावद् दूरमुत्पतति? तदत्र? केनापि**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कारणेन भवितव्यम्।**

**व्याख्या-**चूडाकर्णेन=एतन्नामकेन सन्यासिना, उक्तम्=भणितम्, भद्र= सौम्य, अहं=चूडाकर्णः, न विरक्तः=अनुरक्तः, किन्तु=परम्, पश्य=अवलोकय, अयम् =एषः, मूषकः=आखुः, मम=मे, चूडाकर्णस्य इत्यर्थः, अपकारी=अपकारकः, सदा= सर्वदा, पात्रस्थं=पात्रेस्थितम्, भिक्षान्नम्=भिक्षया सञ्चितम् अन्नम्, उत्प्लुत्य= कूर्दित्वा, भक्षयति=खादति, वीणाकर्णः=एष सन्यासी, नागदन्तम्=भित्तिस्थं कीलकम्, अवलोक्य = दृष्ट्वा, आह = उवाच, अयम् = एषः, मूषकः = आखुः, स्वल्पबलोऽपि = नागदन्तं प्राप्त्यर्थमपरिपूर्णं बलं यस्य सः तादृशः सन् अपि, एतावत् दूरम्=अत्युच्चैः, कथम् उत्पतति=केन कारणेन कूर्दति, तत्=तस्मात्, अत्र=इह, उत्पतने इत्यर्थः, केनाऽपि कारणेन=केनाऽपि हेतुना, भवितव्यम्=स्थातव्यम्।

**व्याकरणम्-**

स्वल्पबलः=स्वल्पं बलं यस्य सः (बहु.)। पात्रस्थं=पात्रे स्थितमिति पात्रस्थम् (स.तत्पु)। विरक्तः=वि+ रञ्ज्+क्त। अवलोक्य= अव+ लोक्+ल्यप्। भवितव्यम्=भू+तव्यत्।

नाहं=न+अहम् (अ+अ=आ दीर्घः:)। ममाऽपकारी=मम+अपकारी (अ+ अ=आ दीर्घः) स्वल्पबलोऽप्येतावत्=स्वल्पबलः+अपि+एतावत् (गुण-पूर्वरूपं, इ+ ए=ये यण्)।

**क्षणं विचिन्त्य परिव्राजकेनोक्तम् -कारणञ्चात्र धनबाहुल्यमेव प्रतिभाति।**

**व्याख्या-** क्षणं=किञ्चित्कालम्,विचिन्त्य=विचार्य,परिव्राजकेन=सन्यासिना, उक्तम्=कथितम्, कारणं=हेतुः, अत्र=कूर्दने, धनबाहुल्यमेव वित्ताधिक्यमेव, प्रतिभाति =विज्ञायते।

**व्याकरण-**धनबाहुल्यम्=धनस्य बाहुल्यम् (ष.तत्पु.)। विचिन्त्य=वि+चिन्त् +ल्यप्। उक्तम्=वच्+क्त।

**धनवान् बलवांल्लोके सर्वः सर्वत्र सर्वदा।**
**प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते॥3॥**

**प्रसङ्गः-** धनस्य महत्त्वमत्र वर्णितमस्ति-

**अन्वयः-**सर्वः धनवान् लोके सर्वत्र सर्वदा बलवान् (भवति) हि राज्ञाम् अपि प्रभुत्वं धनमूलम् उपजायते।

**व्याख्या-** सर्वः=सकलः, धनवान्=अर्थवान्, लोके=संसारे, सर्वत्र= सर्वस्मिन् स्थाने, सर्वदा=सदैव, बलवान्=शक्तिसम्पन्नः, भवतीति शेषः, हि=यतः, राज्ञामपि=नृपाणामपि, प्रभुत्वम्=आधिपत्यम्। धनमूलं=वित्तहैतुकम्, उपजायते= उत्पद्यते।

**सरलार्थः-**लोके धनस्य महिमा सर्वोपरि वर्तते। धनवान् सर्वत्र अर्थात् स्वदेशे, विदेशे च, दुर्भिक्षे सुभिक्षे च सर्वशक्तिसम्पन्नो भवति। नृपाणां प्रभुत्वमपि धनेन एव चलति।

**व्याकरणम् -**

**समासविग्रहः-**धनमूलम्=धनम् एव मूलम् (कर्म.धा.)।

**प्रत्ययः-**धनवान्=धन+मतुप्(मत्)। बलवान्=बल+मतुप् (मत्)। प्रभुत्वं= प्रभु+त्व। सर्वदा=सर्व+दा।

**सन्धिः-** बलवांल्लोके=बलवान्+लोके (परसवर्णः)

**ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम्। ततः प्रभृति प्रत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दम् उपसर्पन् चूडाकर्णेन अवलोकितः। ततस्तेनोक्तम् -**

**व्याख्या -**ततः=तदनन्तरम्, खनित्रम्=खननयन्त्रम् (कुद्दालम् इत्यर्थः) आदाय=गृहीत्वा, तेन परिव्राजकेन सन्यासिना, विवरं=बिलम्, खनित्वा=विदार्य, चिरसञ्चितम्=दीर्घसमयेन संगृहीतम्, मम=मे, धनं=वित्तम्, गृहीतम्= अपहृतम्, ततः प्रभृति=तस्मात्कालादारभ्य, प्रत्यहं=प्रतिदिनम्, निजशक्तिहीनः=शरीरबलेन शून्यः, सत्त्वोत्साहरहितः=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मनस उत्साहेन शून्यः, स्वाहारमपि=उदरपूर्त्यर्थं स्वस्य भोजनमपि, उत्पादयितुम्=उपार्जयितुम्, अक्षमः=असमर्थः, सत्रासं=भयेन सहितम् मन्दं=शनैः शनैः, उपसर्पन्=गच्छन्, चूडाकर्णेन=एतन्नामकेन सन्यासिना, अवलोकितः=दृष्टः, ततः= अवलोकनानन्तरम्, तेन=चूडाकर्णेन। उक्तम्=कथितम्।

**व्याकरणम्-** समास-विग्रहः-निजशक्तिहीनः निजस्य शक्तिः तया हीनः(तृ. तत्पु.) स्वाहारं=स्वस्य आहारं स्वाहारं (ष.तत्पु.) अक्षमः=न क्षमः अक्षमः (नञ् तत्पु.)।

**प्रकृति प्रत्ययः-**आदाय = आ + दा + ल्यप्। खनित्वा=खन्+इट्+क्त्वा। उत्पादयितुम्=उत्+पद्+णिच्+तुमुन्। उपसर्पन्=उप+सृप्+शतृ।

**सन्धिः-** प्रत्यहम्-प्रति+अहम्(यण्)। सत्त्वोत्साहरहितः=सत्त्व+उत्साह-रहितः (गुणः)। ततस्तेनोक्तम्=ततः+तेन+उक्तम् (सत्वं गुणः)। तानि अविकलानि इन्द्रियाणि, तदेव नाम, सा अप्रतिहता बुद्धिः, तदेव वचनम्, स एव पुरुषः, अर्थोष्मणा विरहितः क्षणेन हि अन्यः भवतीति एतद्विचित्रम्।

**व्याख्या-**तानि=धनवद्दशायां, यानि=तान्येव, अविकलानि=काणत्वादिरहितानि, इन्द्रियाणि=चक्षुरादीनि, तदेव नाम=धनाढ्यावस्थायां यत् नाम तदेव नाम अस्ति, सा=धनवदवस्थायां तादृशी एव, अप्रतिहता =तीक्ष्णा, बुद्धिः=विवेकः, तदेव वचनम्=धनावस्थायां यद् वचनम् तदेव, स एव पुरुषः धनवदवस्थायां य स एव जनः, अर्थोष्मणा=द्रव्यस्य गर्वेण, विरहितः=शून्यः, क्षणेन=अल्पसमयेन, हि=निश्चयेन, अन्यः=विपरीतः, सतेजा अपि निस्तेजाः भवति =जायते, एतद्विचित्रम्=इदं विस्मयकरम्।

**व्याकरणम्-** अविकलानि = न विकलानि अविकलानि (नञ्. तत्पु.)। अर्थोष्मणा=अर्थस्य ऊष्मणा अर्थोष्मणा (ष.तत्पु.)।

**प्रकृति प्रत्ययः-** प्रतिहता = प्रति+हन्+क्त+टाप्। बुद्धिः=बुध्+क्तिन्। वचनम्=वच्+ल्युट्।

**सन्धिः-**तदेव=तत्+एव (जश्त्वम्)। अर्थोष्मणा=अर्थ+ऊष्मणा (गुणः)। भवतीति=भवति+इति (दीर्घः:)।

**धनेन बलवांल्लोको धनाद्भवति पण्डितः।**
**पश्यैनं मूषकं पापं स्वजातिसमतां गतम्॥4॥**

**प्रसङ्गः-**धनेनैव लोके सर्वाणि कार्याणि सिध्यन्ति। इत्याह-

**अन्वयः-**लोकः धनेन एव बलवान् भवति, धनात् एव पण्डितः (भवति) स्वजातिसमतां गतम्, पापम् एनं मूषकम् पश्य।

**व्याख्या-**लोकः=जनः, धनेन एव=वित्तेन एव, बलवान्=शक्तिसम्पन्नः, भवति=जायते, धनात् एव=वित्तादेव, पण्डितः=विद्वान् च भवति, स्वजातिसमतां =आत्मजातितुल्यताम्, जातं=प्राप्तम्, पापम्=पापाचारिणम्, एनम्=इमम्, मूषकम्= आखुम्, पश्य=विलोकय।

**सरलार्थः-**कोऽपि जनो यदि धनवान् भवति तर्हि स एव बलवान् भवति। यतो धनेन एव सर्वाणि कार्याणि सिध्यन्ति। यो धनी स एव पण्डितः, यतोहि शिक्षा प्राप्त्यर्थमपि धनस्य आवश्यकता भवति।

**व्याकरणम्-**

स्वजातिसमतां=स्वस्य जातिः स्वजातिः (ष.तत्पु.)। स्वजातेः समतां (ष.तत्पु.)।

**प्रकृति प्रत्ययः-** पण्डितः=पण्डा+इतच्। समतां=सम+तल्+टाप्+अम्। गतम्=गम्+क्त+अम्। बलवान्=बल+मतुप्।

**संधि-**पश्यैनम् पश्य+एनम् (वृद्धिः)। धनाद्भवति=धनात्+भवति (जश्त्वम्)। बलवांल्लोके=बलवान्+लोके



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(परसवर्णः)।

**अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः।**
**क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा॥5॥**

**प्रसङ्गः-**'धनाभावे सर्वाणि कार्याणि विनश्यन्ति।' इत्याह -

**अन्वयः-**अर्थेन तु विहीनस्य अल्पमेधसः पुरुषस्य यथा ग्रीष्मे कुसरितः तथा सर्वाः क्रियाः विनश्यन्ति।

**व्याख्या-**अर्थेन तु=वित्तेन तु, विहीनस्य=रहितस्य, अल्पमेधसः= तुच्छबुद्धेः, पुरुषस्य=नरस्य, यथा=येन प्रकारेण, ग्रीष्मे=निदाघे, कुसरितः=स्वल्पजलाः नद्यः, (तथा) सर्वाः=सकलाः, क्रियाः=कार्याणि, विनश्यन्ति=विनाशं गच्छन्ति।

**सरलार्थः-**अल्पज्ञजनस्य धनाभावे सर्वाणि कार्याणि विनश्यन्ति। यतोहि धनस्य आवश्यकता पदे-पदे भवति। यथा स्वल्पजलाः नद्यो ग्रीष्मर्तौ शुष्यन्ति।

**व्याकरणम्-**

**समासः-**अल्पमेधसः=अल्पा मेधा यस्य सः, तस्य अल्पमेधसः (बहु.)। कुसरितः=कुत्सिताः सरितः, कुसरितः (गतिसमासः)।

**प्रकृति प्रत्ययः-** विनश्यन्ति=वि+नश्+झि (लट्)

**सन्धिः-**पुरुषस्याल्पमेधसः=पुरुषस्य+अल्पमेधसः (दीर्घः)।

**यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।**
**यस्यार्थाः स पुमांल्लोके यस्यार्थाः स हि पण्डितः॥6॥**

**प्रसङ्गः-**धनमेव साम्प्रतिके काले मानवस्य सर्वस्वम् इत्याह-

**अन्वयः-**लोके यस्य अर्थाः तस्य मित्राणि, यस्य अर्थाः तस्य बान्धवाः, यस्य अर्थाः सः पुमान् यस्य अर्थाः स हि पण्डितः।

**व्याख्या-** लोके=संसारे, यस्य=जनस्य, अर्थाः=धनानि सन्ति, तस्य= जनस्य, मित्राणि=सुहृदः, यस्य=जनस्य, अर्थाः=धनानि, तस्य=जनस्य, बान्धवाः= बन्धवो 'भवन्ति', यस्य अर्थाः सः=असौ जनः, पुमान्=पुरुषः, यस्य अर्थाः= यस्य नरस्य धनानि, स=असौ नरः, हि=निश्चयेन, पण्डितः=विद्वान् भवति।

**सरलार्थः-**संसारे यस्य धनमस्ति तस्य अनेकानि मित्राणि भवन्ति, तस्य एव बान्धवाः भवन्ति। स एव पुरुषः, स एव विद्वान् भवति। यस्य धनं नास्ति तस्य कुटुम्बिनोऽपि तं परित्यजन्ति।

**व्याकरणम्-**पण्डितः=पण्डा+इतच् यस्यार्थाः=यस्य+अर्थाः (दीर्घः)। पुमांल्लोके=पुमान्+लोके (परसवर्णः)।

**अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च।**
**मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता॥7॥**

**प्रसङ्गः-**'दरिद्रस्य कृते सर्वं शून्यम्।' इत्याह-

**अन्वयः-**अपुत्रस्य सन्मित्ररहितस्य च गृहम् शून्यम्, मूर्खस्य दिशः शून्याः दरिद्रता सर्वशून्या।

**व्याख्या-**अपुत्रस्य=सन्ततिरहितस्य, सन्मित्ररहितस्य=सुसुहृत्शून्यस्य च= तथा, गृहम्=भवनम्, शून्यम्=रिक्तम्, मूर्खस्य=अविवेकिनः, दिशः=पूर्वादयः, शून्याः = रिक्ताः, दरिद्रता=निर्धनता, सर्वशून्या=दरिद्रस्य कृते सर्वं शून्यप्रायं प्रतीयते इति।

**सरलार्थः-**यस्य सन्ततिर्न भवति, तस्य गृहं रिक्तं प्रतीयते। तथैव सन्मित्राभावेऽपि गृहं शून्यं भवति। मूर्खः कस्यापि जनस्य वार्तां न शृणोति अतः तस्य कृते सर्वाः दिशः शून्याः भवन्ति। परं दरिद्रतायां सत्यां सर्वं शून्यं प्रतीयते।

**व्याकरणम् -**

**समासः-**अपुत्रस्य=न विद्यमानः पुत्रः यस्य स अपुत्रः तस्य (उत्तरपदलोपि बहु.)। सर्वशून्या=सर्वा चाऽसौ



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शून्या सर्वशून्या(कर्म.)।

**प्रकृति प्रत्ययः-** गृहम्=गृह्+क। दरिद्रता=दरिद्र+तल्+टाप्।

**सन्धिः-** सन्मित्ररहितस्य=सत्+मित्ररहितस्य (अनुनासिकः)।

**दारिद्र्यान्मरणाद्वाऽपि दारिद्र्यमवरं स्मृतम्।**
**अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम्॥8॥**

**प्रसङ्गः-**दारिद्र्यं मरणादपि निकृष्टमस्ति। इत्याह-

**अन्वयः-**दारिद्र्यात् अपि वा मरणात् दारिद्र्यम् अवरं स्मृतम्। यतो मरणम् अल्पक्लेशेन, दारिद्र्यम् अतिदुःसहम्। (भवति)।

**व्याख्या -**दारिद्र्यात्=निर्धनत्वात्, अपि वा=अथवा, मरणात्=निधनात्, दारिद्र्यम्=निर्धनत्वम्, अवरम्=निकृष्टम्, स्मृतं=कथितम्, यतः=यतोहि, मरणम्= निधनम्, अल्पक्लेशेन=स्तोकदुःखेन, दारिद्र्यम्=निर्धनत्वम्, अतिदुस्सहम्=काठिन्येन सोढुं शक्यं भवति।

**सरलार्थः-**दारिद्र्यं मृत्योरपि गुरुतरं दुःखमस्ति। यतोहि मरणे तु अल्पदुःखं भवति तदपि कुटुम्बिभ्य एव भवति न च आत्मने। परं दारिद्र्यमेतादृशं दुःखमस्ति येन जीवनपर्यन्तं दुःखानुभूतिर्भवति।

**व्याकरणम्-**अल्पक्लेशेन=अल्पश्चाऽसौ क्लेशः तेन अल्पक्लेशेन (कर्मधा.)।

**प्रकृति प्रत्ययः-** मरणं=मृ+ल्युट्। दारिद्र्यम्=दरिद्र+ष्यञ्। स्मृतम् =स्मृ+ क्त। क्लेशः=क्लिश्+घञ्।

**सन्धिः-**दारिद्र्यान्मरणाद्वाऽपि=दारिद्र्यात्+मरणात्+वा+अपि (अनुनासिकः, जश्त्वं, दीर्घः)।

एतत्सर्वमाकर्ण्य मयाऽऽलोचितं- ममाऽत्रावस्थानमयुक्तमिदानीम्।

**व्याख्या -**एतत्=इदम्, सर्वम्=अखिलम् आकर्ण्य=श्रुत्वा,च। मया= चूडाकर्णेन, आलोचितं=सम्यक् विचारितम्, मम=वीणाकर्णस्य, अत्र=इह, (चूडाकर्णस्य गृहे), अवस्थानं=निवासः, इदानीम्=अस्मिन् काले, अयुक्तम्= अनुचितमस्ति।

**व्याकरणम् -**

**समासः-**अयुक्तम्=न युक्तम् (नञ, तत्पु.) ।

**प्रकृति प्रत्ययः-**अवस्थानम्=अव+स्था+ल्युट्। आलोचितम्=आ+लोच् +इट्+क्त।

**सन्धिः-**मयाऽऽलोचितम्=मया+आलोचितम् (दीर्घः)। ममात्रावस्थानम्=मम+ अत्र+अवस्थानम् (दीर्घः)।

**अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे।**
**मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम्॥9॥**

**प्रसङ्गः-**भाग्ये, यत्ने पौरुषे च विपरीते सति मनस्वी वनं गच्छेत्। इत्याह-

**अन्वयः-**दैवे अत्यन्तविमुखे यत्ने पौरुषे च व्यर्थे (सति) मनस्विनः दरिद्रस्य वनात् अन्यत् सुखं कुतः।

**व्याख्या-**दैवे=भाग्ये, अत्यन्तविमुखे=अतिपराङ्मुखे, विपरीते वा, यत्ने= उद्योगे, पौरुषे च=पुरुषार्थे च, व्यर्थे=विफले सति, मनस्विनः=स्वाभिमानिनः, दरिद्रस्य= निर्धनस्य, वनात्=अरण्यात्, अन्यत्=अतिरिक्तम्, सुखम्=आनन्दः कुतः= क्व।

**सरलार्थः-**भाग्ये विपरीते सति उद्यमे पुरुषार्थे च व्यर्थे सति मनस्वी दरिद्रो वनं गच्छेत्, यतोहि तत्रैव तेन सुखं प्राप्तुं शक्यते नान्यत्र।

**व्याकरणम् -**अत्यन्तविमुखे=अत्यन्तं च तत् विमुखं तस्मिन् अत्यन्तविमुखे (कर्म.)।

**प्रकृति प्रत्ययः-** यत्ने=यत्+नङ्+ङि। कुतः=किम्+तसिल्।

**सन्धिः-**वनादन्यत्=वनात्+अन्यत्(जश्त्वम्)

**मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अपि निर्वाणमायाति नाऽनलो याति शीतताम्॥10॥**

**प्रसङ्गः**-मनस्वी स्वाभिमानस्य रक्षायै स्वप्राणानपि त्यजतीत्याह-

**अन्वयः**-मनस्वी कामं म्रियते कार्पण्यं न तु गच्छति, अनलः निर्वाणम् अपि आयाति शीततां न याति।

**व्याख्या** -मनस्वी=स्वभिमानी, कामं=यथेष्टम्, म्रियते=प्राणान् त्यजति, कार्पण्यं=दैन्यम्, न तु गच्छति=न हि प्राप्नोति, अनलः=अग्निः, निर्वाणम्=विनाशम्, आयाति=प्राप्नोति, शीतताम्=अनुष्णताम्, न याति=न गच्छति।

**सरलार्थः**-मनस्वी कदापि स्वाभिमानं न त्यजति कामं स मृत्युं प्राप्नोति यथा अग्निः शैत्यं न प्राप्नोति अपितु निर्वाणमायाति।

**व्याकरणम्** -कार्पण्यं=कृपण+ष्यञ्। शीतताम्=शीत+तल्+टाप्+अम्।

**सन्धिः**-नाऽनलः=न+अनलः (दीर्घः)।

**कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः।**
**सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वनेऽथवा॥11॥**

**प्रसङ्गः**-मनस्विनः पुरुषस्य कीदृशी गतिर्भवति इत्याह-

**अन्वयः**-मनस्विनः तु कुसुमस्तबकस्य इव द्वे वृत्ती भवतः। सर्वेषां मूर्ध्नि वा तिष्ठेत् अथवा वने विशीर्येत।

**व्याख्या** -मनस्विनः तु-स्वाभिमानिनः तु कुसुमस्तबकस्य =पुष्पगुच्छस्य, इव=यथा, द्वे वृत्ती=द्विविधे गती, भवतः इति शेषः, सर्वेषां=समस्तानाम्, मूर्ध्नि= शिरसि, वा=अथवा, तिष्ठेत्=वर्तेत, अथवा=वा, वने=अरण्ये, विशीर्येत= विनश्येत्।

**सरलार्थः**-यथा पुष्पगुच्छः सर्वेषां मस्तके शोभते अथवा वने एव विनाशं प्राप्नोति। तथैव मनस्वी जनोऽपि लोके ख्यातिं प्राप्नोति अथवा स्वामिमानविनाशे सति वने एव निवसति।

**व्याकरणम्** -कुसुमस्तबकस्य=कुसुमानां स्तबकः (ष.त.) तस्य।

**प्रकृति प्रत्ययः**- वृत्तिः=वृत्+क्तिन्।

**सन्धिः**-कुसुमस्तबकस्येव=कुसुमस्तबकस्य+इव (गुणः)। वनेऽथवा=वने+ अथवा (पूर्वरूपम्)।

**यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम्।**

**व्याख्या**- यत् च=अन्यदपि, अन्यस्मै=अपरस्मै, एतद्=इदम्, वृत्तान्तकथनम्=वार्ताविषयकं वचनम्, तदपि= न कदाचित्, अनुचितं=सम्यक् नास्ति।

**व्याकरणम्** -

**समासः**-वृत्तान्तकथनम्=वृत्तान्तस्य कथनं वृत्तान्तकथनम् (ष.त.)। अनुचितम्=न उचितम् इति अनुचितम् (नञ्.तत्पु.)।

**प्रकृति प्रत्ययः**- कथनम्=कथ्+ल्युट्।

**सन्धिः**- यच्चान्यस्मै=यत्+च+अन्यस्मै (श्चुत्वं, दीर्घः)। तदप्यनुचितम्= तदपि+अनुचितम्(यण्)।

**अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।**
**वःानःापमानःा मतिमान्न प्रकाशयेत्॥12॥**

**प्रसङ्गः**-'बुद्धिमान् किं न प्रकाशयेत्' इत्याह -

**अन्वयः**-मतिमान् अर्थनाशं, मनस्तापम्, गृहे दुश्चरितानि च वःानम् च अपमानम् च न प्रकाशयेत्।

**व्याख्याः**-मतिमान्=बुद्धिमान्, अर्थनाशं=वित्तक्षयम्, मनस्तापम्=अन्तः करणदुःखम्, गृहे=गेहे, दुश्चरितानि च=दुराचरणानि च, वःानम्=परकृतं स्वप्रतारणम्, अपमानं च=परकृतां स्वावज्ञाम्, न=नहि, प्रकाशयेत्=परस्मै न कथयेत्।

**सरलार्थः**-लोके स एव बुद्धिमान् भवति यः स्वस्य वित्तक्षयं परस्मै न कथयति, अपितु पुरुषार्थेन धनमर्जयितुं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रयतते। तथैव मनसि यत् दुःखं तमपि, स्वगृहे किमपि अनुचितमाचरणं जातं तमपि, परेण वञ्चितमपि, परकृतमपमानमपि परस्मै न कथयेत्।

**व्याकरणम् -**

**समासः-**अर्थनाशं=अर्थस्य नाशः तम्, (ष.तत्पु.)। मनस्तापं=मनसः तापः, तम् (ष.तत्पु.)।

**प्रकृति प्रत्ययः-** वञ्चनम्=वञ्च्+ल्युट्। मतिमान्=मति+मतुप्।

**सन्धिः-** वञ्चनञ्चापमानञ्च=वञ्चनम्+च+अपमानम्+च (अनुस्वारपरसवर्णः दीर्घः)।

**यच्चाऽत्रैव याच्ञया जीवनं तदप्यतीवगर्हितम्।**

**व्याख्या-**यच्च=अपरञ्च, अत्रैव=अस्मिन्नेव स्थाने, याच्ञया=अभ्यर्थनया, जीवनम्=आजीविकालाभः। तदपि=तत्कर्म अपि, अतीव गर्हितम्=अतिनिन्दितम्।

**व्याकरणम् -**जीवनम्=जीव+ल्युट्। गर्हितम्=गर्ह्+क्त।

**सन्धिः-** यच्चात्रैव=यत्+च+अत्र+एव (श्चुत्वं, दीर्घः, वृद्धिः) तदप्यतीव= तत्+अपि+अतीव (जश्त्वं, यण्।)

**वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः।**
**नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः॥13॥**

**प्रसङ्गः-**अर्थनाशे सति कृपणं जनं कदापि न प्रार्थयेत्। इत्याह -

**अन्वयः-**विभवहीनेन प्राणैः अनलः सन्तर्पितः इति वरम्, परम् उपचारपरिभ्रष्टः कृपणः जनः न प्रार्थ्यते।

**व्याख्या-** विभवहीनेन = धनरहितेन जनेन, प्राणैः = असुभिः, अनलः = अग्निः, सन्तर्पितः=तृप्तिं नीतः, इति वरं=श्रेष्ठम् (परन्तु) उपचारपरिभ्रष्टः=सत्काररहितः, कृपणः=कदर्यः, जनः=मनुष्यः, न प्रार्थ्यते=न याच्यते।

**सरलार्थः-**यदि मनस्विनो वित्तं विनश्यति, तर्हि स कस्यापि कृपणजनस्य गृहं याचनार्थं न गच्छेत्।

**व्याकरणम् -**उपचारपरिभ्रष्टः=उपचारात् परिभ्रष्टः इति उपचारपरिभ्रष्टः (पं.तत्पु.)। विभवहीनेन=विभवेन हीनः, तेन (तृतीया तत्पु.)।

**प्रकृति प्रत्ययः-** सन्तर्पितः=सम्+तृप+णिच्+क्त। उपचारः=उप+चर्+घञ्।

**सन्धिः-**नोपचारपरिभ्रष्टः=न+उपचारपरिभ्रष्टः (गुणः)। सन्तर्पितोऽनलः= सन्तर्पितः+अनलः (उत्वं गुणः पूर्वरूपम्)।

**दारिद्र्याद् ह्रियमेति ह्रीपरिगतः सत्त्वात् परिभ्रश्यते,**
**निस्सत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते।**
**निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते,**
**निर्बुद्धिः क्षयमेत्यहो! निधनता सर्वापदामास्पदम्॥14॥**

**प्रसङ्गः-**'दरिद्रता एव सर्वापदाम् आस्पदं भवति' इत्याह -

**अन्वयः-**दारिद्र्यात् ह्रियम् एति, ह्रीपरिगतः सत्त्वात् परिभ्रश्यते, निस्सत्त्वः परिभूयते, परिभवात् निर्वेदम् आपद्यते, निर्विण्णः शुचम् एति, शोकपिहितः बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयम् एति, अहो निधनता सर्वापदाम् आस्पदम् भवतीति शेषः।

**व्याख्या-** दारिद्र्यात्=निर्धनत्वात्, ह्रियम्=लज्जाम्, एति=याति, ह्रीपरिगतः =लज्जायुक्तः, सत्त्वात्=पराक्रमात्, परिभ्रश्यते=परिभ्रष्टो भवति, निस्सत्त्वः=निर्बलः, परिभूयते=तिरस्क्रियते, परिभवात्=तिरस्कारात्, निर्वेदम्=वैराग्यम्, आपद्यते= आप्नोति, निर्विण्णः=वैराग्ययुक्तः, शुचम्=दुःखम्, एति=प्राप्नोति, शोकपिहितः= दुःखावृत्तः, बुद्ध्या=धिया, परित्यज्यते=परिहीयते, निर्बुद्धिः=मतिशून्यः, क्षयं=नाशम्, एति=प्राप्नोति, अहो=आश्चर्यम्, निधनता=दरिद्रता, सर्वापदाम्=सकलापत्तीनाम्, आस्पदम्=स्थानम् (भवतीति शेषः)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सरलार्थः-**दरिद्रता एव सर्वदुःखानां मूलमस्ति। तस्मादेव मानवो लज्जां प्राप्नोति, लज्जायुक्तो जनः पराक्रमात् परिभ्रष्टो भवति। निर्बलः तिरस्क्रियते, तिरस्काराद् वैराग्यं प्राप्नोति। एवं निर्धनता सर्वापत्तीनां स्थानमस्ति।

**व्याकरणम् -**

**समासः-**ह्रीपरिगतः=ह्रियं परिगतः (द्वि.तत्पु.)। निर्बुद्धिः=निर्गता बुद्धिर्यस्य सः निर्बुद्धिः (बहु.)। शोकपिहितः=शोकेन पिहितः (तृतीया तत्पु.)।

**प्रकृति प्रत्ययः-** परिगतः=परि+गम्+क्त। बुद्धिः=बुध्+क्तिन्।

**सन्धिः-**परिभवान्निर्वेदम्=परिभवात्+निर्वेदम् (अनुस्वारपरसवर्णः)। एत्यहो =एति+अहो (यण्)।

**वरं मौनं कार्यं न च वचनमुक्तं यदनृतं,**
**वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम्।**
**वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि**
**र्वरं भिक्षाशित्वं न च परधनाऽऽस्वादनसुखम्॥15॥**

**प्रसङ्गः-**'शिष्टाचाराणां महत्त्वमत्र वर्णितम्'।

**अन्वयः-**मौनम् कार्यम् वरम् यत् अनृतम् वचनम् उक्तम्, न च वरम्। पुंसां क्लैब्यं वरम्, यत् परकलत्राभिगमनम् तत् न वरम्। प्राणत्यागः वरं या पिशुनवाक्येषु अभिरुचिः सा न वरा। भिक्षाशित्वं यत् परधनास्वादनसुखं तत् न वरम्।

**व्याख्या-**मौनम्=तूष्णीभवनम्, कार्यम्=कर्तव्यम्, इति वरम्=किंचित्-प्रियम्, यत् अनृतम्=असत्यम्, वचनम्=कथनम्, उक्तम्=अभिहितम्, तत् न वरं= किंचिदपि न प्रियम्, पुंसां=जनानाम्, क्लैब्यं=नपुंसकत्वम्, वरम्=किंचित् प्रियम्, यत् परकलत्राभिगमनम्=परस्त्रीसंभोगः, तत् न वरम्, प्राणत्यागः=मरणम्, वरः=ईषत्प्रियः, परं पिशुनवाक्येषु=खलोक्तिषु, या अभिरुचिः=प्रीतिः, सा न वरा=न ईषदपि प्रिया, भिक्षाशित्वं=भिक्षया प्राप्तान्नभोजनम्, वरम्=ईषत्प्रियम्, यत् परधनास्वादनसुखम्= अन्यवित्तोपभोगानन्दः, तत् न वरम्=नेषदपि प्रियम्।

**सरलार्थः-**असत्यवदनात् मौनं श्रेष्ठम्, अन्यस्त्रीसंभोगात् नपुंसकत्वं वरम्। दुष्टैः सह वार्तालापापेक्षया मरणं वरम्। परधनलालसापेक्षया भिक्षया जीवनयापनं वरं भवति।

**व्याकरणम् -**

**समासः-**प्राणत्यागः=प्राणानां त्यागः (ष.तत्पु.)। पिशुनवाक्येषु=पिशुनानां वाक्येषु (ष.तत्पु.)। परकलत्राभिगमनम्=परस्य कलत्रं परकलत्रम्, तेन सह अभिगमनम् (ष.तत्पु., तृ.तत्पु.)।

**प्रकृति प्रत्ययः-** क्लैब्यं=क्लीब+ष्यञ्। कार्यम्=कृ+ण्यत्। अभिगमनम् =अभि+गम्+ल्युट्। त्यागः= त्यज्+घञ्।

**सन्धिः-** पिशुनवाक्येष्वभिरुचिः=पिशुनवाक्येषु+अभिरुचिः(यण्)परधनास्वादनसुखम्=परधन+ आस्वादनसुखम् (दीर्घः)।

**वरं शून्या शाला न च खलु वरो दुष्टवृषभो,**
**वरं वेश्या पत्नी न पुनरविनीता कुलवधूः।**
**वरं वासोऽरण्ये न पुनरविवेकाऽधिपपुरे,**
**वरं प्राणत्यागो न पुनरधमानामुपगमः॥16॥**

**प्रसङ्गः-**'लोकव्यवहारे किं ध्यातव्यम्' इत्याह -

**अन्वयः-**शून्या शाला वरम्, दुष्टवृषभः न वरः खलु। वेश्या पत्नी वरम्, पुनः अविनीता कुलवधूः न , अरण्ये वासः वरम्, पुनः अविवेकाधिपपुरे न। प्राणत्यागः वरम्, पुनः अधमानाम् उपगमः न।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्याः**-शून्या=रिक्ता, शाला=गोशाला, वरम्=किञ्चित्प्रियम्, दुष्टवृषभः =दोषयुक्तबलीवर्दः, न वरः=श्रेष्ठो न भवति, वेश्या=व्यभिचारिणी, पत्नी=भार्या, वरम् =मनाक्प्रियम्, पुनः=भूयः, अविनीता=क्रूरा, कुलवधुः=कुलीना स्त्री, न वरा=न श्रेष्ठा। अरण्ये=वने, वासः=निवासः, वरम्=किञ्चित्प्रियम्, पुनः=भूयः, अविवेका-धिपपुरे= विवेकशून्यस्वामिनगरे, वासः=निवासः, न=न श्रेष्ठः, प्राणत्यागः=मरणम्, वरम्=मनाक् प्रियम्, पुनः=भूयः, अधमानां= नीचानाम्, उपगमः=समीपगमनम्, न वरम्=किञ्चिदपि न प्रियम्।

**सरलार्थः**-गोशाला रिक्ता एव श्रेष्ठा, यदि तत्र दुष्टवृषयो निवसति तन्न युक्ता। वेश्या पत्नी अविनीता कुलवधूश्चानयोः वेश्या पत्नी वरा। विवेकशून्यनृपस्य राज्ये निवासात् अरण्ये वासः श्रेष्ठः। तथैव मरणं श्रेष्ठं परं नीचानां समीपगमनं किञ्चिदपि वरं नास्ति।

**व्याकरणम् -**

**समासः**-दुष्टवृषभः=दुष्टश्चाऽसौ वृषभः(कर्म.)। अविनीता=न विनीता (नञ् तत्पु.)। अविवेकाधिपपुरे=न विवेकः अविवेकः (नञ् तत्पु.)। अविवेकश्चाऽसौ अधिपः अविवेकाधिपः (कर्म.) तस्य पुरे (ष.तत्पु.)।

**प्रकृति प्रत्ययः**-दुष्टः=दुष्+क्त। विनीता=वि+नी+क्त+टाप्। वासः= वस्+घञ्।

**सन्धिः**- वासोऽरण्ये=वासः+अरण्ये (उत्वं-गुणः-पूर्वरूपम्)। पुनरविनीता= पुनः+अविनीता (रुत्वम्)।

**सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम्।**
**हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति॥17॥**

**प्रसङ्गः**-याचनया गुणाः विनश्यन्ति दुर्गुणाश्च प्रादुर्भवन्ति इति दृष्टान्तैः आह-

**अन्वयः**-सेवा अखिलं मानम् इव, ज्योत्स्ना तम इव, जरा लावण्यम् इव, हरिहरकथा दुरितम् इव, अर्थिता गुणशतमपि हरति।

**व्याख्या** -सेवा=शुश्रूषा, अखिलं=सकलम्, मानम्=प्रतिष्ठाम्, इव=यथा, ज्योत्स्ना=चन्द्रिका, तमः= अन्धकारम्, इव=यथा, जरा=वृद्धत्वम्, लावण्यम्= सौन्दर्यम्, इव=यथा, हरिहरकथा=विष्णुशिवकथा, दुरितं=पापम्, इव=यथा, अर्थिता= याचकता, गुणशतं=शतसंख्यगुणान्, अपि, हरति-नाशयति।

**सरलार्थः**-मानवजीवने याचनावृत्ति र्हेया, यतोहि तया गुणा विनष्टा भवन्ति। यथा सेवा प्रतिष्ठां हरति, चन्द्रिका तमः हरति, वार्धक्यं लावण्यं विनाशयति, हरिहरकथा पापं हरति।

**समासः**-हरिहरकथा=हरिश्च हरश्च इति हरिहरौ तयोः कथा (द्वन्द्वः, ष.तत्पु.)। गुणशतम्=गुणानां शतं (ष.तत्पु.)।

**प्रकृति प्रत्ययः**- मानम्=मा+ल्युट्। लावण्यम्=लवण+ष्यञ्।

**सन्धिः**-सेवेव=सेवा+इव(गुणः)। ज्योत्स्नेव=ज्योत्स्ना +इव(गुणः)।अप्यर्थिता =अपि+अर्थिता (यण्)।

**तत् किमहं परपिण्डेन आत्मानं पोषयामि? कष्टं भोः। तदपि द्वितीयं मृत्युद्वारम्।**

**व्याख्या**-तत्=तर्हि, किमिति प्रश्ने, अहं=मूषकः, परपिण्डेन=परान्नेन, आत्मानं =स्वकम्, पोषयामि=पालयामि, कष्टं भोः=महद्दुःखं तत्रापि, तदपि= परान्नमपि, द्वितीयम्=अपरम्, मृत्युद्वारम्=मरणद्वारमस्ति।

**रोगी चिरप्रवासी परान्नभोजी परावसथशायी।**
**यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः॥18॥**

**प्रसङ्गः**-लोके यानि कार्याणि मृत्युतुल्यानि तान्याह -

**अन्वयः**-रोगी, चिरप्रवासी, परान्नभोजी, परावसथशायी यत् जीवति तत् मरणम् यत् मरणम् सः अस्य विश्रामः।

**व्याख्या**-रोगी=रुग्णः,चिरप्रवासी=बहुकालं परदेशवासी,परान्नभोगी = अन्यान्नभोक्ता, परावसथशायी= परगृहशयनशीलः, यत् जीवति=प्राणान् धारयति, तत्= जीवनम्, मरणम्=मृत्युः, यत् मरणम्=यन् निधनम्, सः=मृत्युः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अस्य= पूर्वोक्तजनस्य, विश्रामः=विश्रान्तिः।

**सरलार्थः-**यः सदैव रोगी स मृत्युतुल्यं जीवनं जीवति, बहुकालं यावत् परदेशवासी जनः कुटुम्बं प्रति स्वकर्तव्यं न पालयति, अतः तस्य जीवनमपि मृत्युतुल्यं, यः परगृहे भोजनं करोति तदपि मृत्युसमं, यः परगृहे स्वपिति स तत्र अपमानं सहते अतः तदपि मृत्युसाम्यं दुःखमस्ति।

**व्याकरणम् -**परान्नभोजी=परस्य अन्नं परान्नं तस्य भोजी परान्नभोजी (ष.तत्पु.)। परावसथशायी=परस्य आवसथः परावसथ तत्र शेते परावसथशायी।

**प्रकृति प्रत्ययः-**रोगी=रोग+इनि। मरणं=मृ+ल्युट्। विश्रामः=वि+श्रम्+ घञ्।

**सन्धिः-**परान्नभोजी=पर+अन्नभोजी(दीर्घः)। यन्मरणं=यत्+मरणम् (अनुासिकः)।

**इत्यालोच्याऽपि लोभात् पुनरपि तदीयमन्नं गृहीतुं गृहमकरवम्।**

**व्याख्या-** इति=एवम्, आलोच्य=सम्यक् विचार्य, अपि, लोभात्= लोभवशात्, पुनरपि=भूयोऽपि, तदीयम्=वीणाकर्णस्य। अन्नं=भोजनम्। गृहीतुं= लब्धुम्। गृहम्=यत्नम्। अकरवम्=कृतवान्।

**लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।**
**तृषार्तो दुःखमाप्नोति परत्रेह च मानवः॥19॥**

**प्रसङ्गः-**लोभजन्यानि दुःखानि कानि? इत्याह -

**अन्वयः-**बुद्धिः लोभेन चलति, लोभः तृषाम् जनयते। तृषार्तः मानवः इह परत्र च दुःखम् आप्नोति।

**व्याख्या -**बुद्धिः-मतिः, लोभेन=लोलुपतया, चलति=विचलिता भवति, लोभः=लिप्सा, तृषाम्=तृष्णाम्, जनयते=उत्पादयति, तृषार्तः=तृष्णापीडितः, मानवः= मनुष्यः, इह=अस्मिन् लोके, परत्र च=परलोके, दुःखम्=कष्टम्, आप्नोति=प्राप्नोति।

**सरलार्थः-**लोभेन बुद्धौ चःालता आगच्छति, लोभेनैव तृष्णा वर्धते, तृष्णापीडितो जनः सर्वत्र सर्वदा दुःखं प्राप्नोति।

**व्याकरणम् -**तृषार्तः=तृषया आर्तः(तृ.तत्पु.)।

**प्रकृति प्रत्ययः-** बुद्धिः=बुध्+क्तिन्। लोभः=लुभ्+घञ्।

**सन्धिः-** परत्रेह=परत्र+इह(गुणः)। बुद्धिश्चलति=बुद्धिः+चलति (सत्वं श्चुत्वम्)।

**तदाऽहं मन्दं मन्दमुपसर्पंस्तेन वीर्णाकर्णेन जर्जरवंशखण्डेन ताडितश्चाचिन्तयम्- 'लुब्धो ह्यसन्तुष्टो नियतम् आत्मद्रोही भवति।'**

**व्याख्या -**तदा=तदनन्तरम्, अहं=मूषकः, मन्दं मन्दं=शनैःशनैः, उपसर्पन्= गच्छन्, तेन वीणाकर्णेन=सन्यासिना, जर्जरवंशखण्डेन=जीर्णवंशांशेन, ताडितः= आहतः, अचिन्तयम्=विचारं कृतवान्, लुब्धः=लोलुपः, असन्तुष्टः= सन्तोषशून्यश्च, नियतं= निस्सन्देहम्, आत्मद्रोही=स्वानिष्टकारी, भवति=जायते।

**व्याकरणम्-**

जर्जरवंशखण्डेन=वंशस्य खण्डः वंशखण्डः (ष.त.) जर्जरश्चासौ वंशखण्डः जर्जरवंशखण्डः, तेन (कर्मधा.)। आत्मद्रोही=आत्मनः द्रोही (ष.तत्पु.)।

**प्रकृति प्रत्ययः-** उपसर्पन्=उप+सृप्+शतृ। ताडित=ताड्+क्त। सन्तुष्टः= सम्+तुष्+क्त।

**सन्धिः-**ह्यसन्तुष्टः=हि+ असन्तुष्टः (यण्) तदाऽहम्=तदा+अहम् (दीर्घः)।

**धनलुब्धो ह्यसन्तुष्टोऽनियतात्माऽजितेन्द्रियः।**
**सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम्॥20॥**

**प्रसङ्गः-**यस्य मानसं न तुष्टं तादृशो जनः सर्वदा दुःखीभवति। इत्याह -

**अन्वयः-**यस्य मानसं न तुष्टं 'तादृशः' धनलुब्धः, असन्तुष्टः, अनियतात्मा, अजितेन्द्रियः तस्य सर्वाः एव



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आपदः भवन्ति।

**व्याख्या** -यस्य=जनस्य, मानसं=मनः, न तुष्टं=सन्तोषशून्यम्, तादृशः, धनलुब्धः=अर्थलोलुपः, सन्तुष्टः= सतृष्णः, अनियतात्मा=अवशीकृतचित्तः, अजितेन्द्रियः =अवशीकृतेन्द्रियः, तस्य=पूर्वोक्तजनस्य, सर्वाःसकलाः, एव, आपदः= विपत्तयः, भवन्तीति शेषः।

**सरलार्थः**-यस्य मनः तुष्टं न भवति स सर्वविपदावृत्तो भवति। स धनलुब्धः चःालः चपलेन्द्रियश्च भवति।

**व्याकरणम्** -अजितेन्द्रियः=न जितेन्द्रियः (नञ् तत्पु.) धनलुब्धः=धनस्य लुब्धः(ष.तत्पु.)।

**प्रकृति-प्रत्यय** :-तुष्टं=तुष्+क्त। लुब्धः=लुभ्+क्त।

**सन्धिः**-एवापदस्तस्य=एव+आपदः+तस्य (दीर्घः, सत्वं) ह्यसन्तुष्टः= हि+असन्तुष्टः(यण्)।

**सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम्।**
**उपानद्गूढपादस्य ननु चर्मावृत्तेव भूः॥21॥**

**प्रसङ्गः**-यस्य मानसं सन्तुष्टं तस्य सर्वाः सम्पत्तय भवन्ति। इत्याह-

**अन्वयः**-यस्य मानसं सन्तुष्टं तस्य सर्वाः सम्पत्तयः भवन्तीति शेषः। ननु उपानद्गूढपादस्य भूः चर्मावृत्ता इव।

**व्याख्या**-यस्य=जनस्य, मानसं=मनः, सन्तुष्टं=सन्तोषसहितं, तस्य= जनस्य, सर्वाः=सकलाः, सम्पत्तयः=सम्पदः, भवन्ति इति शेषः, ननु=निश्चयेन, उपानद्गूढपादस्य=चर्मपादुकावृत्तचरणस्य, भूः=समस्ता धरा, चर्मावृत्ता=अजिनसंवृत्ता, इव=यथा।

**सरलार्थः**-यथा चर्मपादुकावृत्तचरणो जनः अशेषां धरां चर्मावृत्ताम् इव मन्यते तथैव सन्तुष्टमनाः 'वसुधैव कुटुम्बकम्' इति भावनया सर्वाः सम्पदः आत्मनः स्वीकरोति।

**व्याकरणम्**-चर्मावृत्ता=चर्मणा आवृत्ता (तृ.तत्पु.)। उपानद्गूढपादस्य= उपानद्भ्यां गूढः उपानगूढः (तृ.तत्पु.)। उपानद्गूढः पादो यस्य सः उपानद्गूढपादः तस्य (बहु.)।

**प्रकृति प्रत्ययः**- गूढः=गुह्+क्त। सम्पत्तिः=सम्+पद्+क्तिन्।

**सन्धिः**- चर्मावृत्तेव=चर्म+आवृत्ता+इव (दीर्घः, गुणः)।

**संतोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।**
**कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्॥22॥**

**प्रसङ्गः**-यस्य मनः सन्तुष्टं स एव सुखी वर्तते। इत्याह -

**अन्वयः**-सन्तोषमृततृप्तानां शान्तचेतसाम्, यत् सुखं भवति इतश्चेतश्च धावताम् धनलुब्धानां तत् कुतः।

**व्याख्या**- सन्तोषामृततृप्तानाम्=सन्तुष्टिसुधातृप्तानाम्, शान्तचेतसाम्= स्थिरान्तः करणानाम्, यत्=यादृशम्, सुखम्=आनन्दः, भवतीति शेषः इतश्चेतश्च= प्रदेशान्तरे, धावताम्=परिभ्रमताम्, धनलुब्धानाम् =वित्तलोलुपानाम्, तत्=तादृशं सुखम्, कुतः=कस्मात् स्यात्।

**सरलार्थ** :-मनसः सन्तुष्टिरेव सर्वश्रेष्ठं सुखमस्ति। सा अमृततुल्या, यया जनः सर्वदा तृप्तो भवति। इतस्ततो धावन्तो जना अर्थात् असन्तुष्टाः कदापि सुखं न लभन्ते।

**व्याकरणम्**-

**समासः**-सन्तोषामृततृप्तानाम्=संतोष एव अमृतम्, सन्तोषामृतेन तृप्तः, तेषाम् (समानाधिकरण तत्पु., तृ.तत्पु.)। शान्तचेतसाम्=शान्तं चेतः येषां तेषां (बहु.)।

**प्रकृति प्रत्ययः**- तृप्तः=तृप्+क्त। धावताम्=धाव्+शतृ+आम्। लुब्धः =लुभ्+क्त।

**सन्धिः**-इतश्चेतश्च=इतः+चेतः+च(गुणः सत्वं, श्चुत्वम्)। तद्धनलुब्धानां=तत्+ धनलुब्धानाम् (जश्त्वम्)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तेनाऽधीतं श्रुतं तेन तेन सर्वमनुतिष्ठतम्।**
**येनाऽऽशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम्॥23॥**

**प्रसङ्गः**-नैराश्यमेव मानवं शास्त्राध्ययनादिषु कार्येषु नियुङ्क्ते। इत्याह -

**अन्वयः**-येन आशाः पृष्ठतः कृत्वा नैराश्यम् अवलम्बितम्, तेन सर्वम् अधीतम् तेन सर्वं श्रुतं, तेन सर्वम् अनुष्ठितम्।

**व्याख्या**-येन=जनेन, आशाः=अभिलाषान्, पृष्ठतः=पश्चात्, कृत्वा= विधाय, नैराश्यम्=आशाशून्यत्वम्, अवलम्बितम्=आश्रितम्। तेन=पुरुषेण, सर्वम्= सकलं शास्त्रम्, अधीतम्=पठितम्। तेन सर्वं श्रुतम्=आकर्णितम्, तेन सर्वम् अनुष्ठितम् =आचरितम्।

**सरलार्थः**-कोऽपि जनः आशान् परित्यज्य नैराश्यं प्राप्नोति, स शास्त्राध्ययने, शास्त्रश्रवणे, कर्मोपार्जने च प्रवर्तते।

**व्याकरणम् -**

**प्रकृति प्रत्ययः**-नैराश्यम्=निराश+ष्यञ्। श्रुतम्=श्रु+क्त। अधीतम्=अधि +इण्+क्त। कृत्वा=कृ+क्त्वा।

**सन्धिः**-तेनाऽधीतम्=तेन+अधीतम् (दीर्घः)। येनाऽऽशाः येन+आशाः (दीर्घः)।

**असेवितेश्वरद्वारमदृष्टविरहव्यथम्।**
**अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम्॥24॥**

**प्रसङ्गः**-यस्य जीवनं धन्यं तस्य वैशिष्ट्यमत्र वर्णितम्।

**अन्वयः**-असेवितेश्वरद्वारम्, अनिष्टविरहव्यथम्, अनुक्तक्लीबवचनम् कस्यापि जीवनम् धन्यम्।

**व्याख्या**-असेवितेश्वरद्वारम्=अनाश्रितधनिकद्वारम्, अदृष्टविरहव्यथम्= अनवलोकितवियोगदुःखम्, अनुक्तक्लीबवचनम्=अकथितदीनवाक्यम्, कस्यापि= कस्यचित् विरलस्यैव, जीवनं=प्राणधारणम्, धन्यं=प्रशस्यतरम्, भवतीति शेषः।

**सरलार्थः**-येन कदापि धनिको नाश्रितः, कदापि वियोगजन्यं दुःखं न दृष्टम्, दैन्यवचनं नोक्तम्, तस्य जीवनं धन्यमस्ति।

**व्याकरणम् -**

**समासः**-असेवितेश्वरद्वारम्=ईश्वरस्य द्वारम् ईश्वरद्वारम्, न सेवितम् ईश्वरद्वारं येन तत् असेवितेश्वरद्वारम् (ष.तत्पु. बहुब्रीहिः)।

**प्रकृति प्रत्ययः**-दृष्टः=दृश्+क्त। उक्तः=वच्+क्त। वचनम्=वच्+ल्युट्।

**सन्धिः**- कस्यापि=कस्य+अपि (दीर्घः:)। असेवितेश्वरद्वारम्=असेवित+ ईश्वरद्वारम् (गुणः)।

**न योजनशतं दूरं बाध्यमानस्य तृष्णया।**
**सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः॥25॥**

**प्रसङ्गः**-असन्तुष्टः साकाङ्क्षः सन्तुष्टश्च निराकाङ्क्षो भवति। इत्याह -

**अन्वयः**-तृष्णया बाध्यमानस्य योजनशतं दूरम् न। सन्तुष्टस्य करप्राप्तेऽपि अर्थे आदरः न भवति।

**व्याख्याः**-तृष्णया=लोभेन, बाध्यमानस्य=आकृष्यमाणस्य, जनस्य इत्यर्थः। योजनशतं=शतसंख्ययोजनानि, दूरं न=निकटमेव, सन्तुष्टस्य= संतोषसहितस्य जनस्य, करप्राप्तेऽपि=हस्तगतेऽपि, अर्थे=वित्ते, आदरः=सम्मानम्, न= नहि भवतीति शेषः।

**सरलार्थः**-तृष्णायाः मानवे सर्वोपरि प्रभावो भवति। महत्त्वाकाङ्क्षां पूरयितुं तृष्णापीडितः सः कुत्रापि गन्तुमुद्यतो भवति। सन्तुष्टश्च धनलुब्धो न भवति, स धनं प्रति न धावति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्**-योजनशतं=योजनानां शतं (ष.तत्पु.)। करप्राप्ते=करे प्राप्तः करप्राप्तः तस्मिन् (स.तत्पु.)।

**प्रकृति प्रत्ययः**-बाध्यमानस्य=बाध्+णिच्+शानच्+ङस्। प्राप्तः=प्र+आप्+क्त।

**सन्धिः**- करप्राप्तेऽप्यर्थे = करप्राप्ते + अपि + अर्थे (पूर्वरूपं - यण्)। तदत्र अवस्थोचितकार्यपरिच्छेदः श्रेयान्।

**व्याख्या**- तत्=तर्हि, अत्र=अस्मिन्नवसरे, अवस्थोचितकार्यपरिच्छेदः= परिस्थित्यनुसारं कार्यविनिर्णयम्, श्रेयान्=कल्याणकारी, भवतीति।

**को धर्मो? भूतदया, किं सौख्यं? नित्यमरोगिता जगति।**
**कः स्नेहः? सद्भावः, किं पाण्डित्यं? परिच्छेदः॥26॥**

**प्रसङ्गः**-प्रश्नोत्तरमाध्यमेन धर्मादयो लौकिकविषयाः प्रतिपादयन् प्राह-

**अन्वयः**-जगति कः धर्मः? भूतदया, किं सौख्यं? नित्यमरोगिता, कः स्नेहः?सद्भावः, किं पाण्डित्यं? परिच्छेदः।

**व्याख्या**-जगति=संसारे, कः=कतमः, धर्मः=पुण्यम्, भूतदया=प्राणिषु दया एव सर्वश्रेष्ठो धर्मः। किं सौख्यम् = किं सुखम्। नित्यमरोगिता = सदा रोगरहितता, कः =कतमः, स्नेहः = अनुरागः, सद्भावः = सद्विचारः, किं पाण्डित्यम् = किं वैदुष्यम्, परिच्छेदः = कार्याकार्ययोः निर्धारणम् ।

**सरलार्थः**- सदा अरोगिता एव सुखं, सर्वश्रेष्ठः स्नेहः सद्भावः, कार्याकार्ययोः निर्धारणमेव पाण्डित्यं वर्तते।

**व्याकरणम्**-

**समासः**-भूतदया=भूतेषु दया इति भूतदया (स.तत्पु.)। अरोगिता=न रोगिता=अरोगिता (नञ् तत्पु.)।

**प्रकृति प्रत्ययः**-सौख्यं=सुख+ष्यञ्। स्नेहः=स्निह्+घञ्। पाण्डित्यम्= पण्डित+ष्यञ्।

**सन्धिः**-सद्भावः=सत्+भावः(जश्त्वं)। को धर्मः=कः+धर्मः (उत्वं गुणः)।

**परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः।**
**अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे॥27॥**

**प्रसङ्गः**-विपदः कथं दूरीक्रियन्ते? इत्याह -

**अन्वयः**-यदा विपत्तयः आपन्नाः (तदा) परिच्छेदः पाण्डित्यम्। अपरिच्छेदकर्तॄणां विपदः पदे-पदे स्युः।

**व्याख्या**-यदा=यस्मिन् काले, विपत्तयः=आपत्तयः, आपन्नाः=प्राप्ताः, तदा परिच्छेदः= कर्तव्याकर्तव्यनिर्धारणम्, पाण्डित्यम्=वैदुष्यम्, अपरिच्छेदकर्तॄणाम्= अविचारकर्मकारिणाम्, विपदः=आपत्तयः, पदे-पदे=मुहुर्मुहुः, स्युः=भवेयुः।

**सरलार्थः**-यदा विपत्तिः सम्मुखं स्यात् तर्हि किं करणीयम्? किं च अकरणीयमिति निर्धारणमेव वैदुष्यम्। यः कार्याकार्ययोः निर्धारणे अक्षमः स पदे-पदे विपदः प्राप्नोति।

**व्याकरणम्** -

**समासः**-अपरिच्छेदकर्तॄणां=न परिच्छेदः अपरिच्छेदः (नञ् तत्पु.)। अपरिच्छेदस्य कर्ता तेषां (ष.तत्पु.)।

**प्रकृति प्रत्ययः**- परिच्छेदः=परि+तुक्+छिद्+घञ्। आपन्नाः=आ+पद्+ क्त+टाप्+जस्।

**सन्धिः**-परिच्छेदः=परि+छेदः (तुक्) यदापन्नाः=यत्+आपन्नाः (जश्त्वम्)।

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥28॥**

**प्रसङ्गः**-त्यागस्य महत्वं प्रतिपादयन् आह -

**अन्वयः**-कुलस्यार्थे एकम् त्यजेत्, ग्रामस्यार्थे कुलम् त्यजेत्, जनपदस्यार्थे ग्रामं त्यजेत्, आत्मार्थे पृथिवीं त्यजेत्।

**व्याख्या** -कुलस्य=वंशस्य, अर्थे=निमित्ते, एकम्=कमप्येकं जनम्, त्यजेत् =मुःोत्, ग्रामस्यार्थे=संवसथस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रयोजने, कुलं=वंशम्, त्यजेत्=मु꣡ोत्, आत्मार्थे= स्वप्रयोजने, पृथिवीं=धराम्, मु꣡ोत्=त्यजेत्।

**सरलार्थः**-कस्यचिदपि एकस्य जनस्य त्यागेन यदि कुलस्य हितं स्यात् तर्हि तं जनं त्यजेत्। ग्रामस्य हिताय कुलमपि त्यजेत्। देशस्य निमित्ते ग्रामस्य त्यागः श्रेयस्करः। आत्मोन्नयनार्थं भूलोकमपि त्यजेत्।

**व्याकरणम् -**

**समासः**-आत्मार्थे=आत्मनः अर्थे (ष.तत्पु.)।

**प्रकृति प्रत्ययः**- त्यजेत्=त्यज्+विधिलिङ्+तिप्।

**सन्धिः**- कुलस्यार्थे=कुलस्य+अर्थे (दीर्घः)। त्यजेदेकं=व्यजेत्+एकम् (जश्त्वम्)।

**पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम्।**
**विचार्य खलु पश्यामि तत् सुखं यत्र निर्वृत्तिः॥29॥**

**प्रसङ्गः**-यत्र निष्कामभावना तत्रैव सुखमित्याह -

**अन्वयः**-निरायासं पानीयम् वा भयोत्तरम् स्वादु अन्नं वा, यत्र निर्वृत्तिः तत् सुखम्, विचार्य पश्यामि खलु।

**व्याख्या** -निरायासम्=श्रमरहितम्, पानीयम्=जलम्, वा, भयोत्तरम्= पश्चाद्भीतियुक्तम्, स्वादु=मधुरम्, अन्नम्=भक्ष्यपदार्थः, वा, यत्र=यस्मिन्, निर्वृत्तिः= शान्तिः, तत् सुखम्=आनन्दः, इति विचार्य=विचिन्त्य, पश्यामि= विलोकयामि, खलु= निश्चयेन।

**सरलार्थः**-कामं परिश्रमं विना जलं प्राप्नोतु, आहोस्वित् परिश्रमेण भयपूर्णस्थाने स्वादु अन्नम् उपलब्धं स्यात्, परन्तु यत्र शान्तिः तत्र एव सुखं भवति।

**व्याकरणम् -**

**प्रकृति प्रत्ययः**-विचार्य=वि+चर्+णिच्+ल्यप्। निवृत्तिः=निर्+वृत्+क्तिन्।

**सन्धिः**- भयोत्तरम् =भय+उत्तरम् (गुणः), स्वाद्वन्नम्=स्वादु+अन्नम्(यण्)।

**इत्यालोच्याऽहं निर्जनवनमागतः।**

**व्याख्या**-इति=एवम्, आलोच्य=सम्यक् विचार्य, अहं=मूषकः, निर्जनवनम् =जनशून्यारण्यम्, आगतः= आगच्छम्।

**वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पत्रफलाम्बुभक्षणम्।**
**तृणानि शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम्॥30॥**

**प्रसङ्गः**-'निर्धनस्य कृते अरण्यवास एव श्रेयस्करः' इत्याह -

**अन्वयः**-द्रुमालयः पत्रफलाम्बुभक्षणम्, तृणानि शय्या, वसनं च वल्कलम् (एतादृशं) व्याघ्रगजेन्द्रसेवितम् वनं वरम्, बन्धुमध्ये धनहीनजीवनम् न वरम्।

**व्याख्या** -द्रुमालयः=वृक्ष एव गृहम्, पत्रफलाम्बुभक्षणम्=पर्णफल-जल-भोजनम्, तृणानि=घासादीनि, शय्या=शयनस्थानम्, वसनं=परिधानम्, च वल्कलम्= वृक्षत्वक्, एतादृशम्, व्याघ्रगजेन्द्रसेवितं=शार्दूलकरीन्द्राश्रितम्। वनम्=अरण्यम्, वरम्=कि꣡ित् प्रियम्, परन्तु बन्धुमध्ये=बान्धवसमूहे, धनहीनजीवनम्=निर्धनो भूत्वा प्राणधारणम्, न वरम्=कि꣡िदपि प्रियं नास्ति।

**सरलार्थः**-निर्धनतायां अरण्यवासस्य औचित्यं प्रतिपादयति कविः- यत् निर्धनः कुटुम्बे तिरस्क्रियते अतः तस्य कृते वने निवास एव श्रेयस्करः। तत्र वृक्ष एव गृहम्, कन्द-मूल-फल-जलादीनि अनायासमुपलभ्यन्ते।

**व्याकरणम् -**

**समासः**-व्याघ्रगजेन्द्रसेवितम्=व्याघ्राश्च गजेन्द्राश्च व्याघ्रगजेन्द्राः तैः सेवितम् (द्वन्द्वः, तृतीयातत्पु.)। बन्धुमध्ये=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बन्धूनाम् मध्ये (ष.तत्पु.)। धनहीनजीवनम्= धनेन हीनं धनहीनं च तत् जीवनम् (तृ.तत्पु., कर्मधा.)।

**प्रकृति प्रत्ययः-** जीवनम्=जीव्+ल्युट्। सेवितं=सेव्+क्त। भक्षणम्=भक्ष् +ल्युट्। वसनम्=वस्+ल्युट्।

**सन्धिः-**गजेन्द्रः=गज+ इन्द्रः (गुणः)। द्रुमालयः=द्रुम+आलयः (दीर्घः)। पत्रफलाम्बुभक्षणम्=पत्रफल+अम्बुभक्षणम् (दीर्घः)।

**ततः अस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्याऽनुगृहीतः। अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः।**

**व्याख्या-**ततः=वनागमनानन्तरम्, अस्मत्पुण्योदयात्=अस्माकं पुण्यस्य परिपाकात्,अनेन=समीपस्थेन, मित्रेण=सुहृदा, काकेन इत्यर्थः। अहं=मूषकः, स्नेहानुवृत्त्या=प्रीत्यतिशयेन, अनुगृहीतः=कृतार्थः कृतः, अधुना च=इदानीं च, पुण्य-परम्परया=सुकृतोदयेन, भवदाश्रयः=भवतः कच्छपस्य आवासस्थानम्। स्वर्ग एव= स्वर्गतुल्यः, मया=मूषकेण, प्राप्तः=लब्धः।

**व्याकरणम् -**

**समासः-**अस्मत्पुण्योदयात्=पुण्यस्य उदयः पुण्योदयः, अस्माकं पुण्योदयः तस्मात् (ष.तत्पु.)। स्नेहानुवृत्तिः= स्नेहस्य अनुवृत्तिः स्नेहानुवृत्तिः (ष.तत्पु.)।

**प्रकृति प्रत्ययः-**स्नेहः= स्निह् + घञ्। अनुवृत्तिः= अनु + वृत् + क्तिन्। गृहीतः = गृह् +क्त।

**सन्धिः-** मित्रेणाहम्=मित्रेण+अहम् (दीर्घः)। पुण्योदयात्=पुण्य+उदयात् (अ+उ=ओ गुणः)। भवदाश्रयः= भवत्+आश्रयः(जश्त्वम्)।

**संसारविषवृक्षस्य द्वे एव रसवत्फले।**
**काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह॥31॥**

**प्रसङ्गः-**दुःखार्णवे संसारे सुखप्राप्तेरुपायो वर्णितः-

**अन्वयः-**काव्यामृतरसास्वादः सज्जनैः सह सङ्गमश्च संसारविषवृक्षस्य द्वे एव रसवत्फले 'स्तः'।

**व्याख्या -**काव्यामृतरसास्वादः=कवितासुधारसास्वादनम्, सज्जनैः= भद्रपुरुषैः, सह=साकम्, सङ्गमः= सङ्गतिश्च, संसारविषवृक्षस्य=प्रपःागरलतरोः, द्वे एव= उभे एव, रसवत्फले=आस्वादपूर्णफले, स्तः इति शेषः।

**सरलार्थः-**दुःखाधिक्येन अयं संसारः विषपादपोऽस्ति। अत्रापि द्वे फलं स्तः ताभ्यां सुखं प्राप्तुं शक्यते। प्रथमं काव्यामृतस्य रसास्वादनम्, द्वितीयःा सतां सङ्गतिः।

**व्याकरणम् -**

**समासः-**संसारविषवृक्षस्य=विषस्य वृक्षः विषवृक्ष (ष.तत्पु.), संसारः विषवृक्षः इव (समानाधिकरण तत्पु.) तस्य।

**प्रकृति-पृत्ययः-** आस्वादः=आ+स्वद्+घञ्। रसवत्=रस+मतुप्।

**सन्धिः-** काव्यामृतरसास्वादः=काव्य+अमृतरस+आस्वादः (दीर्घः)।

**सत्सङ्गः केशवे भक्तिर्गङ्गाम्भसि निमज्जनम्।**
**असारे खलु संसारे त्रीणि साराणि भावयेत्॥32॥**

**प्रसङ्गः-**असारे संसारे यानि सारयुक्तानि कार्याणि तान्याह-

**अन्वयः-**असारे खलु संसारे सत्सङ्गः केशवे भक्तिः, गङ्गाम्भसि निमज्जनम् त्रीणि साराणि भावयेत्।

**व्याख्या-**असारे=सारशून्ये, खलु= नूनमेव, संसारे=लोके, सत्सङ्गः=साधुसमागमः, केशवे=कृष्णे विष्णौ वा, भक्तिः= उपासना, गङ्गाम्भसि=गङ्गायाः जले, निमज्जनम्= स्नानम्, त्रीणि=त्रिसंख्यकानि, साराणि=स्थिरफलानि,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भावयेत्= चिन्तयेत्।

**सरलार्थः-**वस्तुतः सारशून्योऽयं संसारः, तथापि कानिचित् सारयुक्तानि कार्याणि अत्र सन्ति यैः मानवः पापमुक्तो भवितुं शक्यते।

**व्याकरणम् -**

**समासः-**सत्सङ्गः=सतां सङ्गः सत्सङ्गः (ष.तत्पु.)। असारः=न सारः (नञ् तत्पु.)। गङ्गाम्भसि=गङ्गायाः अम्भसि (ष.तत्पु.)।

**प्रकृति प्रत्ययः-** भक्तिः=भज्+क्तिन्। निमज्जनम्=नि+मस्ज्+ल्युट्।

**सन्धिः-**भक्तिर्गङ्गाम्भसिः=भक्तिः+ गङ्गा+अम्भसि (रुत्वं, दीर्घः)।

**अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवन-**
**मायुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम्।**
**धर्मे यो न करोति निश्चलमतिः स्वर्गाऽर्गलोद्घाटनम्,**
**पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते॥33॥**

**प्रसङ्गः-**सांसारिकजीवने भौतिकपदार्थानां नश्वरतां प्रतिपादयन् प्राह -

**अन्वयः-**अर्थाः पादरजोपमाः, यौवनम् गिरिनदीवेगोपमम्, आयुष्यं जललोलबिन्दुचपलम्, जीवनम् फेनोपमम्, यः निश्चलमतिः स्वर्गाऽर्गलोद्घाटनम् धर्मम् न करोति, सः जरापरिणतः पश्चात्तापहतः शोकाग्निना दह्यते।

**व्याख्या -**अर्थाः=धनानि, पादरजोपमाः=चरणधूलिसदृशाः, यौवनम्= तारुण्यम्, गिरिनदीवेगोपमम्= पर्वतनदीप्रवाहसदृशम्, आयुष्यम्=जीवनकालः, जल-लोलबिन्दुचपलम्=तोयचपलपृषच्चलम्, जीवनम्=प्राणधारणम्, फेनोपमम्= डिण्डीरतुल्यम्, यः=जनः, निश्चलमतिः=स्थिरबुद्धिः सन्, स्वर्गार्गलोद्घाटनम्= सुरलोक-प्रतिबन्धविनाशकम्, धर्मम्=पुण्यम्, न करोति=नाचरति। सः=असौ, पुरुषः, जरापरिणतः=वृद्धावस्थां प्राप्तः पश्चात्तापहतः= मरणसमये वेदनां प्राप्तः, शोकाग्निना= दुःखाग्निना, दह्यते=सन्तप्यते।

**सरलार्थः-**कविः कथयति यत्-अर्थः चरणरजसदृशोऽस्ति यथा चरणरजो मार्गे गच्छतो जनस्य दृष्टिं बाधते तथैव मानव अर्थगर्वेण अन्धो भवति। यौवनं च पर्वतनदीप्रवाहसदृशमस्ति। एवम् आयुष्यं जीवनःापि क्षणिकम्। अतो यः पुण्यं न करोति स वृद्धावस्थायां शोकाग्निना दह्यते।

**व्याकरणम् -**

**समासः-**स्वर्गार्गलोद्घाटनम्=स्वर्गस्य अर्गला स्वर्गार्गला तस्या उद्घाटनम् (ष.तत्पु.)। निश्चलमतिः=निश्चला मतिर्यस्य सः निश्चलमतिः(बहु.)। शोकाग्निना =शोकस्य अग्निना (ष.तत्पु.)।

**प्रकृति-प्रत्यय :-** परिणतः=परि+नम्+क्त। हतः=हन्+क्त। शोकः= शुच् +घञ्। उद्घाटनम्=उत्+घट्+ णिच्+ल्युट्।

**सन्धिः-**पादरजोपमाः=पादरज+उपमाः(गुणः)। फेनोपमम्=फेन+उपमम् (अ+उ गुणः)।

**युष्माभिः अतिसःायः कृतः तस्यायं दोषः।**

**व्याख्या :-**युष्माभिः=भवद्भिः, अतिसःायः=भूरिपरिगृहः, कृतः=विहितः, तस्य=अतिसःायस्य, अयम्=एषः, दोषः=अभिशापः।

**उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।**
**तडागोदरसंस्थानां परीवाह इवाऽम्भसाम्॥34॥**

**प्रसङ्गः-**धनोपार्जनेन अपेक्षापूर्त्यनन्तरं धनागमः स्यात् तर्हि दानेन तत् रक्षणीयम् इत्याह -

**अन्वयः-**तडागोदरसंस्थानाम् अम्भसाम् परीवाह इव उपार्जितानाम् वित्तानाम् त्याग एव रक्षणम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या**-तडागोदरसंस्थानाम्=सरोवरगर्भस्थितानाम्, अम्भसाम्= जलानाम्, परीवाहः=बहिर्गमनम्, इव=यथा, उपार्जितानाम्=सञ्चितानाम्, वित्तानाम्= धनानाम्, त्यागः=दानम्, एव=अवधारणार्थे, रक्षणम्=पालनम्, भवतीति शेषः।

**सरलार्थः**-यथा वर्षर्तौ तडागे भरिते सति तस्य जलं बहिः निर्गच्छति, तथैव उपार्जितधनेन अपेक्षाणां पूर्त्यनन्तरं यदि धनागमः स्यात् तर्हि तद् धनं दानेन रक्षणीयम्।

**व्याकरणम्** -

**समासः**-तडागोदरसंस्थानाम्=तडागस्य उदरः तडागोदरः तत्र तिष्ठन्ति तेषाम् ।

**प्रकृति प्रत्ययः**-उपार्जितानाम्=उप+अर्ज्+क्त+आम्। त्यागः=त्यज्+ घञ्। रक्षणम्=रक्ष्+ल्युट्।

**सन्धिः**-इवाम्भसाम्=इव+अम्भसाम्(दीर्घः)। तडागोदरसंस्थानाम्=तडाग +उदरसंस्थानाम् (गुणः)।

**यदधोऽधः क्षितौ वित्तं निचखान मितम्पचः।**
**तदधो निलयं गन्तुं चक्रे पन्थानमग्रतः॥35॥**

**प्रसङ्गः**-कृपणस्य स्वभावं वर्णयन् प्राह -

**अन्वयः**-मितम्पचः क्षितौ अधः अधः यत् वित्तम् निचखान तत् अग्रतः अधोनिलयम् गन्तुम् पन्थानम् चक्रे।

**व्याख्या** -मितम्पचः=कृपणः, क्षितौ=पृथिव्याम्, अधोऽधः=भूमेरधो भागे, यद् वित्तम्=धनम्, निचखान= निखातवान्, तत्=निखननम्, अग्रतः=प्रथमतः, अधो-निलयम्=नरकम्, गन्तुम्=यातुम्, पन्थानम्=मार्गम्, चक्रे=कृतवान्।

**सरलार्थः**-कृपणः पर्याप्तं धनं सञ्चिनोति, भविष्याय पृथिव्यां तत् निखनति। धनचिन्तया स आसक्ते र्मुक्तो भवितुं न शक्यते। आसक्तिरियम् तं जनं नरकं गमयति।

**व्याकरणम्** -

**समासः**-मितम्पचः=मितम् पचतीति मितम्पचः ।

**प्रकृति प्रत्ययः**-गन्तुम्=गम्+तुमुन्। चक्रे=कृ+त (लिट्)।

**सन्धिः**-यदधोऽधः=यत्+अधः+अधः (जश्त्वम्, उत्वं गुणः पूर्वरूपम्)।

**निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति।**
**परार्थभारवाहीव स क्लेशस्यैव भाजनम्॥38॥**

**प्रसङ्गः**-यः निजसुखं विस्मरन् धनार्जने एव प्रवर्तते, तदनुचितम्। इत्याह -

**अन्वयः**-यः निजसौख्यम् निरुन्धानः धनार्जनम् इच्छति। सः परार्थभारवाही इव क्लेशस्य एव भाजनम् भवति।

**व्याख्या**-यः=जनः, निजसौख्यम्=स्वसुखम्, निरुन्धानः=निवारयन्, धनार्जनम् =अर्थसंग्रहम्, इच्छति=वाञ्छति, सः=असौ, परार्थभारवाही= अन्यनिमित्तगुरुपदार्थानां वहनकर्ता, इव=यथा, क्लेशस्य=दुःखस्य, भाजनम्=पात्रम्, भवतीति शेषः।

**सरलार्थः**-मनुष्यः कदापि स्वसुखानि निवारयन् धनार्जनं न इच्छेत्, अन्यथा स परार्थभारवाही गर्दभ इव दुःखमेव प्राप्नोति।

**व्याकरणम्**-

**समासः**-निजसौख्यं=निजस्य सौख्यं (ष.तत्पु.)। धनार्जनम्=धनस्य अर्जनम् (ष.तत्पु.)।

**प्रकृति प्रत्ययः**- निरुन्धानः=नि+रुध्+शानच्। सौख्यं=सुख+ष्यञ्।

**सन्धिः**- क्लेशस्यैव=क्लेशस्य+एव (वृद्धिः)। भारवाहीव=भारवाही+इव (दीर्घः)।

**दानोपभोगहीनेन धनेन धनिनो यदि।**
**भवामः किं न तेनैव धनेन धनिनो वयम्॥37॥**

**प्रसङ्गः**-दानोपभोगरहितेन धनेन कोऽपि धनी न भवति। इत्याह -

**अन्वयः**-दानोपभोगहीनेन धनेन धनिनो यदि तेनैव धनेन वयम् धनिनः किं न भवामः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या** - दानोपभोगहीनेन=त्यागोपभोगरहितेन, धनेन=वित्तेन, धनिनः= धनवन्तः, यदि=चेत्, (तर्हि) तेनैव=पूर्वनिर्दिष्टेनैव, धनेन=द्रव्येण, धनिनः=धनवन्तः, किं न भवामः=किं न स्मः।

**सरलार्थ** :-लोकेऽस्मिन् यदि कृपणो धनिकः स्यात् तर्हि सर्वे जनाः कृपणतां स्वीकरिष्यन्ति। तन्न, यतोहि दानोपभोगहीनेन धनेन कोऽपि धनी न भवति।

**व्याकरणम्** -

**समासः**-दानोपभोगहीनेन=दानं च उपभोगश्च दानोपभोगः=ताभ्यां हीनं, तेन (द्वन्द्वः, तृतीया तत्पु.)।

**प्रकृति प्रत्ययः**- धनिनः=धन+इनि+जस्। दानम्=दा+ल्युट्। उपभोगः= उप+भुज्+घञ्।

**सन्धिः**- तेनैव=तेन+एव (वृद्धिः) दानोपभोगः=दान+उपभोगः (गुणः)।

**धनेन किं? यो न ददाति नाऽश्नुते,**
**बलेन किं? यश्च रिपून् न बाधते।**
**श्रुतेन किं? यो न धर्ममाचरेत्,**
**किमात्मना? यो न जितेन्द्रियो भवेत्॥38॥**

**प्रसङ्गः**-अत्र धनबलज्ञानात्मसाक्षात्कारादीनाम् औचित्यं प्रतिपादयन् प्राह -

**अन्वयः**-यः न ददाति न अश्नुते (तस्य) धनेन किं? यः च रिपून् न बाधते (तस्य) बलेन किं? यः च धर्मम् न आचरेत् (तस्य) श्रुतेन किं? यः जितेन्द्रियो न भवेत् (तस्य) आत्मना किम्?

**व्याख्या** -यः=जनः, न ददाति=न वितरति, न अश्नुते=न भुङ्क्ते, तस्य, धनेन=वित्तेन, किम्=किमपि प्रयोजनं न, यः च=जनः, रिपून्=शत्रून्, न बाधते= दण्डयति, तस्य, बलेन=पराक्रमेण, किं=किं प्रयोजनम्? यः च=जनः, धर्मम्= पुण्यम्, न आचरेत्=न कुर्यात्, तस्य, श्रुतेन=शास्त्रश्रवणेन, किं=न किमपि प्रयोजनम्, यः=जनः, जितेन्द्रियः= वशीकृतहृषीकः, न भवेत्=न स्यात्, तस्य =पुरुषस्य, आत्मना=शरीरेण, किं=किमपि प्रयोजनं नास्ति।

**सरलार्थः**-यो जनो धनं न ददाति, न च उपभुङ्क्ते, तस्य धनं व्यर्थमस्ति। यो रिपून् न दण्डयति तस्य बलं निरर्थकम्। यो धर्मं न आचरति तस्य शास्त्रश्रवणेन को लाभः? यो जितेन्द्रियो न तस्य शरीरलाभेन किमपि प्रयोजनं नास्ति।

**व्याकरणम्** -

**समासः**-जितेन्द्रियः=जितानि इन्द्रियाणि येन सः जितेन्द्रियः=(बहुब्रीहिः)।

**प्रकृति प्रत्ययः**- श्रुतेन=श्रु+क्त+टा। जितः=जि+क्त+सु।

**सन्धिः**-नाश्नुते=न+अश्नुते (दीर्घः) जितेन्द्रियः=जित+इन्द्रियः (गुणः)।

**असम्भोगेन सामान्यं कृपणस्य धनं परैः।**
**अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते॥39॥**

**प्रसङ्गः**-कृपणस्य धनं परकीयमेव मन्तव्यं, यतोहि तस्य विनाशः सुनिश्चितः इत्याह-

**अन्वयः**-कृपणस्य धनम् असम्भोगेन परैः सामान्यम्, हानौ दुःखेन अस्य इदम् इति सम्बन्धः गम्यते।

**व्याख्या** -कृपणस्य=कदर्यस्य, धनम्=वित्तम्, असम्भोगेन=उपभोगशून्येन, परैः=धनरहितैः, सामान्यम्= तुल्यम्, हानौ=धननाशे सति, दुःखेन=कष्टेन, अस्य= कृपणस्य, इदम्=एतद्धनम्, इति, सम्बन्धः=स्वस्वामिभावरूपः, गम्यते=ज्ञायते।

**सरलार्थः**-कृपणस्य धनं दानोपभोगहीनम्, अतः परकीयतुल्यमस्ति। तदा तस्य तृतीया गतिः अर्थात् विनाशो भवति, तदा तेन सह कृपणस्य सम्बन्धो भवति यद् अस्य कृपणस्य धनं नष्टम्।

**व्याकरणम्** -

**समासः**-असम्भोगेन=न सम्भोगः तेन (नञ्, तत्पु.)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः-** सामान्यं=समान+ष्यञ्। सम्भोगः=सम्+भुज्+घञ्।

**सन्धिः-**अस्येदमिति=अस्य+इदम्+इति (गुणः)।

**न देवाय न विप्राय न बन्धुभ्यो न चात्मने।**
**कृपणस्य धनं याति वह्नितस्करपार्थिवैः॥40॥**

**प्रसङ्गः-**कृपणधनस्य का गतिः भवति? इत्याह -

**अन्वयः-**कृपणस्य धनं देवाय न, विप्राय न, बन्धुभ्यः न, आत्मने च न अस्ति। (परं) वह्नितस्करपार्थिवैः याति।

**व्याख्या -**कृपणस्य=कदर्यस्य, धनं=वित्तम्, देवाय=सुराय, न=नहि, विप्राय न=ब्राह्मणाय न, बन्धुभ्यः न= बान्धवेभ्यो न, आत्मने च न=स्वस्मै च न, अस्ति=वर्तते, परं, वह्नितस्करपार्थिवैः=अग्निचौरराजभिः सह, याति= गच्छति।

**सरलार्थः-**कृपणस्य धनं देवायं नास्ति यतोहि स धर्माचरणे कृपणताम् आचरति। तथैव ब्राह्मणाय बन्धुभ्यश्चापि नास्ति यतोहि स स्वार्थी भवति। स्वस्मै अपि स धनं नोपभुङ्क्ते। अतस्तस्य धनं अग्नौ विनश्यति, अथवा चौरैर्विनश्यते आहोस्वित् नृपेण अपह्रियते।

**व्याकरणम् -**

**समासः-**वह्नितस्करपार्थिवैः=वह्निश्च तस्करश्च पार्थिवश्च तैः(द्वन्द्वः)।

**सन्धिः-**चात्मने=च+आत्मने (दीर्घः)।

**दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।**
**त्यागसहितःा वित्तं, दुर्लभमेतच्चतुर्भद्रम्॥41॥**

**प्रसङ्गः-**कल्याणचतुष्ट्यं दुर्लभमिति प्रतिपादयन् आह -

**अन्वयः-**प्रियवाक्सहितम् दानम् अगर्वम् ज्ञानम् क्षमान्वितम् शौर्यम् त्यागसहितः वित्तम् च एतत् चतुर्भद्रम् दुर्लभम् अस्ति।

**व्याख्या -**प्रियवाक्सहितम्=मधुरवचनयुक्तम्, दानम्=वितरणम्, अगर्वम्= दर्पशून्यम्, ज्ञानम्=बोधः, क्षमान्वितम्=तितिक्षायुक्तम्, शौर्यम्=वीरता, त्यागसहितम्= दानयुक्तम्, वित्तम्=धनम्, च, एतत्=इदम्, चतुर्भद्रम्= कल्याणचतुष्टयम्, दुर्लभम्= कठिनम् अस्तीति शेषः।

**सरलार्थः-**आत्मकल्याणमेव मानवस्य उत्कृष्टमुद्देश्यमस्ति। तस्य कृते प्रियवचनसहितं दानं कुर्यात्, परं धनिनो दानसमये खिन्नाः भवन्ति, तद्दानं कल्याणाय न भवति, तथैव गर्वरहितं ज्ञानमपि कल्याणाय भवति। एवं सहनशीलतासहितं शौर्यं दानयुक्तं धनःा एतानि चत्वारि कल्याणानि लोके दुष्प्राप्यानि सन्ति।

**व्याकरणम् -**

**समासः-**त्यागसहितं -त्यागेन सहितं (तृ.तत्पु.)। चतुर्भद्रम् चतुर्णां भद्राणां समाहारः तत् (द्विगुः)।

**प्रकृति प्रत्ययः-** दानम्=दा+ल्युट्। शौर्यम्=शूर+ष्यञ्। त्यागः= त्यज्+घञ्।

**सन्धिः-**क्षमान्वितम्=क्षमा+अन्वितम् (दीर्घः)। एतच्चतुर्भद्रम्=एतत्+ चतुर्भद्रम्। (श्चुत्वम्)।

**कर्तव्यः सःायो नित्यं कर्तव्यो नातिसःायः।**
**पश्य सःायशीलोऽसौ धनुषा जम्बुको हतः॥42॥**

**प्रसङ्गः-**अतिसःायः प्राणिनो विनाशस्य हेतुः, अतः सःायः कर्तव्यः अतिसःायो न इत्याह -

**अन्वयः-**नित्यं सःायः कर्तव्यः, अतिसःायः न कर्तव्यः, सःायशीलः, असौ जम्बुकः धनुषा हतः इति पश्य।

**व्याख्या-**नित्यं=प्रतिदिनम्, सःायः=धनसंग्रहः, कर्तव्यः=विधातव्यः, अतिसःायः=अधिकद्रव्यसङ्ग्रहः, न कर्तव्यः=न करणीयः, सःायशीलः=संगृही, असौ =अयम्, जम्बुकः=शृगालः, धनुषा=चापगुणेन, हतः=मारितः, इति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पश्य=विलोकय।

**सरलार्थः-**सुव्यवस्थितजीवनं यापयितुं मानवेन द्रव्यसंगृहः करणीयः। परन्तु अतिसञ्चय न कर्तव्यः, यतोहि अतिसःाय विनाशस्य हेतुरस्ति। यथा शृगालः अतिसःायेन मृतः।

**व्याकरणम् -**

सःायशीलः=सःाय एव शीलो यस्य स सःायशीलः (बहुब्रीहिः)।

**प्रकृति प्रत्ययः-** हतः=हन्+क्त। कर्तव्यः=कृ+तव्यत्।

**सन्धिः-**नातिसःायः=न+अतिसःायः (दीर्घः)।संचयशीलोऽसौ= सःायशीलः + असौ (रुत्वं, उत्वं, गुणः, पूर्वरूपम्)।

## अभ्यासार्थ-प्रश्नाः

### बहुचयनात्मकप्रश्नाः

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. परिव्राजकानाम् आवसथः कुत्र आसीत् -
(अ)पाटलीपुत्रे (ब) भागीरथीतीरे (स) चम्पकायां नगर्याम्(द) पुष्करे ( )
2. चूडाकर्णः आसीत् -
(अ)परिव्राजकः (ब) मूषकः (स) काकः (द)मृगः ( )
3. सदानुरक्तस्य जनस्य लक्षणं नास्ति-
(अ) विमला दृष्टिः (ब) प्रसन्नं मुखम् (स) मधुरा वाणी (द) अदृष्टिदानम् ( )
4. कस्य गृहं शून्यं भवति-
(अ) अपुत्रस्य (ब) सन्मित्ररहितस्य (स) मूर्खस्य (द) सर्वेषाम् ( )
5. किं पाण्डित्यम्?
(अ) सद्भावः (ब) भूतदया (स)परिच्छेदः (द) अरोगिता ( )

### अतिलघूत्तरात्मकप्रश्नाः-

1. चूडाकर्णो नाम परिव्राजकः कुत्र प्रतिवसति स्म?
2. भिक्षापात्रं नागदन्तके अवस्थाप्य कः स्वपिति स्म?
3. चूडाकर्णस्य प्रियसुहृत् कः आसीत्?
4. मूषकस्य त्रासार्थं चूडाकर्णः केन भूमिमताडयत्?
5. 'अदृष्टिदानमि'ति कस्य जनस्य लक्षणं कथितम्?
6. 'भद्र! नाहं विरक्तः, इति केन कथितम्?
7. चूडाकर्णेन मन्दमुपसर्पन् कः अवलोकितः?
8. कस्यां सत्यां सर्वं शून्यप्रायं प्रतीयते?
9. को जनः कार्पण्यं न गच्छति?
10. अर्थनाशं को न प्रकाशयेत्?
11. कस्मात् ह्रियमेति?
12. निधनता कासाम् आस्पदं भवति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

13. बुद्धिः केन चलति?
14. आत्मद्रोही को भवति?
15. किं नाम सौख्यम्?
16. कस्यार्थे पृथिवीं त्यजेत्?

**लघूत्तरात्मकप्रश्नाः**

1. सदानुरक्तस्य जनस्य किं लक्षणम्?
2. चूडाकर्णो मूषकस्य त्रासार्थं किमकरोत्?
3. विरक्तभावस्य जनस्य लक्षणं लिखत?
4. वीणाकर्णो कूर्दन्तं मूषकमवलोक्य किम् आह?
5. परिव्राजकेन मूषकस्य धनं केन प्रकारेण गृहीतम्?
6. कः पुमांल्लोके पण्डितो भवति?
7. दारिद्र्यं मरणाद् अवरं कथम्?
8. मतिमान् किं न प्रकाशयेत्?
9. कस्य जीवनं मरणतुल्यमस्ति?
10. संसारविषवृक्षस्य द्वे रसवत्फले के स्तः?
11. असारे संसारे कानि त्रीणि साराणि भावयेत्?
12. शोकाग्निना को दह्यते?
13. परार्थभारवाहीव क्लेशस्य भाजनं को भवति?
14. दुर्लभं चतुर्भद्रं किमस्ति?
15. जम्बुकः कथं हतः?

**निबन्धात्मक प्रश्नाः-**

1. 'मूषकपरिव्राजककथा' हिन्द्यां संस्कृते वा लेख्या।
2. 'दारिद्र्यं मरणादपि अवरमि'ति सविस्तरो विवेचनीयः।
3. याच्ञावृत्तिः सर्वथा हेया। कथम्?
4. त्यागस्य महत्त्वं प्रतिपादनीयम्।

**उत्तरमाला (बहुचयनात्मक-प्रश्नानाम्)**

(1)स (2) अ (3)द (4)अ (5)स

**व्याकरणसम्बन्धिनः प्रश्नाः-**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | |
|---|---|---|---|---|
| अभ्यासक्तः | = | अभि+आसक्तः | = | यण् सन्धिः। |
| सदानुरक्तस्य | = | .......+ ....... | = | ........... |
| पुरुषस्याल्पमेधसः | = | .......+ ....... | = | ........... |
| व:ान:ा | = | .......+ ....... | = | ........... |
| परत्रेह | = | .......+ ....... | = | ........... |
| भवदाश्रयः | = | .......+ ....... | = | ........... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| को धर्मः | = | .......+ ....... | = | ........... |
| तथैव | = | .......+ ....... | = | ........... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | प्रसन्नम् | = | प्र+सद्+क्त। |
| अनुरागः | =............. | = | ........... |
| उत्प्लुत्य | =............. | = | ........... |
| लावण्यम् | =............. | = | ........... |
| त्यागः | =............. | = | ........... |
| रक्षणम् | =............. | = | ........... |
| सम्भोगः | =............. | = | ........... |
| बुद्धिः | =............. | = | ........... |

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं समुचितं रूपं लिखत-

(अ) चूडाकर्णो भूमिं ताडयति। (लङ्)।

(ब) एनं मूषकं पश्यसि। (लोट्)।

(स) मतिमान् अर्थनाशं न प्रकाशयति। (विधिलिङ्)

(द) रामो राजा भवति। (लिट्)।

(य) वैज्ञानिकः आविष्कारं कुर्यात्। (लट्)।

4. **(अ)असमस्तपदानां समासो विधेयः-**

1.कथायाः प्रसङ्गः = ..................

2.कुत्सिताः सरितः = ..................

3.जर्जरश्चाऽसौ वंशखण्डः = ..................

4.जितानि इन्द्रियाणि येन सः = ..................

5.न रोगिता = ..................

**(ब)समस्तपदानां विगृहः कार्यः-**

1. हरिहरकथा = ..................

2. कथानुरागः = ..................

3. अल्पमेधसः = ..................

4. शान्तचेतसाम् = ..................

5. तडागोदरसंस्थानाम् = ..................

5. अधोलिखितपदानां मूलशब्द -विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

1. भवान् - भवत्+प्रथमा+एकवचन्+पुंलिङ्गः।

2. परिव्राजकः - ................................

3. लोके - ................................

4. स्तबकस्य - ................................

5. पृथिवीम् - ................................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

6. धनेन - ...............................
7. वित्तानाम् - ...............................

6. कोष्ठके स्थितं शब्दमाश्रित्य समुचितं विभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

1. स भिक्षापात्रं ...... अवस्थाप्य स्वपिति। (नागदन्तक, सप्तमी एकव.)
2. चूडाकर्णो.......... अताडयत्।(भूमि, द्वितीया एकवचनम्)
3. नृपः.......... धनं ददाति। (निर्धन, चतुर्थी बहुवचनम्)
4. ..........गृहे बहूनि वस्तूनि सन्ति। (अस्मद्, षष्ठी एकवचनम्)
5. हेमन्तविकासौ ......... सह गङ्गापुरं गच्छतः।(मातृ, तृतीया एकव.)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सःायशील-जम्बुक-कथा

## सप्तमो भागः

**आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याघः। स चैकदा मांसलुब्धो धनुरादाय मृगमन्विष्यन् विन्ध्याटवीं गतः। तत्र तेन मृग एको व्यापादितः। ततो मृगमादाय गच्छता तेन घोराकृतिः शूकरो दृष्टः। ततस्तेन मृगं भूमौ निधाय शूकरः शरेण हतः। शूकरेणाप्यागत्य प्रलयघनघोरगर्जनं कुर्वाणेन स व्याघो मुष्कदेशे हतः छिन्नद्रुम इव पपात। यतः -**

**व्याख्या** -कल्याणकटकवास्तव्यः='कल्याणकटक' नाम्नि देशे वासकारी, भैरवोनाम='भैरव' इति नामकः, व्याधः=मृगयुः, आसीत्=अवर्तत, सः=असौ व्याधश्च। एकदा=एकस्मिन् दिने, मांसलुब्धः=आमिषलोभी सन्, धनुः=कार्मुकम्, आदाय=गृहीत्वा, मृगम्=हरिणम्, अन्विष्यन्=मृग्यमाणः सन्, विन्ध्याटवीं =विन्ध्याचलपर्वतं, गतः=यातः तत्र= अटव्यां, तेन=व्याधेन, मृगः=हरिणः, एकः= एकसंख्याकः, व्यापादितः=मारितः। ततः=तदनन्तरम्, मृगम्=हरिणम्, आदाय= गृहीत्वा, गच्छता=गतिं कुर्वता, तेन=व्याधेन, मृगम्=हरिणम्, आदाय=गृहीत्वा, गच्छता=गतिं कुर्वता, तेन=व्याधेन, घोराकृतिः=भयङ्करस्वरूपः, शूकरः=वराहः, दृष्टः =विलोकितः। ततः=तदनन्तरम्, तेन=व्याधेन, मृगं=हरिणम्, भूमौ=धरातले, निधाय = संस्थाप्य, शूकरः=वराहः, शरेण=बाणेन, हतः=ताडितः। शूकरेणपि= वराहेणापि, आगत्य=व्याधं समुत्पत्य, प्रलयघनघोरगर्जनं=प्रलयकालस्य मेघगर्जनमिव भयङ्कर-गर्जनम्, कुर्वाणेन=कुर्वता, मुष्कदेशे=गुप्ताङ्गे, हतः=ताडितः, सः= व्याधः, छिन्नद्रुम इव=भग्नतरुरिव, पपात=भूमौ पतितः।

**व्याकरणम्-**

**समासः-**घोराकृतिः=घोरा आकृतिर्यस्य सः (बहु.)। प्रलयघनघोरगर्जनम्= घोरं च तत् गर्जनम् इति घोरगर्जनम्, प्रलयस्य घनःप्रलयघनः तस्य घोरगर्जनम् (कर्म.ष.तत्पु.)।

**प्रकृति प्रत्ययः-** कुर्वाणः=कृ+शानच्। दृष्टः=दृश्+क्त। आदाय=आ+दा +ल्यप्। आकृतिः=आ+कृ+ क्तिन्। हतः=हन्+क्त।

**सन्धिः-**घोराकृतिः = घोरा + आकृतिः(दीर्घः)। शूकरेणाप्यागत्य=शूकरेण+ अपि+आगत्य (दीर्घः, यण्)। धनुरादाय=धनुः+आदाय (रुत्वम्)।

**जलमग्निर्विषं शस्त्रम्, क्षुद् व्याधिः पतनं गिरेः।**
**निमित्तं किःिदासाद्य देही प्राणैर्विमुच्यते॥1॥**

**प्रसङ्गः-** अत्र देहिनो मृत्योर्निमित्तानि प्रतिपादयन् प्राह -

**अन्वयः-**देही जलम् अग्निः विषम्, शस्त्रम्, क्षुत्, व्याधिः, गिरेः पतनम्, किःित् निमित्तम्, आसाद्य प्राणैः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विमुच्यते।

**व्याख्या** -देही=शरीरी, जलम्=तोयम्, अग्निः=अनलः, विषम्=गरलम्, शस्त्रम्=आयुधम्, क्षुत्=बुभुक्षा, व्याधिः=रोगः, गिरेः=पर्वतात्, पतनम्=निपतनम्, किंचित्=एषु किमपि, निमित्तम्=हेतुम्। आसाद्य=प्राप्य, प्राणैः=असुभिः, विमुच्यते= त्यज्यते।

**सरलार्थः**-लोके प्राणिनो मृत्योरनेके हेतवः सन्ति, परन्तु गून्थकारेण अत्र सप्त एव मुख्यत्वेन कथिताः। जलम् अर्थात् जले निमज्जनम्, अग्निः, विषं, शस्त्रम्, क्षुधा, रोगः, पर्वतात् पतनम् एषु किमपि आसाद्य प्राणी मृत्युं प्राप्नोति।

**व्याकरणम्-प्रकृति प्रत्ययः**-देही=देह+इनि। शस्त्रम्=शस्+ष्ट-न्। पतनम्= पत्+ल्युट्।

**सन्धिः**-किंचिदासाद्य=किंचित्+आसाद्य (जश्त्वम्)। अग्निर्विषम्=अग्निः +विषम् (रुत्वम्)।

**अथ तयोः पादास्फालनेन एकः सर्पोऽपि मृतः। अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी मृतान् तान् मृगव्याधसर्पशूकरानपश्यत्, आलोक्याचिन्तयच्च-अहो! भाग्यम्! अद्य महद्भोज्यं समुपस्थितम्।**

**व्याख्या-** अथ=अनन्तरम्, तयोः=व्याधशूकरयोः, पादास्फालनेन= पादताडनेन, एकः=एकसंख्याकः, सर्पोऽपि= फणिरपि, मृतः=मृत्युं प्राप्तः अत्रान्तरे= अस्मिन्नेवावसरे, दीर्घरावो नाम=इति नामकः, जम्बुकः=शृगालः, परिभ्रमन्=पर्यटन्, आहारार्थी= भोजनार्थी, मृतान्=मृत्युं प्राप्तान्, तान्=पूर्वोक्तान्, मृगव्याधसर्पशूकरान्=मृगं प्राप्तान्, तान्=पूर्वोक्तान्, मृगव्याघसर्पशूकरान्=मृगं व्याधं सर्पं शूकरः।, अपश्यत्=व्यलोकयत्, आलोक्य=दृष्ट्वा, अचिन्तयत्=व्यचारयत्, अहो= प्रसन्नतायाम्, भाग्यम्=दैवम्, अद्य= अस्मिन् दिने, महद्भोज्यम्=खाद्याधिक्यम्, समुपस्थितम्=प्राप्तम्।

**व्याकरणम् -**

**समासः**-पादास्फालनेन=पादानाम् आस्फालनं तेन (ष.तत्पु.)। आहारार्थी=आहारस्य अर्थी (ष.तत्पु.)। मृगव्याधसर्पशूकरान्=मृगश्च व्याधश्च सर्पश्च शूकरश्च तान् (द्वन्द्वः)।

**प्रकृति प्रत्ययः**-मृतः=मृ+क्त। परिभ्रमन्=परिभ्रम्+शतृ। आलोक्य=आ+ लोक्+ल्यप्। भोज्यम्=भुज्+ण्यत्।

**सन्धिः**-आलोक्याचिन्तयच्च=आलोक्य+अचिन्तयत्+च (दीर्घः,श्चुत्वम्)। महद्भोज्यम्=महत्+भोज्यम् (जश्त्वम्)।

**अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम्।**
**सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते॥2॥**

**प्रसङ्गः**-सुखदुःखानां प्राप्तौ भाग्यमेव मुख्यकारणमित्याह-

**अन्वयः**-अथैव देहिनाम् अचिन्तितानि दुःखानि आयान्ति तथा सुखानि अपि, मन्ये अत्र दैवम् अतिरिच्यते।

**व्याख्या** -यथैव=येन प्रकारेणैव, देहिनाम्=शरीरिणाम्, अचिन्तितानि= अविचारितानि, दुःखानि=कष्टानि, आयान्ति=आगच्छन्ति, तथा=तद्वत्, सुखानि अपि =आनन्दा अपि, मन्ये=जानामि, अत्र=अस्मिन् विषये, दैवम्=भाग्यम्, अतिरिच्यते= अतिरिच्य भवति अर्थात् प्रमुखं कारणं भवति।

**सरलार्थः**-यदा शरीरिणाम् अनायासं सुखानि दुःखानि च आगच्छन्ति। तत्र चिन्तनमनावश्यकं भवति, यतोहि जन्मान्तरकृतं कर्म एव तेषां सुखदुःखानां मुख्यं कारणं भवति।

**व्याकरणम्-**

**समासः**-अचिन्तितानि=न चिन्तितानि अचिन्तितानि (नञ् तत्पु.)।

**प्रकृति प्रत्ययः**-देहिनाम्=देह+इनि+आम्। चिन्तितानि=चिन्त्+क्त+जस् (नपुंसकम्)।

**सन्धिः**-यथैवायान्ति=यथा+एव+आयान्ति (वृद्धिः, दीर्घः)। सुखान्यपि= सुखानि+अपि (यण्)।

**मासमेकं नरो याति द्वौ मासौ मृगशूकरौ।**
**अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः॥3॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**-सःायशीलस्य चिन्तनं निरूपयन् प्राह -

**अन्वयः**-नरः एकम् मासम् याति, द्वौ मासौ मृगशूकरौ (यातः) अहिः एकं दिनम् याति, अद्य धनुर्गुणः भक्ष्यः।

**व्याख्या**- नरः=मनुष्यः,एकम्=एकसंख्यम्,मासं=पक्षद्वयम्,याति= गच्छति, मृगशूकरौ=हरिणवराहौ, द्वौ मासौ=मासद्वयं यावत्, यातः इति शेषः, अहिः=सर्पः, एकं=एकसंख्यम्, दिनम्=दिवसं यावत्, याति=गच्छति, अद्य= अस्मिन् दिने, धनुर्गुणः=कार्मुकज्या, भक्ष्यः=भक्षणीयः।

**सरलार्थः**-दीर्घरावो नामा शृगालो मृतान् मृगव्याघ्रशूकरसर्पान् दृष्ट्वा चिन्तयति यत् व्याधमांसं मासमेकं यावत् पर्याप्तं भविष्यति, तथैव मृगशूकरमांसं द्वौ मासौ यावत् यास्यति, सर्पस्य मांसम् एकं दिनं यावत् पर्याप्तम्।अत अद्य तु धनुर्गुण एव भक्षणीयः।

**व्याकरणम्** -

**समासः**-मृगशूकरौ=मृगश्च शूकरश्च इति मृगशूकरौ (द्वन्द्वः)। धनुर्गुणः= धनुषः गुणः इति धनुर्गुणः (ष.तत्पु.)।

**प्रकृति प्रत्ययः**-भक्ष्यः=भक्ष्+ण्यत्।

**सन्धिः**-अहिरेकं=अहिः+एकम् (रुत्वम्)। धनुर्गुणः=धनुः+गुणः (रुत्वम्)। ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि, इत्युक्त्वा तथाऽकरोत्। ततश्छिन्ने स्नायुबन्धने द्रुतम् उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पःात्वं गतः। अतोऽहं ब्रवीमि 'कर्तव्यः सःायो नित्यम्' इत्यादि।

**व्याख्या**- ततः=तस्मात्, अग्रे श्रेष्ठभोजनकारणात्, प्रथमबुभुक्षायाम्= प्रथमक्षुधायाम्, इदम्=पुरः स्थितम्, निःस्वादु=स्वादरहितम्, कोदण्डलग्नं=कार्मुके बद्धम्, स्नायुबन्धनं=आन्त्रनाडीबन्धनम्, खादामि=अद्मि, इत्युक्त्वा=इति कथयित्वा, तथा=स्नायुबन्धनभोजनार्थप्रवृत्तिम्, अकरोत्=चकार। ततः=तदनन्तरम्, स्नायुबन्धने= आन्त्रस्य बन्धने, छिन्ने=त्रुटिते सति, द्रुतम्=सवेगम्, उत्पतितेन=उत्सर्पता, धनुषा= कार्मुकेन, हृदि=हृदयप्रदेशे, निर्भिन्नः=आहतः सः=असौ, श्रृगालः, पःात्वं गतः=मृत्युं प्राप्तः। अतः=अस्मात् कारणात्, अहं=मूषकः, ब्रवीमि=कथयामि, 'कर्तव्यः सःायो नित्यम्' इत्यादि।

**व्याकरणम्** -

**समासः**- प्रथमबुभुक्षायाम्=प्रथमा चाऽसौ बुभुक्षा तस्याम् (कर्मधा.)। कोदण्डलग्नम्=कोदण्डे लग्नम् (स.तत्पु.)। स्नायुबन्धनम्=स्नायोः बन्धनम् (ष.तत्पु.)।

**प्रकृति प्रत्ययः**- छिन्ने = छिद्+क्त+ङि। उत्पतितेन=उत्+पत्+क्त+टा। निर्भिन्नः= निर्+भिद्+क्त। गतः= गम्+क्त।

**सन्धिः**-इत्युक्त्वा=इति+उक्त्वा (यण्)। ततश्छिन्ने=ततः+छिन्ने (सत्वं, श्चुत्वम्)।

**यद्ददाति यदश्नाति तदेव धनिनो धनम्।**
**अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि॥4॥**

**प्रसङ्गः**-कृपणस्य धनमन्यैरुपभुज्यते। इत्याह -

**अन्वयः**-यत् ददाति, यत् अश्नाति तत् एव धनिनः धनम्। अन्ये मृतस्य (धनिनः) दारैः अपि धनैः अपि क्रीडन्ति।

**व्याख्या** -यत्=धनम् ददाति=वितरति, यत्=धनम्, अश्नाति=स्वयं भुङ्क्ते, तदेव = दीयमानमुपभुज्यमानमेव, धनिनः = धनवतः, धनम् = द्रव्यम्, भवति, अन्ये= दारैरपि द्रव्यैरपि, क्रीडन्ति=सुखमनुभवन्ति।

**सरलार्थः**-धनिकस्य धनं तदेव भवति यत् दीयते आहोस्वित् स्वयमेव उपभुज्यते। अन्यत् सःितं धनं तस्य न भवति, यतोहि मृतस्य तस्य कलत्रेण धनैश्च अन्ये क्रीडन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्-**

**प्रकृति प्रत्ययः-**मृतस्य=मृ+क्त+ङस् (जश्त्वम्) दारैरपि=दारैः+अपि (रुत्वम्)।

किःा - **यद्दासि विशिष्टेभ्यो यच्चाश्नासि दिने-दिने।**
**तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि॥5॥**

**प्रसङ्गः-**पूर्वोक्तः।

**अन्वयः-**दिने-दिने विशिष्टेभ्यः यत् ददासि यत् च अश्नासि, अहम् तत् वित्तम् ते मन्ये, शेषम् कस्य अपि रक्षसि।

**व्याख्या-** दिने-दिने=प्रतिदिनम्, विशिष्टेभ्यः=सुपात्रेभ्यः, यत्=धनम्, ददासि =वितरसि, यत् च=यत् च द्रव्यम्, अश्नासि=स्वस्मै व्ययं नयसि, अहं=कविः तत् वित्तम्= दीयमानमुपभुज्यमानं धनम्, ते=तव, मन्ये=जानामि, शेषम्= दानाशनादतिरिक्तम्, कस्यापि=अन्यस्य जनस्य, रक्षसि=सिःनोषि।

**सरलार्थः-**यद् धनं नित्यं सुपात्रेभ्यो दीयते स्वस्मै उपभुज्यते तद्धनमेव। धनिकस्य, तदतिरिक्तं धनं तु धनिकः परेभ्यः सिःनोति।

**व्याकरणम्-**

**प्रकृति प्रत्ययः-**यच्चाश्नासि=यत्+च+अश्नासि (श्चुत्वं, दीर्घः)कस्यापि =कस्य+अपि (दीर्घः)।

**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम्।**
**आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः॥6॥**

**प्रसङ्गः-**विद्वज्जनानां विशिष्टलक्षणानि प्रतिपादयन् प्राह -

**अन्वयः-**पण्डितबुद्धयः नराः अप्राप्यम् न अभिवाञ्छन्ति, नष्टं शोचितुं न इच्छन्ति, आपत्सु अपि न मुह्यन्ति।

**व्याख्या -**पण्डितबुद्धयः-धीमन्तः, नराः=जनाः, अप्राप्यम्=अलभ्यम्, न अभिवाञ्छन्ति=न इच्छन्ति, नष्टम्= विनाशं प्राप्तम्, शोचितुम्=दुःखमनुभवितुम्, न इच्छन्ति=न वाञ्छन्ति, आपत्सु अपि=विपत्तिषु चापि, न मुह्यन्ति=मोहं न प्राप्नुवन्ति।

**सरलार्थः-**धीमतां त्रीणि विशिष्टलक्षणानि वर्णितानि सन्ति यत् ते कदापि अलभ्यं वस्तु नेच्छन्ति, कस्मिन्नपि वस्तुनि नष्टे सति ते दुःखिनो न भवन्ति, विपत्तिषु ते मोहिता न भवन्ति।

**व्याकरणम् -**समासः-पण्डितबुद्धयः=पण्डिता बुद्धिः येषां ते पण्डितबुद्धयः (बहुव्रीहिः)। अप्राप्यम्=न प्राप्यम् (नञ् तत्पु.)।

**प्रकृति प्रत्ययः-**प्राप्यम्=प्र+आप्+ण्यत्। शोचितुम्=शुच्+तुमुन्।

**सन्धिः-**नाप्राप्यम्=न+अप्राप्यम् (दीर्घः)। नेच्छन्ति=न+इच्छन्ति(गुणः)। आपत्स्वपि=आपत्सु+अपि (यण्)।

**शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान्।**
**सुचिन्तितःौषधमातुराणां न नाममात्रेण करोत्यरोगम्॥7॥**

**प्रसङ्गः-**'स एव विद्वान् य शास्त्राणि अधीत्य सशास्त्रज्ञानं जीवनं यापयति' इत्याह -

**अन्वयः-**शास्त्राणि अधीत्य अपि मूर्खाः भवन्ति, यः तु पुरुषः क्रियावान् स विद्वान्, आतुराणां सुचिन्तितम् अपि औषधं नाममात्रेण अरोगं न करोति।

**व्याख्या-**शास्त्राणि=श्रुत्यादीनि, अधीत्यापि=पठित्वापि, मूर्खाः=बालिशाः, भवन्ति=विद्यन्ते, यस्तु पुरुषः=यश्च जनः, क्रियावान्=कर्मानुष्ठाता, सः विद्वान्= पण्डितः। आतुराणां=रोगिणाम्, सुचिन्तितम् अपि=सुविचारितमपि, औषधम्= भेषजम्, नाममात्रेण=अभिधानमात्रेण, अरोगं=रोगनाशनं, न करोति=न विदधाति।

**सरलार्थः-**शास्त्राणाम् अध्ययनेनैव जनो विद्वत्तां न प्राप्नोति, विद्वान् तु स एव वर्तते यः तेषां सिद्धान्तान् पालयति। यथा रोगिणो रुग्णता औषधभक्षणेन दूरी भवति न च तस्य नाममात्रेण।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्** -सुचिन्तितम्=सुष्ठु चिन्तितम् (तत्पु.) ।

**प्रकृति प्रत्ययः**-अधीत्य=अधि+इ+ल्यप्। क्रियावान्=क्रिया+मतुप्। चिन्तितम् =चिन्त्+क्त।

**सन्धिः**-शास्त्राण्यधीत्यापि=शास्त्राणि+अधीत्य+अपि(यण् दीर्घः)। करोत्यरोगम् =करोति+अरोगम् (यण्)।

**न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि।**
**अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥8॥**

**प्रसङ्गः**-सदाचरणानाम् अभावे शास्त्राध्ययनेन न किमपि प्रयोजनम् इत्याह-

**अन्वयः**-विज्ञानविधिः अध्यवसायभीरोः स्वल्पमपि गुणं न करोति, हि इह हस्ततलस्थितः अपि प्रदीपः अन्धस्य अर्थम् प्रकाशयति किम् ॥

**व्याख्या**-विज्ञानविधिः=शास्त्रविधानम्, अध्यवसायभीरोः=आचरणशून्य-जनस्य, स्वल्पमपि=मनाग् अपि, गुणम्=उपकारम्, न करोति-न विदधाति, हि=यत्, इह=अस्मिन् लोके, हस्ततलस्थितः अपि करतलस्थोऽपि, प्रदीपः= दीपकः, अन्धस्य= दर्शनशक्तिशून्यस्य, अर्थम्=वस्तु, प्रकाशयति किम्=द्योतयति किम्?

**सरलार्थः**-य उद्योगशून्यः तस्य शास्त्रविधानम् अल्पमपि उपकारं न करोति, यथा हस्तस्थोऽपि-दीपकः अन्धस्य पदार्थं न प्रकाशयति।

**व्याकरणम्** -समासः-अध्यवसायभीरोः=अध्यवसायात् भीरुःतस्य (पंचमी तत्पु.)। हस्ततलस्थितः=हस्तस्य तले स्थितः (ष.स.तत्पु.)।

**प्रकृति प्रत्ययः**-विधिः=वि+धा+कि। स्थितः=स्था+क्त।

**सन्धिः**- स्वल्पमप्यध्यवसायभीरोः = स्वल्पमपि+अध्यवसायभीरोः (यण्)। प्रकाशयत्यर्थम्=प्रकाशयति+ अर्थम् (यण्)।

**तदत्र सखे दशातिशेषेण शान्तिः करणीया, एतदप्यतिकष्टं त्वया न मन्तव्यम्।**

**व्याख्या**- तत्=तस्मात्, सखे!=मित्र, अत्र=इह, मम गृहे, दशातिशेषेण= अवस्थायाः शेषभागेन, शान्तिः=सुखं, करणीया=विधातव्या, त्वया=भवता, एतदपि= एषा स्थितिः मम गृहे निवासरूपा, अतिकष्टम्=अतिदुःखम्, न मन्तव्यम्=न ज्ञातव्यम्।

**सुखमापतितं सेव्यं दुःखमापतितं तथा।**
**चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥9॥**

**प्रसङ्गः**-जीवने कदाचित् सुखानि कदाचित् दुःखानि च आगच्छन्ति, अतो दुःखागते सति न चिन्तयेत्। इत्याह-

**अन्वयः**-आपतितम् सुखम् सेव्यम् तथा आपतितम् दुःखम् (यतः) दुःखानि च सुखानि च चक्रवत् परिवर्तन्ते।

**व्याख्या**-आपतितम्=समुपस्थितम्, सुखम्=आनन्दः, सेव्यम्=अनुभवनीयम्, तथा=तेन प्रकारेण, आपतितम्=उपस्थितम्, दुःखम्=कष्टम्, यतः, दुःखानि च =कष्टानि च, सुखानि च=आनन्दाश्च, चक्रवत्= शकटचक्रमिव, परिवर्तन्ते=आयान्ति यान्ति च।

**सरलार्थः**-मानवजीवने यथा सुखमायाति तथैव दुःखमपि। अतः आयान्तं सुखं दृष्ट्वा न प्रसीदेत्, न च दुःखं दृष्ट्वा हीनत्वमापद्येत्। यतोहि सुखानि दुःखानि च क्रमशः चक्रगतिरिव परिवर्तन्ते।

**व्याकरणम्-**

**प्रकृति प्रत्ययः**-आपतितम्=आ+पत्+क्त। सेव्यं=सेव्+ण्यत्।

**निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः।**
**सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥10॥**

**प्रसङ्गः**-सम्पत्तय उद्योगिनं नरं समया आगच्छन्ति, इत्याह -



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**-मण्डूकाः निपानमिव, अण्डजाः पूर्णम् सरः इव, सर्वसम्पदः विवशाः सोद्योगं नरम् आयान्ति।

**व्याख्या**-मण्डूकाः=भेकाः निपानमिव=जलाशयमिव अण्डजाः=पक्षिणः, पूर्णम्=जलभरितम्, सरः=सरोवरम्, इव=यथा, सर्वसम्पदः=अखिलसम्पत्तयः, विवशाः= अधीनाः सत्यः, सोद्योगम्=उद्योगिनम्, नरम्=मानवम्, आयान्ति= आगच्छन्ति।

**सरलार्थः**-सर्वाः सम्पत्तयः विवशीभूताः सत्यः उद्यमिनं पुरुषम् आगच्छन्ति यथा मण्डूकाः तडागम्, पक्षिणः जलपूर्णं सरोवरं गच्छन्ति।

**व्याकरणम् -**

**समासः**-सोद्योगं=उद्योगेन सहितः सोद्योगः तम् (तृ.तत्पु.)। सर्वसम्पदः= सर्वाः च ताः सम्पदः सर्वसम्पदः (कर्मधारयः)।

**प्रकृति प्रत्ययः**- उद्योगः=उत्+युज्+घञ्। निपानम्=नि+पा+ल्युट्।

**सन्धिः**-इवाण्डजाः=इव+अण्डजाः(दीर्घः)सोद्योगम्=स+उद्योगम् (गुणः)।

**विनाऽप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं,**
**समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः।**
**स्वभावोद्भूतां गुणसमुदयाऽवाप्तिविषयां,**
**द्युतिं सैंहीं श्वा किं धृतकनकमालोऽपि लभते॥11॥**

**प्रसङ्गः**-उच्चपदम् उन्नतिं च प्राप्त्यर्थं धनस्य आवश्यकता नास्तीत्याह-

**अन्वयः**-वीरः अर्थैः विना अपि बहुमानोन्नतिपदम् याति। अर्थैः समायुक्तोऽपि कृपणः परिभवपदम् याति। श्वा धृतकनकमालोऽपि स्वभावात् उद्भूताम्। गुण-समुदयाऽवाप्तिविषयाम् सैंहीम् द्युतिम् लभते किम्?

**व्याख्या**-वीरः=शूरः, अर्थैः=धनैः, विनाऽपि=ऋतेऽपि, बहुमानोन्नतिपदम्=अधिकसम्मानाभ्युदयस्थानम्, याति=गच्छति। अर्थैः=धनैः, समायुक्तोऽपि= संयुक्तोऽपि, परिभवपदम्=अनादरस्थानम्, याति=गच्छति, श्वा=कुक्कुरः, धृतकनकमालोऽपि=परिहितस्वर्णस्रगपि, स्वभावात्=निसर्गात्, उद्भूताम्=सिंहसम्बन्धिनीम्, द्युतिम्=कान्तिम्, लभते किम्=प्राप्नोति किम्?

**सरलार्थः**-वीरपुरुषः धनं विनापि उच्चपदं सम्मानं च प्राप्नोति, परं कृपणः धनसहितोऽपि अनादरयोग्यो भवति। यथा कुक्कुरः स्वर्णमालां धारयित्वाऽपि सिंहस्य कान्तिं प्राप्तुमसमर्थो भवति।

**व्याकरणम्-**

**समासः**-परिभवपदं=परिभवस्य पदं (ष.तत्पु.)। धृतकनकमालः=धृत कनकमाला येन सः (बहुव्रीहि) ।

**प्रकृति प्रत्ययः**-उन्नतिः=उत्+नम्+क्तिन्। समायुक्तः= सम्+आ+युज्+ क्त। अवाप्तिः=अव+आप्+क्तिन्। उद्भूताम्=उत्+भू+क्त+टाप्+अम्।

**सन्धिः**-विनाप्यर्थैः=विना+अपि+अर्थैः (दीर्घः, यण्) बहुमानोन्नतिपदं= बहुमान+उन्नतिपदम् (गुणः)। समायुक्तोऽप्यर्थैः=समायुक्तः+ अपि+अर्थैः (उत्वम् गुणः पूर्वरूपम्, यण्)।

**उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।**
**शूरं कृतज्ञं दृढसौहृदश्च लक्ष्मीः स्वयं याति निवासहेतोः॥12॥**

**प्रसङ्गः**-लक्ष्मीः कीदृशं पुरुषं वृणोति इत्याह-

**अन्वयः**-लक्ष्मीः निवासहेतोः स्वयम् उत्साहसम्पन्नम्, अदीर्घसूत्रम्, क्रियाविधिज्ञम्, व्यसनेषु असक्तम्, शूरम्, कृतज्ञम्, दृढसौहृदम्, 'पुरुषम्' याति।

**व्याख्या**-लक्ष्मीः=श्रीः, निवासहेतोः=निवासस्य कृते, स्वयम्=आत्मना, उत्साहसम्पन्नम्=उद्योगिनम्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अदीर्घसूत्रम्=शीघ्रकारिणम्, क्रियाविधिज्ञम्=कर्मविधानवेत्तारम्, व्यसनेषु=दुराचरणेषु, असक्तम्=अनासक्तम्, शूरम्=वीरम्, कृतज्ञम्= अनुगृहीतम्, दृढसौहृदम्=स्थिरमैत्रीयुक्तम्, पुरुषम्, याति=गच्छति।

**सरलार्थः-**लोके लक्ष्मीं प्राप्त्यर्थं मनुष्ये एते सप्तगुणा अनिवार्यतो भवितव्याः। स उत्साही, तत्परः, कार्यविधानस्य ज्ञाता, दुर्व्यसनेषु अनासक्तः, शूरः, कृतज्ञः स्थिरमैत्रीकर्ता च भवेत्।

**व्याकरणम् -**

**समासः-**उत्साहसम्पन्नः=उत्साहेन सम्पन्नः (तृ.तत्पु.)। निवासहेतोः= निवासस्य हेतुः तस्मात् (ष.तत्पु.)।

**प्रकृति प्रत्ययः-**उत्साहः=उत्+सह्+घञ्। निवासः=नि+वस्+घञ्। सम्पन्नः =सम्+पद्+क्त।

**संधि-**व्यसनेष्वसक्तम्=व्यसनेषु+असक्तम्(यण्)। दृढसौहृदःा=दृढसौहृदम् +च (परसवर्णः)।

**धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि।**
**करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम्॥13॥**

**प्रसङ्गः-**'धनं कदाचिद् याति कदाचिद् आयाति च, अतो धनस्य विषये शोको न करणीयः' इत्याह-

**अन्वयः-**धनवान् इति ते मदः 'आसीत्' गतविभवः विषादम् किम् उपयासि, हि मनुष्याणाम् पातोत्पाताः करनिहतकन्दुकसमाः 'भवन्ति'।

**व्याख्या-**धनवान्=धनिकः, इति=एवं , ते=तव, मदः=गर्वः, 'आसीत्', गतविभवः=नष्टधनः सन्, विषादम्=दुःखम्, किं=किमर्थम्, उपयासि=प्राप्नोषि, हि= यतः, मनुष्याणाम्=जनानाम्, पातोत्पाताः=उन्नत्यवनतयः, करनिहतकन्दुकसमाः= हस्तताडितकन्दुकतुल्याः, भवन्तीति शेषः।

**सरलार्थः-**'धनवानस्मि' इति गर्वो न करणीयः, अन्यथा धननाशे सति स विषादं प्राप्नोति। मनुष्याणाम् उन्नत्यवनतयः करताडितकन्दुकसदृशा भवन्ति यथा कन्दुकः भूमौ पतति, पुनः ऊर्ध्वं गच्छति तथैव कदाचिद् उन्नतिः कदाचिद् अवनतिः च भवति।

**व्याकरणम् -**

**समासः-**गतविभवः=गतो विभवो यस्य सः गतविभवः (बहुब्रीहिः)। पातोत्पाताः=पाताश्च उत्पाताश्च इति पातोत्पाताः (द्वन्द्वः)।

**प्रकृति प्रत्ययः-**धनवान्=धन+मतुप्। पाताः=पत्+घञ्+जस्। विषादः= वि+सद्+घञ्।

**सन्धिः-**पातोत्पाताः=पात+उत्पाताः (गुणः)। मदस्ते=मदः+ते (सत्वम्)।

**वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता।**
**गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ॥14॥**

**प्रसङ्गः-**जीविका भाग्याधीना अतो जीविकायै चिन्ता न करणीया। इत्याह-

**अन्वयः-**वृत्त्यर्थं न अतिचेष्टेत हि सा धात्रा एव निर्मिता। जन्तौ गर्भात् उत्पतिते मातुः स्तनौ प्रस्रवतः।

**व्याख्या-**वृत्त्यर्थम्=जीविकायै, न=नहि, अतिचेष्टेत=न अधिकम् ईहेत, हि =यतः, सा=जीविका, धात्रा=विधात्रा, एव=अवधारणार्थे, निर्मिता=पूर्वमेव स्थापिता। जन्तौ=जीवे, गर्भात्=भ्रूणात्, उत्पतिते=बहिरागते सति, मातुः=जनन्याः, स्तनौ=कुचौ, प्रस्रवतः=दुग्धं क्षरतः।

**सरलार्थः-**कविः कथयति यत् जीविकाविषये अधिकं न चिन्तयेत्, यतोहि सा तु विधात्रा पूर्वमेव स्थापितास्ति। यथा शिशौ बहिरायाते सति मातुः स्तनौ दुग्धं क्षरतः।

**व्याकरणम् -**

**समासः-**वृत्त्यर्थम्=वृत्यै इदम् इति वृत्त्यर्थम्।(च.तत्पु.)।

**प्रकृति प्रत्ययः-**वृत्तिः=वृत्+क्तिन्। धात्रा=धा+तृच्+टा। उत्पतिते =उत् +पत्+क्त+ङि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धिः**-वृत्त्यर्थम्=वृत्ति+अर्थम् (यण्)। धात्रैव=धात्रा+एव (वृद्धिः)। नातिचेष्टेत=न+अतिचेष्टेत (दीर्घः)।

**येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।**
**मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति॥15॥**

**प्रसङ्गः**-'विधाता एव स्वेच्छानुसारं जीविकां ददाति' इत्याह -

**अन्वयः**-येन हंसाः शुक्लीकृताः, शुकाश्च हरितीकृताः, येन मयूराः चित्रिताः, सः ते वृत्तिम् विधास्यति।

**व्याख्या**-येन=विधात्रा, हंसाः=मरालाः, शुक्लीकृताः=शुक्लवर्णाः कृताः, शुकाश्च=कीराश्च, हरितीकृताः= हरिद्वर्णाः कृताः, येन=धात्रा, मयूराः=बर्हिणः, चित्रिताः=विचित्रवर्णाः कृताः, येन=धात्रा, मयूराः=बर्हिणः, चित्रिताः= विचित्रवर्णाः कृताः, सः=असौ, विधाता इत्यर्थः, ते=तव, वृत्तिं=जीविकाम्, विधास्यति= समुपस्थापयिष्यति।

**सरलार्थः**-विधात्रा हंसः शुक्लवर्णः कृतः, शुकश्च हरिद्वर्णः कृतः, मयूरश्च विचित्रवर्णः कृतः, अनेन स्पष्टं भवति यत् विधाता एव जीविकां निर्धारयति।

**व्याकरणम् -**

**प्रकृति प्रत्ययः**-शुक्लीकृताः=शुक्ल+च्वि+कृ+क्त+जस्। वृत्तिम्=वृत्+ क्तिन्+अम्।

**सन्धिः**-शुकाश्च=शुकाः+च (सत्वं,श्चुत्वम्)। मयूराश्चित्रिताः=मयूराः+ चित्रिताः (सत्वं,श्चुत्वम्)।

**जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु।**
**मोहयन्ति च सम्पत्तौ कथमर्थाः सुखावहाः॥16॥**

**प्रसङ्गः**-अर्थः कदापि सुखं न ददाति। इत्याह-

**अन्वयः**-अर्थाः अर्जने, दुःखं जनयन्ति, विपत्तिषु तापयन्ति, सम्पत्तौ च मोहयन्ति, अतः कथं सुखावहाः।

**व्याख्या** -अर्थाः=धनानि, अर्जने=उपार्जने, दुःखं=कष्टं, जनयन्ति= उत्पादयन्ति, विपत्तिषु=आपत्सु, तापयन्ति= सन्तापं ददति, सम्पत्तौ च= समृद्धौ च मोहयन्ति=अविवेकं जनयन्ति, अतः, कथं=केन प्रकारेण, सुखावहाः= सुखोत्पादकाः, भवन्तीति शेषः।

**सरलार्थः**-धनस्योपार्जने अनेकानि कष्टानि आगच्छन्ति, तत् धनं विपत्तिषु सन्तापयति, यतोहि विपत्तिकाले तस्य सदुपयोगः न स्यात् तर्हि कष्टकरमेव। समृद्धौ अपि धनं मोहं जनयति। अत अर्थो न सुखावहः।

**व्याकरणम्** -सुखावहाः=सुखम् आवहन्ति इति सुखावहाः (तत्पु.)।

**प्रकृति प्रत्ययः**-अर्जने=अर्ज्+ल्युट्+ङि। विपत्तिषु=वि+पद्+क्तिन्+सुप्।

**सन्धिः**-जनयन्त्यर्जने=जनयन्ति+अर्जने(यण्)।सुखावहाः=सुख+आवहाः। (दीर्घः)।

**धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।**
**प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्॥17॥**

**प्रसङ्गः**-धर्मार्थं धनस्येच्छा अनुचिता' इत्याह-

**अन्वयः**-यस्य धर्मार्थं वित्तेहा तस्य निरीहता वरम्, हि पङ्कस्य प्रक्षालनात्, दूरात् अस्पर्शनम् वरम्।

**व्याख्या**-यस्य=जनस्य,धर्मार्थम्=पुण्याय,वित्तेहा=धनचेष्टा,तस्य=धनस्य, निरीहता=निश्चेष्टत्वम्, वरम्= श्रेष्ठम्, हि=यतः, पङ्कस्य=कर्दमस्य, प्रक्षालनात्= प्रमार्जनात्, दूरात्=दूरतः, अस्पर्शनम्=अनामर्शम्, एव, वरम्=श्रेष्ठम्।

**सरलार्थः**-यदि कोऽपि जनो धर्मं निमित्तं कृत्वा धनप्राप्तिम् इच्छेत् तर्हि तद्धनस्य निष्चेष्टत्वमेव श्रेष्ठम्। यथा प्रक्षालयितुं वस्त्रोपरि पङ्कस्य लेपनम् इच्छेत्।

**व्याकरणम्-**

**समासः**-वित्तेहा=वित्तस्य ईहा (ष.तत्पु.)। धर्मार्थं=धर्माय इदम् इति धर्मार्थम् (च.तत्पु.)।

**प्रकृति प्रत्ययः**- प्रक्षालनात्= प्र+क्षाल्+ल्युट्+ङसि। अस्पर्शनम् = न + स्पृश् +ल्युट्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्धिः**-प्रक्षालनाद्धि=प्रक्षालनात्+हि (पूर्वसवर्णः)। धर्मार्थम्=धर्म+अर्थम् (दीर्घः)। वित्तेहा=वित्त+ईहा (गुणः)।

**यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि।**
**भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान्॥18॥**

**प्रसङ्गः**-धनवान् कदापि सुखेन न जीवति, स सदा प्रताड्यते। इत्याह-

**अन्वयः**-यथा पक्षिभिः=आकाशे, श्वापदैः भुवि, मत्स्यैः सलिले, आमिषं भक्ष्यते तथा वित्तवान् सर्वत्र भक्ष्यते।

**व्याख्या**- यथा=येन प्रकारेण, पक्षिभिः=खगैः, आकाशे=गगने, श्वापदैः= हिंसकैः जन्तुभिः, भुवि=पृथिव्याम्, मत्स्यैः=मकरादिभिः, सलिले=जले, आमिषम्= मांसम्, भक्ष्यते=भुज्यते, तथा=तेन प्रकारेण, वित्तवान्=धनवान्, सर्वत्र=सर्वस्मिन् स्थाने, भक्ष्यते=चोरप्रतारकैः प्रताड्यते।

**सरलार्थः**-कविः कथयति यत् धनवान् सर्वस्मिन् स्थाने ताड्यते। मांसं कुत्रापि स्थापयेत् यथा आकाशे तं खगाः खादन्ति, पृथिव्यां तं हिंसकाः जन्तवः भक्षयन्ति जले मकरादिभिः। तथैव धनवान् आमिषमिव भक्ष्यते।

**व्याकरणम् -**

**प्रकृति प्रत्ययः**-वित्तवान्=वित्त+मतुप्। सर्वत्र=सर्व+त्रल्।

**सन्धिः**-ह्यामिषम्=हि+आमिषम्(यण्)। श्वापदैर्भुवि=श्वापदैः+भुवि (रुत्वम्)।

**राजतः सलिलादग्नेश्चोरतः स्वजन्मादपि।**
**भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव॥19॥**

**प्रसङ्गः**- 'धनिकः सर्वदा भयग्रस्तो भवति' इत्याह-

**अन्वयः**-मृत्योः प्राणभृताम् इव अर्थवताम् राजतः, सलिलात्, अग्नेः चोरतः, स्वजनात् अपि नित्यम् भयम् 'भवति' इति शेषः।

**व्याख्या** -मृत्योः=मरणात्, प्राणभृताम्=जीवानाम्, इव यथा, अर्थवताम्= धनिकानाम्, राजतः=नृपात्, सलिलात्=जलात्, अग्नेः=अनलात्, चोरतः=चोरात्, स्वजनात्=बन्धुवर्गात्, अपि, नित्यम्=सततम्, भयम्=भीतिः, भवतीति शेषः।

**सरलार्थः**-सामान्यजनस्तु केवलं मृत्योः बिभेति, परन्तु धनिकः मृत्योरतिरिक्तेभ्यः भयेभ्योऽपि बिभेति। स नृपात् जलात् अग्नेः चोरात् बन्धुवर्गाच्चापि बिभेति।

**समासः**-स्वजनात्=स्वस्य जनः स्वजनः तस्मात् (ष.तत्पु.)।

**प्रकृति प्रत्ययः**-अर्थवताम्=अर्थ+मतुप्+आम्। चोरतः=चोर+तसिल्।

**सन्धिः**-सलिलादग्नेश्चोरतः=सलिलात्+अग्नेः+चोरतः(जश्त्वं,सत्वं, श्चुत्वम्)।

**जन्मनि क्लेशबहुले किन्नु दुःखमतः परम्।**
**इच्छासम्पद् यतो नास्ति यच्चेच्छा न निवर्तते॥20॥**

**प्रसङ्गः**-मानवजीवनं दुःखमयमस्ति। इत्याह-

**अन्वयः**-यतः क्लेशबहुले जन्मनि इच्छासम्पत् न अस्ति। यत् च इच्छा न निवर्तते अतः परं किन्नु दुःखम्।

**व्याख्या** -यतः=यस्मात् कारणात्, क्लेशबहुले=कष्टाधिक्ये,जन्मनि=जीवने, इच्छासम्पत्=इच्छानुसारं धनं, नास्ति=न वर्तते। यत् च इच्छा= वाञ्छा, न निवर्तते=निवृत्ता न भवति, अतः=अस्मात्, परं=अधिकं, दुःखं=कष्टं, किन्नु=किं भवेत्।

**सरलार्थः**-मानवजीवने दुःखानामाधिक्यं वर्तते। अस्मिन् कष्टपूर्णे जीवने इच्छानुसारं सम्पत्तिः न प्राप्यते, न च इच्छाया निवृत्ति र्भवति। अनेन स्पष्टीभवति यत् दुःखानां कारणं तु प्राणिन इच्छासमूहो वर्तते।

**व्याकरणम्-**

**समासः**-क्लेशबहुले क्लेशानां बहुलं तस्मिन् (ष.तत्पु.)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रकृति प्रत्ययः**-क्लेशः=क्लिश्+घञ्। अतः=इदम्+तसिल्।

**संधि-विच्छेदः**-यच्चेच्छा=यत्+च+इच्छा (श्चुत्वम्, गुणः)। किन्नु= किम्+नु (परसवर्णः)।

**धनं तावदसुलभं लब्धं कृच्छ्रे-ण पाल्यते।**
**लब्धनाशो मया मृत्युस्तस्मादेतन्न चिन्तयेत्॥21॥**

**प्रसङ्गः**-धनस्य विषये चिन्ता नैव करणीया' इत्याह -

**अन्वयः**-तावत् धनम् असुलभम्, लब्धं कृच्छ्रे-ण पाल्यते, लब्धनाशः मृत्युः यथा तस्मात् एतत् न चिन्तयेत्।

**व्याख्या** -तावत्=प्रथमं तु, धनम्=वित्तम्, असुलभम्=दुर्लभम्, लब्धम्= प्राप्तम्, कृच्छ्रे-ण=कष्टेन, पाल्यते= रक्ष्यते, लब्धनाशः=प्राप्तधनस्य, क्षतिः, मृत्युर्यथा= मरणमिव, तस्मात्=तस्मात् कारणात्, एतत्=इदं धनम्, न चिन्तयेत्= नेच्छेत्।

**सरलार्थः**-धनस्य विषये न चिन्तनीयम्, यतोहि धनं अतिकष्टेन प्राप्यते, प्राप्तेरनन्तरं तस्य रक्षणमतिकठिनम्। प्राप्तधनस्य विनाशो यदि भवति तर्हि मृत्युरिव दुःखं भवति।

**व्याकरणम्** -असुलभम्=न सुलभम् (नञ्, तत्पु.)। लब्धनाशः=लब्धस्य नाशः लब्धनाशः(ष.तत्पु.)।

**प्रकृति प्रत्ययः**-लब्धं=लभ्+क्त+अम्। सुलभम्=सु+लभ्+अच्।

**सन्धिः**-मृत्युस्तस्मादेतन्न=मृत्युः+तस्मात्+एतत्+न (सत्वं, जश्त्वं, अनुनासिकः)।

**सा तृष्णा चेत् परित्यक्ता को दरिद्रः क ईश्वरः।**
**तस्याश्चेत् प्रसरो दत्तो दास्यःा शिरसि स्थितम्॥22॥**

**प्रसङ्गः**-तृष्णाधिक्येन मानवः तृष्णानां दासो भवति। इत्याह-

**अन्वयः**-चेत् सा तृष्णा परित्यक्ता कः दरिद्रः कः ईश्वरः। तस्याः प्रसरः दत्तः चेत् दास्यम् शिरसि स्थितम्।

**व्याख्या**-चेत्=यदि, सा=असौ प्रसिद्धा, तृष्णा=धनपिपासा, त्यक्ता= विलीनीकृता, तर्हि, कः=कतमः, दरिद्रः=निर्धनः, कः ईश्वरः=को नाम धनिकः। तस्याः=धनतृष्णायाः, प्रसरः=वृद्धिः। दत्तः=वितीर्णः, चेत्=तर्हि, दास्यम्= दासत्वम्, शिरसि=मस्तके, स्थितम्=प्राप्तम्।

**सरलार्थः**-यदि सर्वैः तृष्णा परित्यज्यते तर्हि जनेषु दरिद्रधनिकयोः भेदो न द्रक्ष्यते। परन्तु तृष्णाया वृद्धौ सत्याम् मानवः तृष्णानां दासो भवति, परिणामतः स सदैव दुःखी भवति।

**व्याकरणम्** -

**प्रकृति प्रत्ययः**-परित्यक्ता=परि+त्यज्+क्त+टाप्। दत्तः=दा+क्त। दास्यम्=दास+ष्यञ्।

**सन्धिः**-दास्यःा=दास्यम्+च (परसवर्णः)। तस्याश्चेत्=तस्याः+चेत् (सत्वं श्चुत्वम्)।

**यद् यदेव हि वाञ्छेत् ततो वाञ्छा प्रवर्तते।**
**प्राप्त एवाऽर्थतः सोऽर्थो यतो वाञ्छा निवर्तते॥23॥**

**प्रसङ्गः**-इच्छापूर्त्यनन्तरं पुन इच्छा उत्तरोत्तरं प्रवृत्ता भवति'। इत्याह-

**अन्वयः**-यद् यद् एव वाञ्छेत् ततः वाञ्छा प्रवर्तते, यतः वाञ्छा निवर्तते सः अर्थः अर्थतः प्राप्तः एव।

**व्याख्या**-यत् यत् एव=यद् यद् वस्तु, वाञ्छेत्=इच्छेत्, ततः=तदनन्तरम्, वाञ्छा=इच्छा,प्रवर्तते=प्रवृत्ता भवति, यतः=यस्मात् पदार्थात्, वाञ्छा=इच्छा, निवर्तते =निवृत्ता भवति, स अर्थः=स पदार्थः, अर्थतः=वस्तुतः, प्राप्त एव=आसादित एव।

**सरलार्थः**-एकैव इच्छा अपरेच्छाम् उत्पादयति। मानवस्य या वाञ्छा भवति सा तु वस्तुतः पूरिता भवति, परं तस्याःपूर्त्यनन्तरं पुनः इच्छा प्रवृत्ता भवति। अतः यावत् इच्छा निवृत्ता न भवति तावत् सुखं प्राप्तुं न शक्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्** -**प्रकृति-प्रत्ययः**-प्राप्तः=प्र+आप्+क्त।

**सन्धिः**-एवार्थतः=एव+अर्थतः (दीर्घः)। सोऽर्थः=सः+अर्थ (उत्वं-गुणः-पूर्वरूपम्)। यदेव=यत्+एव (जश्त्वम्)।

**आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः।**
**परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम्॥24॥**

**प्रसङ्गः**-महात्मनः जनसामान्यस्य च स्वभावे भेदं प्रतिपादयन् प्राह -

**अन्वयः**-महात्मनाम् प्रणयाः आमरणान्ताः कोपाः तत्क्षणभङ्गुराः परित्यागाः निःसङ्गा भवन्ति।

**व्याख्या**- महात्मनाम्=महापुरुषाणाम्, प्रणयाः=स्नेहाः, आमरणान्ताः= मृत्युपर्यन्तस्थायिनः, कोपाः=क्रोधाः, तत्क्षणभङ्गुराः=शीघ्रमेव विनष्टाः, परित्यागाः= दानदयादयः, निःसङ्गाः=आसक्तिरहिताः, भवन्ति=विद्यन्ते, हि=एतन् निश्चयम्।

**सरलार्थः**-महापुरुषाणां चित्तम् अत्युदात्तं भवति। तेषां स्नेहो मरणं यावत् स्थायी भवति, क्रोधः शीघ्रं विनष्टः, दानादय आसक्तिरहिता भवन्ति।

**व्याकरणम्**-

**समासः**-तत्क्षणभङ्गुराः=तत् च क्षणं तत्क्षणं, तत्क्षणे भङ्गुराः, तत्क्षणभङ्गुराः (कर्मधा., स.तत्पु.)।

**प्रकृति प्रत्ययः**-प्रणयः=प्र+नी+अच्। कोपः=कुप्+घञ्। परित्यागः=परि +त्यज्+घञ्।

**सन्धिः**-परित्यागाश्च=परित्यागाः+च (सत्वं, श्चुत्वम्)।

**किं बहुना, विस्रम्भालापैः मयैव सहाऽत्र कालो नीयताम्।**

**व्याख्या** -किं बहुना=किमधिकेन कथनेन, विश्रम्भालापैः=विश्वस्तवचनैः, मयैव=लघुपतनकेनैव, सह=साकं, अत्र=इह, कालः=समयः, नीयताम्=यापयतु।

**सन्त एव सतां नित्यमापदुद्धरणक्षमाः।**
**गजानां पङ्कमग्नानां गजा एव धुरन्धराः॥25॥**

**प्रसङ्गः**- सज्जना एव सज्जनानां कष्टानि दूरीकर्तुं प्रयतन्ते। इत्याह-

**अन्वयः**-सन्तः एव सताम् नित्यम् आपदुद्धरणक्षमाः भवन्ति यथा पङ्कमग्नानाम्, गजानाम् गजा एव धुरन्धरा भवन्ति।

**व्याख्या** -सन्तः=सज्जनाः, एव=अवधारणार्थे, सताम्=सज्जनानाम्, नित्यं =सदा, आपदुद्धरणक्षमाः= विपत्तिनिवारणसमर्थाः भवन्तीति शेषः, यथा, पङ्कमग्नानाम् =कर्दमे पतितनाम्, गजानाम्=करिणाम्, गजाः =करिणः, एव=अवधारणार्थे, धुरन्धराः= धुरीणः, भवन्तीति शेषः।

**सरलार्थः**-सज्जना एव सतां कष्टानि निवारयितुं समर्था भवन्ति, न च दुष्टाः। यथा कर्दमे निपतितानां हस्तिनां हस्तिन एव बहिः कर्तुं समर्था भवन्ति।

**व्याकरणम्**-

**समासः**-पङ्कमग्नानां=पङ्के मग्नः तेषां (स.तत्पु.)। आपदुद्धरणक्षमाः= आपदाम् उद्धरणम् आपदुद्धरणम्, तस्मिन् क्षमाः (ष.तत्पु., स.तत्पु.)।

**प्रकृति प्रत्ययः**-उद्धरणम्=उत्+हृ+ल्युट्।

**सन्धिः**-सन्त एव=सन्तः+एव (रुत्वं, यत्वं लोपः)।

**श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स धन्यः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**यस्यार्थिनो वा शरणागता वा नाशाविभङ्गा विमुखाः प्रयान्ति ॥26॥**

**प्रसङ्गः-**'यः शरणागतान् रक्षति, स सत्पुरुषः'। इत्याह -

**अन्वयः-**यस्य अर्थिनः वा शरणागताः आशाविभङ्गाः, विमुखाः न प्रयान्ति। भुवि मानवानां सः एकः श्लाघ्यः सः उत्तमः सत्पुरुषः सः धन्यः अस्तीति शेषः।

**व्याख्या -**यस्य=जनस्य, अर्थिनः=याचकाः, वा=अथवा, शरणागताः= रक्षायै गृहागताः, आशाविभङ्गाः= अपूरिताभिलाषाः, विमुखाः=पराङ्मुखाः, न प्रयान्ति =न गच्छन्ति। भुवि=पृथिव्याम्। मानवानां=जनानाम्, सः=असौ, पूर्वोक्तो जनः। श्लाघ्यः=प्रशंसनीयः सः=असौ, उत्तमः=उत्कृष्टः, सत्पुरुषः=सज्जनः, सः=पूर्वोक्तः, धन्यः=सफलजन्मा, अस्तीति शेषः।

**सरलार्थः-**यस्य शरणे आगता जना रिक्तहस्ता न गच्छन्ति, धरायां मानवानां मध्ये एव पूजनीयः, धन्यः सत्पुरुषश्चास्ति।

**व्याकरणम् -**

**समासः-**सत्पुरुषः=सच्चाऽसौ पुरुषः सत्पुरुषः (कर्मधा.)। शरणागताः= शरणे आगताः (ष.तत्पु.)।

**प्रकृति प्रत्ययः-**श्लाघ्यः=श्लाघ्+ण्यत्।शरणम्=शृ+ल्युट्। आगताः=आ +गम्+क्त।

**सन्धिः-**यस्यार्थिनः=यस्य+अर्थिनः (दीर्घः)। नाशाविभङ्गाः= न+ आशा-विभङ्गाः (दीर्घः)। शरणागताः= शरण+आगताः (दीर्घः)।

**लोभाद्वाऽथ भयाद्वाऽपि यस्त्यजेच्छरणागतम्।**
**बृह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥27॥**

**प्रसङ्गः-**यो जनः शरणागतं रक्षितुमसामर्थ्यं प्रकटयति, तस्य जीवनं निरर्थकमित्याह -

**अन्वयः-**यः लोभात् अथवा भयात् अपि शरणागतम् त्यजेत्, मनीषिणः तस्य बह्महत्यासमम् पापम् आहुः।

**व्याख्या -**यः=जनः, लोभात्=लोलुपत्वात्, अथवा=वा, भयात्=त्रासात्, अपि, शरणागतम्=रक्षणार्थं गृहप्राप्तं जनम्, त्यजेत्=मुःेत्, तस्य=यः शरणागतं न रक्षति, तस्य, मनीषिणः=विद्वांसः, बृह्महत्यासमम्=विप्रहत्यासदृशम्। पापम्= कल्मशम्, आहुः=कथयन्ति।

**सरलार्थः-**यो जनो यदा स्वस्य रक्षायै कस्यापि जनस्य समीपे गच्छति, लोभात् अथवा भयकारणात् स तं रक्षितुम् असमर्थतां प्रकटयति परित्यजति च। निश्चयेन स बृह्महत्यासदृशं पापं करोति।

**व्याकरणम्-** समासः-शरणागतम्=शरणे आगतम् (स.तत्पु.)। बृह्म-हत्यासम्=बृह्मणः हत्या बृह्महत्या तया समम् बृह्महत्यासमम्। (ष.तत्पु. तृ.तत्पु.)

**प्रकृति प्रत्ययः-**लोभः=लुभ्+घञ्। भयात्=भी+अच्+ङसि। आगतम्= आ+गम्+क्त।

**सन्धिः-**लोभाद्वाऽथ=लोभात्+वा+अथ (जश्त्वं, दीर्घः)।यस्त्यजेच्छरणागतम्=यः+त्यजेत्+शरण+ आगतम् (सत्वं, श्चुत्वं-छत्वं, दीर्घः)।

**औरसं कृतसम्बन्धं तथा वंशकृमागतम्।**
**रक्षकं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥28॥**

**प्रसङ्गः-**मित्रं चतुर्विधं ज्ञेयमित्याह -

**अन्वयः-**औरसम्, कृतसम्बन्धम्, तथा वंशकृमागतम्, व्यसनेभ्यः रक्षकम् एवं मित्रम्, चतुर्विधम्, ज्ञेयम्।

**व्याख्या-**औरसम्=उरसोजातम्, पुत्रादीत्यर्थः, कृतसम्बन्धम्=विहित-सम्पर्कम्, तथा=तेन प्रकारेण, वंशकृमागतम्=कुलपरम्परया प्राप्तम्, व्यसनेभ्यः= कष्टेभ्यः, रक्षकम्=त्रातारम्, एवम्=अनेन प्रकारेण, मित्रम्=सुहृत्, चतुर्विधम्= चतुष्प्रकारकम्, ज्ञेयम्=बोध्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सरलार्थः**-मित्रं चतुष्प्रकारकं भवति, प्रथमम् औरसं मित्रं यथा पुत्रो धनोपार्जने पितुः साहाय्यं करोति अतः स मित्रसमो भवति। तथैव केनाऽपि सह सम्पर्कम् आगते सति तस्य स्वभावम् आधृत्य मैत्री भवति, वंशपरम्परया आपत्सु रक्षणेन चापि मैत्री जायते।

**व्याकरणम्**-समासः-कृतसम्बन्धनम्=कृतः सम्बन्धो येन तम् (बहु.)। वंशक्रमागतम्=वंशस्य क्रमः वंशक्रमः तस्माद् आगतः तम् (ष.पं.तत्पु.)।

**प्रकृति प्रत्ययः**-रक्षकम्=रक्ष्+ण्वुल्+अम्। औरसम्=उरस्+अण्+अम्। कृतम्=कृ+क्त+अम्।

**सन्धिः**-वंशक्रमागतम्=वंशक्रम+आगतम्(दीर्घः)।व्यसनेभ्यश्च= व्यसनेभ्यः +च (सत्वं श्चुत्वम्)।

**तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म। अथ कदाचित् चित्राङ्गनामा मृगः केनाऽपि त्रासितस्तत्राऽऽगत्य मिलितः। तत्पश्चादायान्तं भयहेतुं सम्भाव्य मन्थरो जलं प्रविष्टः, मूषकश्च विवरं गतः, काकोऽपि उड्डीय वृक्षाग्रमारूढः। ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलम्बितः, पश्चात् तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः। मन्थरेणोक्तम्-भद्र मृग ! कुशलं ते? स्वेच्छया उदकाद्याहारोऽनुभूयताम्। अत्रावस्थानेन वनमिदं सनाथीक्रियताम्। चित्राङ्गो ब्रूते-लुब्धकत्रासितोऽहं भवतां शरणमागतः। ततश्च भवद्भिः सह मित्रत्वमिच्छामि, भवन्तश्च अनुकम्पयन्तु मैत्र्येण।**

**व्याख्या**- तदेवम् = अनेन प्रकारेण, ते = मन्थरादयः, स्वेच्छाहारविहारं = यथेष्टभोजनभ्रमणम्, कुर्वाणाः=विदधानाः, सन्तुष्टाः=सन्तोषसहिताः, सुखम्= आनन्दपूर्वकम्, निवसन्ति स्म=न्यवसन्। अथ=अनन्तरम्, कदाचित्=कस्मिंश्चित् काले, चित्राङ्गनामा मृगः=एतन्नामको हरिणः, केनापि=केनचिद् व्याधेन, त्रासितः=भयं नीतः, तत्र=मन्थरनिवासे, आगत्य=समागम्य, मिलितः=सङ्गतोऽभूत्। तत्पश्चात्=तस्य मृगस्य पश्चभागतः, आयान्तम्= आगच्छन्तम्, भयहेतुं=भयस्य (त्रासस्य) कारणम्, सम्भाव्य=निर्धार्य, मन्थरः=कूर्मः, जलं=सलिलम्, प्रविष्टः=अंतर्गतः, मूषकश्च= हिरण्यकश्च, विवरं=बिलम्, गतः=प्रविष्टः, काकोऽपि=वायसोऽपि, उड्डीय= उत्प्लुत्य, वृक्षाग्रं=तरोः शाखाग्रभागम्, आरूढः=अधिष्ठितः। ततः=तदनन्तरम्, लघुपतनकेन=एतन्नामकेन काकेन, सुदूरं=दूरत एव, निरूप्य= याथातथ्येन निरीक्ष्य, भयहेतुः=त्रासस्य कारणम्, न कोऽपि=कश्चिदपि न, अवलम्बितः=आश्रितः, पश्चात्=अनन्तरम्, तद्वचनात्=काकस्य वाक्यात्, आगत्य=समागम्य, पुनः=भूयः, सर्वे=सकलाः, कूर्मादय इत्यर्थः। मिलित्वा=सङ्गम्य, तत्रैव=तस्मिन्नेव स्थले, उपविष्टाः =उपाविशन्। मन्थरेण=कूर्मेण, उक्तं=कथितम्, भद्र मृग!=प्रिय हरिण!, कुशलं ते? =भवान् सकुशलोऽसि? स्वेच्छया=यथेच्छम्, उदकाद्याहारः= जलादिभोजनम्, अनुभूयताम् =गृह्यताम्। अत्र=इह, मम गृहे इत्यर्थः, अवस्थानेन= निवासेन, नवमिदम् =एतद्वनम्, सनाथीक्रियताम्=नाथेन सहितं, विधीयताम्, चित्राङ्गः= एतन्नामा मृगः, ब्रूते =कथयति, लुब्धकत्रासितः=भयं गमितः सन्, अहं=मृगः, भवतां= कूर्मादीनाम्, शरणम्=आत्मनो रक्षार्थम्, आगतः=आयातः। ततश्च=तस्मात् कारणात्, भवद्भिः सह =कूर्मादिभिः साकम्, मित्रत्वं=सख्यम्, इच्छामि=वाञ्छामि, भवन्तश्च= यूयं सर्वे, मैत्र्येण=मैत्रीकरणेन, अनुकम्पयन्तु=अनुगृह्णन्तु।

**व्याकरणम् -**

**समासः**-भयहेतुम्=भयस्य हेतुः भयहेतुः तं भयहेतुं (ष.तत्पु.)। वृक्षाग्रम्=वृक्षस्य अग्रः वृक्षाग्रः तं वृक्षाग्रम् (ष.तत्पु.)। उदकाद्याहारः=उदकम् आदिर्यस्य सः उदकादिः एतादृश आहारः (बहुव्रीहिः)।

**प्रकृति प्रत्ययः**-कुर्वाणाः=कृ+शानच्+जस्। त्रासितः=त्रस्+णिच्+क्त। मिलितः=मिल्+इट्+क्त। निरूप्य=नि+रूप्+ल्यप्। आहारः=आ+हृ+घञ्। मैत्र्येण= मित्र+ष्यञ्+टा।

**सन्धिः**-कोऽप्यवलम्बितः=कः+अपि+अवलम्बितः (उत्वं गुणः पूर्वरूपं, यण्)तत्रैवोपविष्टाः=तत्र+एव+ उपविष्टाः(वृद्धिः,गुणः)। त्रासितस्तत्राऽऽगत्य=त्रासितः +तत्र+आगत्य (सत्वं, दीर्घः)। ततश्च=ततः+च (सत्वं,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्चुत्वम्)।

**हिरण्यको-ऽप्यवदत्-मित्रत्वं तावदस्माभिः सह, अयत्नेन निष्पन्नं भवतः।**

**व्याख्याः**-हिरण्यकः अपि=एतन्नामा मूषकोऽपि, अवदत्=उवाच, मित्रत्वं= सख्यम्, तावत्=तर्हि, अस्माभिः सह=कूर्मादिभिः साकम्, अयत्नेन=यत्नं विनैव, निष्पन्नं=सम्पन्नम्, भवतः=तव, मूषकस्य इति भावः।

**व्याकरणम् -**

**प्रकृति प्रत्ययः**- मित्रत्वम् = मित्र+त्व। यत्नेन= यत्+नङ्+टा। निष्पन्नम्= निस्+पद्+क्त।

**सन्धिः**- हिरण्यकोऽप्यवदत्=हिरण्यकः+अपि+अवदत् (सत्वम्, उत्वं, गुणः पूर्वरूपं, यण्)।

**अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम्।**
**स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम्॥29॥**

**प्रसङ्गः**-स्थानबलस्य उत्कृष्टत्वमत्र प्रतिपादितमस्ति-

**अन्वयः**-जलजन्तूनाम् अम्भांसि, दुर्गनिवासिनाम् दुर्गम्, श्वापदादीनाम् स्वभूमिः, राज्ञाम् सैन्यम् परम् बलम् (अस्ति)।

**व्याख्याः**-जलजन्तूनाम् =जलचराणाम्, अम्भांसि=जलम्, दुर्गनिवासिनाम्= दुर्गे निवसन्ति ये तेषां, 'दुर्गं' = 'किला' इति प्रसिद्धम्, श्वापदादीनां=हिंस्रजन्तूनाम्, स्वभूमिः=निजनिवाससंस्थानम्, राज्ञां=नृपाणाम्, सैन्यं=सेना, परम्=उत्कृष्टम्, बलं= सामर्थ्यम् (भवतीति शेषः)।

**सरलार्थः**-प्राणिनो यत्र निवसन्ति, तत्रैव तेषां बलवत्त्वं दृश्यते। यथा मकरादीनां जलचराणां जले, दुर्गवासिनां दुर्गे, व्याघ्रादीनां हिंस्रजन्तूनां वने राज्ञां च सेनायां बलस्य उत्कृष्टत्वं विलोक्यते।

**व्याकरणम् -समासः**-जलजन्तूनाम्=जले निवसन्ति ये जन्तवः, तेषां जलजन्तूनाम्। स्वभूमिः=स्वस्य भूमि इति। दुर्गनिवासिनाम्=दुर्गे निवसन्ति ये ते दुर्गनिवासिनः, तेषाम्।

**प्रकृति प्रत्ययः**-सैन्यम्=सेना+ष्यञ्। निवासिनः=नि+वस्+णिनि+जस्।

**सन्धिः**-श्वापदादीनाम्=श्वापद+आदीनाम् (दीर्घः)।

**उपायेन हि यच्छक्यं तच्छक्यं न पराक्रमैः।**
**श्रृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना॥30॥**

**प्रसङ्गः**-'उपायेन कार्याणि सिध्यन्ती' त्याह -

**अन्वयः**-उपायेन यत् शक्यम् पराक्रमैः तत् न शक्यम्, हि पङ्कवर्त्मना गच्छता श्रृगालेन हस्ती हतः।

**व्याख्या**-उपायेन=बुद्ध्या, यत्=कार्यम्, शक्यं=शक्तुं योग्यम्, पराक्रमैः= बलैः, तत्=कार्यम्, न=नैव, शक्यं= शक्तुं योग्यम्, हि=यतः, पङ्कवर्त्मना= कर्दममार्गेण, गच्छता=व्रजता, श्रृगालेन=जम्बुकेन, हस्ती=गजः, हतः=मारितः।

**सरलार्थः**-लोके कार्याणि बुद्ध्या पराक्रमेण वा क्रियन्ते परं बुद्ध्या यत् कार्यं कर्तुं शक्यते तत् पराक्रमेण न, यथा श्रृगालः उपायेन बलशालिनं गजं मारितवान्।

**व्याकरणम् -प्रकृति-प्रत्ययः**-शक्यम्=शक्+यत्। गच्छता=गम्+शतृ+टा। हतः=हन्+क्त।

**सन्धिः**-यच्छक्यम्=यत्+शक्यम् (श्चुत्वं, छत्वं) हतो हस्ती=हतः+हस्ती (उत्वं गुणः)।

**तदत्र भवता स्वगृहनिर्विशेषेण स्थीयताम्। तच्छ्रुत्वा मृगः सानन्दो भूत्वा कृतस्वेच्छाऽऽहारः पानीयं पीत्वा जलासन्नवटतरुच्छायायाम् उपविष्टः।**

**व्याख्या** -तत्=तस्मात् कारणात्, भवता=त्वया, मृगेण इत्यर्थः। स्वगृह-निर्विशेषेण=आत्मनो गृहसदृशेन, अत्र=इह, वने इत्यर्थः। स्थीयताम्=निवासः क्रियताम्। तत्=मूषकराजस्य वचनम्, श्रुत्वा=आकर्ण्य, मृगः=चित्राङ्गनामा



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हरिणः, सानन्दो भूत्वा=आनन्दितो भूत्वा, कृतस्वेच्छाहारः=यथेच्छं भोजनं कृत्वा, पानीयं= जलम्,पीत्वा=पानं कृत्वा, जलासन्नवटतरुच्छायायां=जलसमीपन्यग्रोधवृक्षस्य छायायाम्, उपविष्टः=निषसाद।

**व्याकरणम् -**

**समासः-**कृतस्वेच्छाहारः=स्वस्य इच्छा स्वेच्छा स्वेच्छया आहारः स्वेच्छाहारः, कृतः स्वेच्छाहार येन सः कृतस्वेच्छाहारः (बहुब्रीहिः)।

**प्रकृति प्रत्ययः-**पीत्वा=पा+क्त्वा। कृतः=कृ+क्त। आसन्नः=आ+सद् +क्त। श्रुत्वा=श्रु+क्त्वा।

**सन्धिः-**तच्छ्रुत्वा=तत्+श्रुत्वा (श्चुत्वं-छत्वं)। जलासन्नः=जल+आसन्नः (दीर्घः)।

**कुलाचारजनाचारैरतिशुद्धः प्रतापवान्।**
**धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि॥31॥**

**प्रसङ्गः-**राज्ञो गुणान् अत्र प्रतिपादयनाह -

**अन्वयः-**कुलाचारजनाचारैः अतिशुद्धः प्रतापवान् धार्मिकः नीतिकुशलः (यः) सः स्वामी भुवि युज्यते।

**व्याख्या-** कुलाचारजनाचारैः = वंशपरम्परालोकसदाचरणैः, अतिशुद्धः = अतिपवित्रः, प्रतापवान्= शौर्यसम्पन्नः, धार्मिकः=धर्मरक्षकः, नीतिकुशलः=नयनिपुणः, (योऽस्तीति शेषः)। सः=असौ, स्वामी=राजा, भुवि=भूतले, युज्यते=नियुक्तः क्रियते।

**सरलार्थः-**नृपे इमे चत्वारो गुणा अवश्यमेव भवितव्याः, स कुलेन, सदाचारेण लोकरीतिभिश्च अतिपवित्रः, बलशाली, धर्मरक्षकः नीतिनिपुणश्च स्यात्।

**व्याकरणम् -**

**समासः-** नीतिकुशलः=नीतौ कुशलः इति नीतिकुशलः (सप्तमी तत्पु.)। कुलाचारजनाचारैः = कुलश्च आचारश्च जनाचारश्च ते कुलाचारजनाचाराः, तैः (द्वन्द्वः)।

**प्रकृति प्रत्ययः-**आचारः=आ+चर्+घञ्। प्रतापवान्=प्रताप+मतुप्+सु। धार्मिकः=धर्म+ठक्। नीतिः=नी+ क्तिन्। प्रतापवान्=प्रताप+मतुप्+सु। धार्मिकः= धर्म+ठक्। नीतिः=नी+क्तिन्।

**संधिः-**कुलाचारजनाचारैरतिशुद्धः=कुल+आचारजन+आचारैः+अतिशुद्धः (दीर्घः, रुत्वम्)।

**अथ मन्थरो ब्रूते-सखे मृग! केन त्रासितोऽसि? अस्मिन्निर्जने वने कदाचित् किं व्याधाः सःरन्ति? मृगेण उक्तम्-'अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नृपतिः, स च दिग्विजयव्यापारक्रमेण आगत्य चन्द्रभागानदीतीरे समावेशितकटको वर्तते, प्रातश्च तेनाऽत्रागत्य कर्पूरसरः समीपे भवितव्यम्' इति व्याधानां मुखात् किंवदन्ती श्रूयते, तदत्रापि प्रातरवस्थानं भयहैतुकमित्यालोच्य यथा कार्यं तथा आरभ्यताम्। तच्छ्रुत्वा कूर्मः सभयमाह-'मित्र! जलाशयान्तरं गच्छामि। ततः काकमृगावप्युक्तवन्तौ एवमस्तु' हिरण्यको विमृश्याऽब्रवीत्-पुनर्जलाशये प्राप्ते मन्थरस्य कुशलम्, स्थले गच्छतोऽस्य का विधा?**

**व्याख्या -**अथ=अनन्तरम्, मन्थरः=तन्नामा कूर्मः, ब्रूते=कथयति, सखे मृग!=प्रिय हरिण!, केन=केनचित् व्याधादिना, त्रासितोऽसि?=भयं प्रापितोऽसि? अस्मिन्=एतस्मिन्, निर्जने=मनुष्यरहिते, वने=कानने, कदाचित्=कस्मिंश्चित् समये, व्याधाः=लुब्धकाः, सःरन्ति=परिभ्रमन्ति, किम्=प्रश्ने? मृगेण=हरिणेन, उक्तम्= कथितम्, कलिङ्गविषये= कलिङ्गदेशे, रुक्माङ्गदो नाम=एतन्नामकः, नृपतिः=राजा, अस्ति=विद्यते, सः=असौ, च, दिग्विजयव्यापारक्रमेण= प्राच्यादिस्थदेशानां स्वायत्ती-करणस्यानुष्ठानपरम्परया, आगत्य=समेत्य, चन्द्रभागानदीतीरे='चन्द्रभागा'नद्याः तटे, समावेशितकटकः=सन्निवेशितशिविरः, प्रातश्च=प्रभातकाले, तेन=नृपेण, अत्र=वने, आगत्य=समेत्य, कर्पूरसरः समीपे='कर्पूर' जलाशयं समया, भवितव्यम्= आगमनीयमिति भावः, इति=एवम्, व्याधानां=लुब्धकानाम्, मुखात्= आननात्, किंवदन्ती= गाथा, श्रूयते=आकर्ण्यते, तत्=तस्मात् कारणात्, अत्रापि=इहापि, वने इत्यर्थः। प्रातः=प्रभातसमये,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अवस्थानं=स्थितिः, भयहैतुकं=त्रासफलकम्, इत्यालोच्य =इति विचार्य्य, यथा=येन प्रकारेण, कार्यं=कर्तव्यम्, तथा तद्वत्, आरभ्यताम्=क्रियताम्। तच्छ्रुत्वा=तदाकर्ण्य, कूर्मः=मन्थरः, सभयं=भयभीतः=सन्, आह=उवाच-मित्र!= सुहृत्!, जलाशयान्तरम्=अपरं जलह्रदम्, गच्छामि=व्रजामि। ततः=तदनन्तरम्, काकमृगौ अपि=वायसहरिणौ अपि, उक्तवन्तौ=कथितवन्तौ-एवमस्तु=यथा कथयसि तथा स्यात्। हिरण्यकः=तन्नामा मूषकः, विमृश्य=सम्यक् प्रकारेण विचार्य, अब्रवीत्=उवाच, पुनः=भूयः, जलाशये=तडागे, प्राप्ते=आसादिते सति, मन्थरस्य= कच्छपस्य, कुशलं=क्षेमम्, स्थले=जलरहिते स्थलभागे, गच्छतः=व्रजतः, अस्य= कूर्मस्य, का विधा=कःप्रतीकारः (अर्थात् कथं गन्तुं पारयिष्यति)।

**व्याकरणम्-**दिग्विजयव्यापारक्रमेण=दिशां विजयः दिग्विजयः, दिग्विजयस्य व्यापारः दिग्विजयव्यापारः दिग्विजयव्यापारस्य क्रमः तेन (ष.तत्पु.)। समावेशितकटकः=समावेशितः कटकः येन सः समावेशितकटकः (बहु.)।

**प्रकृति प्रत्ययः-**त्रासितः=त्रस्+णिच्+क्त। भवितव्यम्=भू+तव्यत्। कार्यम्= कृ+ण्यत्। अवस्थानम्=अव+स्था+ल्युट्। गच्छतः=गम्+शतृ+ङस्।

**संधिः-**तेनाऽत्रागत्य=तेन+अत्र+आगत्य (दीर्घः)। इत्यालोच्य=इति+ आलोच्य (यण्)। गच्छतोऽस्य= गच्छतः+अस्य सत्वम् (उत्वं-गुणः-पूर्वरूपम्) तच्छ्रुत्वा= तत्+श्रुत्वा (श्चुत्वं, छत्वम्)।

## अभ्यासार्थ-प्रश्नाः

**बहुचयनात्मकप्रश्नाः-**

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. भैरवो नाम व्याधो निवसति स्म -
   (अ) कलिङ्गप्रदेशे (ब) कल्याणकटकदेशे (स) कुरुक्षेत्रे (द) मगधदेशे ( )
2. व्याधशूकरयोः पादास्फालनेन मृतः-
   (अ) सर्पः (ब) शूकरः (स) जम्बुकः (द) मृगः ( )
3. जम्बुकस्य नाम आसीत् -
   (अ) दीर्घ रावः (ब) हिरण्यकः (स) लघुपतनकः (द) मन्थरः ( )
4. धनुषा पञ्चत्वं गतः-
   (अ) शूकरः (ब) कूर्मः (स) जम्बुकः (द) मन्थरः ( )
5. स स्वामी भुवि युज्यते यः-
   (अ) अधार्मिकः (ब) नीतिकुशलः (स) प्रतापहीनः (द) आचारैरशुद्धः ( )

**अतिलघूत्तरात्मकप्रश्नाः-**

1. व्याधो धनुरादाय मृगमन्विष्यन् कुत्र गतः?
2. मृगः केन व्यापादितः?
3. व्याधेन कीदृशः शूकरो दृष्टः?
4. 'अद्य भक्ष्यो धनुर्गुणः' इति केन कथितम्?
5. जम्बुको मृतान् कान् अपश्यत् ?
6. जम्बुकः केन हतः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

7. के नरा अप्राप्यं नाभिवाञ्छन्ति?
8. चन्द्रभागानदीतीरे कस्य शिविरः आसीत्?
9. राज्ञां परं बलं किमस्ति?
10. दुर्गं केषां परं बलम्?
11. हस्ती केन हतः?
12. 'भद्र मृग! कुशलं ते?' इति केन कथितम्?
13. मित्रं कतिविधं ज्ञेयम्?
14. सताम् आपदुद्धरणक्षमाः के भवन्ति?
15. किं न चिन्तयेत् ?

**लघूत्तरात्मकप्रश्नाः-**

1. व्याधो विन्ध्याटवीं किमर्थं गतः?
2. किं कुर्वता व्याधेन शूकरो दृष्टः ?
3. व्याधः छिन्नद्रुम इव कथं पपात?
4. सर्पः कथं मृतः?
5. जम्बुको मृतान् मृगादीन् दृष्ट्वा किमचिन्तयत्?
6. दीर्घरावः कथं पःात्वं गतः?
7. धनिनो धनं किम्?
8. कः पुरुषः विद्वान् भवति?
9. लक्ष्मीः निवासहेतोः कं पुरुषं याति?
10. जनो वृत्त्यर्थः किं न अतिचेष्टेत?
11. अर्थाः कथं न सुखावहाः ?
12. वित्तवान् सर्वत्र कथं भक्ष्यते?
13. अर्थवतां केभ्यो नित्यं भयं भवति?
14. मानवानां मध्ये को जनः श्लाघ्यः?
15. राज्ञः के चत्वारो गुणाः प्रतिपादिताः?

**निबन्धात्मकप्रश्नाः-**

1. सःायशीलजम्बुककथायाः सारो हिन्द्यां संस्कृते वा लेख्यः।
2. कृपणः परिभवपदं याति इति सविस्तरं विवेचयत।
3. वित्तवान् सर्वत्र कथं भक्ष्यते? इति प्रतिपादयत्।
4. उत्तमपुरुषस्य लक्षणं विस्तारपूर्वकं लिखत।

**उत्तरमाला (बहुचयनात्मकप्रश्नानाम्)**

(1)ब (2)अ (3)अ (4)स (5)ब।

**व्याकरणसम्बन्धिनः प्रश्नाः-**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

यथा - अप्यागत्य = अपि+आगत्य = यण्-सन्धिः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| घोराकृतिः | = | .............. | = | .......... |
| किंचिदासाद्य | = | .............. | = | .......... |
| अचिन्तयच्च | = | .............. | = | .......... |
| यथैव | = | .............. | = | .......... |
| सुखान्यपि | = | .............. | = | .......... |
| अतोऽहम् | = | .............. | = | .......... |
| करोत्यरोगम् | = | .............. | = | .......... |
| सोद्योगम् | = | .............. | = | .......... |
| सौहृदः। | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

यथा - उत्साहः = उत्+सह्+घञ्।

धनवान् = ...................

अवाप्तिः = ...................

अधीत्य = ...................

शोचितुम् = ...................

छिन्नः = ...................

परिभ्रमन् = ...................

शौर्यम् = ...................

कुर्वाणः = ...................

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकापरिवर्तनं करणीयम्-

1. स व्याधो छिन्नद्रुम इव पतति (लिट्)।
2. जम्बुको मृतान् मृगव्याधसर्पशूकरान् पश्येत् (लङ्)।
3. पण्डितबुद्धयः नष्टं शोचितुं न इच्छेयुः (लट्)।
4. ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजति (विधिलिङ्)।
5. आसीत् कलिङ्गदेशे रुक्माङ्गदो नाम नृपतिः (लट्)।

4. **(अ) असमस्तपदानां समासो विधेयः-**

यथा - भयस्य हेतुः = भयहेतुः

पाताश्च उत्पाताश्च = ........................

न सुलभम् = ........................

गतः विभवः यस्य सः = ........................

आहारस्य अर्थी = ........................

सर्वाः च ताः सम्पदः = ........................

शरणे आगतम् = ........................

**(ब) समस्तपदानां विग्रहः कार्यः-**

यथा - सत्पुरुषः = सत् च असौ पुरुषः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ब्रह्महत्यासमम् = ........................
उदकाद्याहाराः = ........................
कृतसम्बन्धम् = ........................
समावेशितकटकः = ........................
मृगकाकसर्पशूकरान् = ........................
परिभवपदम् = ........................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

यथा - लोभात् = लोभ+पंचमी+एकवचनम्+पुल्लिङ्गम्।
राज्ञाम् = ................................
लक्ष्मीः = ................................
भुवि = ................................
जले = ................................
सम्पदा = ................................
स्वेच्छया = ................................
भवद्भिः = ................................
बुभुक्षायाम्= ................................
व्यसनेभ्यः= ................................

6. कोष्ठके स्थितशब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

1. .......... गृहं गत्वा पाठं पठेत्। (तत् स्त्रीलिङ्गम्, एकववचनम्)
2. प्रमिले! ........... व्याकरणं पठ। (युष्मद्)
3. ........... फलानि खादितानि। (इदम् पुल्लिङ्गस्य एकवचनम्)
4. ........... भ्राता भरतोऽस्ति। (राम, षष्ठ्येकवचनम्)
5. ........... गृहं गच्छाव। (अस्मद्, प्रथमा द्विवचनम्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# शब्दरूपाणि

## रामः (अकारान्तपुंलिङ्गशब्दः)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रामः | रामौ | रामाः | प्रथमा |
| रामम् | रामौ | रामान् | द्वितीया |
| रामेण | रामाभ्याम् | रामैः | तृतीया |
| रामाय | रामाभ्याम् | रामेभ्यः | चतुर्थी |
| रामात्,द् | रामाभ्याम् | रामेभ्यः | पञ्चमी |
| रामस्य | रामयोः | रामाणाम् | षष्ठी |
| रामे | रामयोः | रामेषु | सप्तमी |
| हे राम! | हे रामौ! | हे रामाः! | सम्बोधनम् |

गज-अश्व-बालक-नर इत्यादयः शब्दाः अपि रामवद् भवन्ति।

## हरिः (इकारान्तपुंलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| हरिः | हरी | हरयः | प्रथमा |
| हरिम् | हरी | हरीन् | द्वितीया |
| हरिणा | हरिभ्याम् | हरिभिः | तृतीया |
| हरये | हरिभ्याम् | हरिभ्यः | चतुर्थी |
| हरेः | हरिभ्याम् | हरिभ्यः | पञ्चमी |
| हरेः | हर्योः | हरीणाम् | षष्ठी |
| हरौ | हर्योः | हरिषु | सप्तमी |
| हे हरे! | हे हरी! | हे हरयः! | सम्बोधनम् |

मुनि-कवि-रवि-गिरि-पाणिनि-भूपति इत्यादयः शब्दा अपि हरिवद् भवन्ति।

## गुरुः (उकारान्तपुंलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| गुरुः | गुरू | गुरवः | प्रथमा |
| गुरुम् | गुरू | गुरून् | द्वितीया |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| गुरुणा | गुरुभ्याम् | गुरुभिः | तृतीया |
| गुरवे | गुरुभ्याम् | गुरुभ्यः | चतुर्थी |
| गुरोः | गुरुभ्याम् | गुरुभ्यः | प:ामी |
| गुरोः | गुर्वोः | गुरूणाम् | षष्ठी |
| गुरौ | गुर्वोः | गुरुषु | सप्तमी |
| हे गुरो! | हे गुरू! | हे गुरवः! | सम्बोधनम् |

केतु-सेतु-हेतु-सुमेरु-प्रभु-मनु-कृशानु-भानु इत्यादयः शब्दाः अपि गुरुवद् भवन्ति।

## पितृ (ऋकारान्तपुंलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| पिता | पितरौ | पितरः | प्रथमा |
| पितरम् | पितरौ | पितॄन् | द्वितीया |
| पित्रा | पितृभ्याम् | पितृभिः | तृतीया |
| पित्रे | पितृभ्याम् | पितृभ्यः | चतुर्थी |
| पितुः | पितृभ्याम् | पितृभ्यः | प:ामी |
| पितुः | पित्रोः | पितॄणाम् | षष्ठी |
| पितरि | पित्रोः | पितृषु | सप्तमी |
| हे पितः! | हे पितरौ! | हे पितरः! | सम्बोधनम् |

भ्रातृ=(भाई), जामातृ= (जँवाई), देवृ=(देवर), इत्यादयः शब्दाः पितृवत्।

## रमा (आकारान्तस्त्रीलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| रमा | रमे | रमाः | प्रथमा |
| रमाम् | रमे | रमाः | द्वितीया |
| रमया | रमाभ्याम् | रमाभिः | तृतीया |
| रमायै | रमाभ्याम् | रमाभ्यः | चतुर्थी |
| रमायाः | रमाभ्याम् | रमाभ्यः | प:ामी |
| रमायाः | रमयोः | रमाणाम् | षष्ठी |
| रमायाम् | रमयोः | रमासु | सप्तमी |
| हे रमे! | हे रमे! | हे रमाः! | सम्बोधनम् |

## मति (इकारान्तस्त्रीलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| मतिः | मती | मतयः | प्रथमा |
| मतिम् | मती | मतीः | द्वितीया |
| मत्या | मतिभ्याम् | मतिभिः | तृतीया |
| मत्यै, मतये | मतिभ्याम् | मतिभ्यः | चतुर्थी |
| मत्याः मतेः | मतिभ्याम् | मतिभ्यः | प:ामी |
| मत्याः, मतेः | मत्योः | मतीनाम् | षष्ठी |
| मत्याम्, मतौ | मत्योः | मतिषु | सप्तमी |
| हे मते! | हे मती! | हे मतयः! | सम्बोधनम् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## नदी (ईकारान्तस्त्रीलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| नदी | नद्यौ | नद्यः | प्रथमा |
| नदीम् | नद्यौ | नदीः | द्वितीया |
| नद्या | नदीभ्याम् | नदीभिः | तृतीया |
| नद्यै | नदीभ्याम् | नदीभ्यः | चतुर्थी |
| नद्याः | नदीभ्याम् | नदीभ्यः | पःामी |
| नद्याः | नद्योः | नदीनाम् | षष्ठी |
| नद्याम् | नद्योः | नदीषु | सप्तमी |
| हे नदि! | हे नद्यौ! | हे नद्यः! | सम्बोधनम् |

## फलम् (अकारान्तनपुंसकलिङ्गशब्दः)

| | | |
|---|---|---|
| फलम् | फले | फलानि |
| फलम् | फले | फलानि |

शेषरूपाणि पुंलिङ्गवद् भवन्ति

## तत् (वह) पुंलिङ्गशब्दः

| | | | |
|---|---|---|---|
| सः | तौ | ते | प्रथमा |
| तम् | तौ | तान् | द्वितीया |
| तेन | ताभ्याम् | तैः | तृतीया |
| तस्मै | ताभ्याम् | तेभ्यः | चतुर्थी |
| तस्मात् | ताभ्याम् | तेभ्यः | पःामी |
| तस्य | तयोः | तेषाम् | षष्ठी |
| तस्मिन् | तयोः | तेषु | सप्तमी |

## तत् (स्त्रीलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| सा | ते | ताः | प्रथमा |
| ताम् | ते | ताः | द्वितीया |
| तया | ताभ्याम् | ताभिः | तृतीया |
| तस्यै | ताभ्याम् | ताभ्यः | चतुर्थी |
| तस्याः | ताभ्याम् | ताभ्यः | पःामी |
| तस्याः | तयोः | तासाम् | षष्ठी |
| तस्याम् | तयोः | तासु | सप्तमी |

## तत् (नपुंसकलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| तत् | ते | तानि | प्रथमा |
| तत् | ते | तानि | द्वितीया |

शेषरूपाणि पुंलिङ्गवद् भवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सर्व (सभी) पुंलिङ्गशब्दः

| | | | |
|---|---|---|---|
| सर्वः | सर्वौ | सर्वे | प्रथमा |
| सर्वम् | सर्वौ | सर्वान् | द्वितीया |
| सर्वेण | सर्वाभ्याम् | सर्वैः | तृतीया |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः | चतुर्थी |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः | प:ामी |
| सर्वस्य | सर्वयोः | सर्वेषाम् | षष्ठी |
| सर्वस्मिन् | सर्वयोः | सर्वेषु | सप्तमी |

## सर्व (स्त्रीलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| सर्वा | सर्वे | सर्वाः | प्रथमा |
| सर्वाम् | सर्वे | सर्वाः | द्वितीया |
| सर्वया | सर्वाभ्याम् | सर्वाभिः | तृतीया |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः | चतुर्थी |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः | प:ामी |
| सर्वस्याः | सर्वयोः | सर्वासाम् | षष्ठी |
| सर्वस्याम् | सर्वयोः | सर्वासु | सप्तमी |

## सर्व (नपुंसकलिङ्गशब्दः)

| | | | |
|---|---|---|---|
| सर्वम् | सर्वे | सर्वाणि | प्रथमा |
| सर्वम् | सर्वे | सर्वाणि | द्वितीया |

शेष रूपाणि पुंलिङ्गवद् भवन्ति।

## अस्मद् (मैं) सर्वनामशब्दः

| | | | |
|---|---|---|---|
| अहम् | आवाम् | वयम् | प्रथमा |
| माम्, मा | आवाम्, नौ | अस्मान्, नः | द्वितीया |
| मया | आवाभ्याम् | अस्माभिः | तृतीया |
| मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः | चतुर्थी |
| मत् | आवाभ्याम् | अस्मत् | प:ामी |
| मम, मे | आवयोः, नौ | अस्माकम्, नः | षष्ठी |
| मयि | आवयोः | अस्मासु | सप्तमी |

## युष्मद् (तू) सर्वनामशब्दः

| | | | |
|---|---|---|---|
| त्वम् | युवाम् | यूयम् | प्रथमा |
| त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः | द्वितीया |
| त्वया | युवाभ्याम् | युष्माभिः | तृतीया |
| तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः | चतुर्थी |
| त्वत् | युवाभ्याम् | युष्मत् | प:ामी |
| तव, ते | युवयोः वाम् | युष्माकम्, वः | षष्ठी |
| त्वयि | युवयोः | युष्मासु | सप्तमी |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# धातुरूपाणि

## दृश् = दृशिर् प्रेक्षणे (देखना) (लट्लकारः = वर्तमानकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यम पुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तम पुरुषः | पश्यामि | पश्यावः | पश्यामः |

## दृश् = लङ्लकारः (अनद्यतनभूतकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यम पुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तम पुरुषः | अपश्यम् | अपश्याव | अपश्याम |

## दृश् = लृट्लकारः (भविष्यत्कालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यम पुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तम पुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

## दृश् = लोट्लकारः (आज्ञार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यम पुरुषः | पश्य | पश्यतम् | पश्यत |
| उत्तम पुरुषः | पश्यानि | पश्याव | पश्याम |

## दृश् = विधिलिङ् (आज्ञाऽर्थे विध्याद्यर्थे च)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पश्येत् | पश्येताम् | पश्येयुः |
| मध्यम पुरुषः | पश्येः | पश्येतम् | पश्येत |
| उत्तम पुरुषः | पश्येयम् | पश्येव | पश्येम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### नम् = (नमस्कार करना) (लट्लकारः -वर्तमानकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नमति | नमतः | नमन्ति |
| मध्यम पुरुषः | नमसि | नमथः | नमथ |
| उत्तम पुरुषः | नमामि | नमावः | नमामः |

### नम् (लङ्लकारः-भूतकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अनमत् | अनमताम् | अनमन् |
| मध्यम पुरुषः | अनमः | अनमतम् | अनमत |
| उत्तम पुरुषः | अनमम् | अनमाव | अनमाम |

### नम् = (लृट्लकारः-भविष्यत्कालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नंस्यति | नंस्यतः | नंस्यन्ति |
| मध्यम पुरुषः | नंस्यसि | नंस्यथः | नंस्यथ |
| उत्तम पुरुषः | नंस्यामि | नंस्यावः | नंस्यामः |

### नम् = लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नमतु | नमताम् | नमन्तु |
| मध्यम पुरुषः | नम | नमतम् | नमत |
| उत्तम पुरुषः | नमानि | नमाव | नमाम |

### नम्=विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नमेत् | नमेताम् | नमेयुः |
| मध्यम पुरुषः | नमेः | नमेतम् | नमेत |
| उत्तम पुरुषः | नमेयम् | नमेव | नमेम |

### भू= सत्तायाम् (होना) लट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | भवति | भवतः | भवन्ति |
| मध्यम पुरुषः | भवसि | भवथः | भवथ |
| उत्तम पुरुषः | भवामि | भवावः | भवामः |

### भू= लङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यम पुरुषः | अभवः | अभवतम् | अभवत |
| उत्तम पुरुषः | अभवम् | अभवाव | अभवाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भू= लृट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यम पुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तम पुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

## भू= लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यम पुरुषः | भव | भवतम् | भवत |
| उत्तम पुरुषः | भवानि | भवाव | भवाम |

## भू=विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यम पुरुषः | भवेः | भवेतम् | भवेत |
| उत्तम पुरुषः | भवेयम् | भवेव | भवेम |

## स्था = गतिनिवृत्तौ (रुकना, ठहरना) लट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यम पुरुषः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तम पुरुषः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

## स्था = लङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यम पुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तम पुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

## स्था = लृट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| मध्यम पुरुषः | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| उत्तम पुरुषः | स्थास्यामि | स्थास्यावः | स्थस्यामः |

## स्था = लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | तिष्ठतु | तिष्ठताम् | तिष्ठन्तु |
| मध्यम पुरुषः | तिष्ठ | तिष्ठतम् | तिष्ठत |
| उत्तम पुरुषः | तिष्ठानि | तिष्ठाव | तिष्ठाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**स्था = विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | तिष्ठेत् | तिष्ठेताम् | तिष्ठेयुः |
| मध्यम पुरुषः | तिष्ठेः | तिष्ठेतम् | तिष्ठेत |
| उत्तम पुरुषः | तिष्ठेयम् | तिष्ठेव | तिष्ठेम |

**पा = पाने (पीना) लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यम पुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तम पुरुषः | पिबामि | पिबावः | पिबामः |

**पा = लङ् लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यम पुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तम पुरुषः | अपिबम् | अपिबाव | अपिबाम |

**पा = लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यम पुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तम पुरुषः | पास्यामि | पास्यावः | पास्यामः |

**पा= लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पिबतु | पिबताम् | पिबन्तु |
| मध्यम पुरुषः | पिब | पिबतम् | पिबत |
| उत्तम पुरुषः | पिबानि | पिबाव | पिबाम |

**पा= विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यम पुरुषः | पिबेः | पिबेतम् | पिबेत |
| उत्तम पुरुषः | पिबेयम् | पिबेव | पिबेम |

**गम्= गम्लृ गतौ (जाना) लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यम पुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तम पुरुषः | गच्छामि | गच्छावः | गच्छामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**गम् = लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यम पुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तम पुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

**गम् = लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यम पुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तम पुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

**गम्= लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यम पुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तम पुरुषः | गच्छानि | गच्छाव | गच्छाम |

**गम् = विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यम पुरुषः | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तम पुरुषः | गच्छेयम् | गच्छेव | गच्छेम |

**पच्= डुपचष् पाके (पकाना) लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पचति | पचतः | पचन्ति |
| मध्यम पुरुषः | पचसि | पचथः | पचथ |
| उत्तम पुरुषः | पचामि | पचावः | पचामः |

**पच् = लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अपचत् | अपचताम् | अपचन् |
| मध्यम पुरुषः | अपचः | अपचतम् | अपचत |
| उत्तम पुरुषः | अपचम् | अपचाव | अपचाम |

**पच्= लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पक्ष्यति | पक्ष्यतः | पक्ष्यन्ति |
| मध्यम पुरुषः | पक्ष्यसि | पक्ष्यथः | पक्ष्यथ |
| उत्तम पुरुषः | पक्ष्यामि | पक्ष्यावः | पक्ष्यामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### पच् = लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पचेत् | पचेताम् | पचेयुः |
| मध्यम पुरुषः | पचेः | पचेतम् | पचेत |
| उत्तम पुरुषः | पचेयम् | पचेव | पचेम |

### नी= णीञ् प्रापणे (ले जाना) लट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नयति | नयतः | नयन्ति |
| मध्यम पुरुषः | नयसि | नयथः | नयथ |
| उत्तम पुरुषः | नयामि | नयावः | नयामः |

### नी= लङ्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अनयत् | अनयताम् | अनयन् |
| मध्यम पुरुषः | अनयः | अनयतम् | अनयत |
| उत्तम पुरुषः | अनयम् | अनयाव | अनयाम |

### नी= लृट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नेष्यति | नेष्यतः | नेष्यन्ति |
| मध्यम पुरुषः | नेष्यसि | नेष्यथः | नेष्यथ |
| उत्तम पुरुषः | नेष्यामि | नेष्यावः | नेष्यामः |

### नी = लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नयतु | नयताम् | नयन्तु |
| मध्यम पुरुषः | नय | नयतम् | नयत |
| उत्तम पुरुषः | नयानि | नयाव | नयाम |

### नी= विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | नयेत् | नयेताम् | नयेयुः |
| मध्यम पुरुषः | नयेः | नयेतम् | नयेत |
| उत्तम पुरुषः | नयेयम् | नयेव | नयेम |

### पठ्= व्यक्तायां वाचि (पढना) लट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पठति | पठतः | पठन्ति |
| मध्यम पुरुषः | पठसि | पठथः | पठथ |
| उत्तम पुरुषः | पठामि | पठावः | पठामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**पठ् = लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यम पुरुषः | अपठः | अपठतम् | अपठत |
| उत्तम पुरुषः | अपठम् | अपठाव | अपठाम |

**पठ् = लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यम पुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तम पुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

**पठ्= लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पठतु | पठताम् | पठन्तु |
| मध्यम पुरुषः | पठ | पठतम् | पठत |
| उत्तम पुरुषः | पठानि | पठाव | पठाम |

**पठ् =विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यम पुरुषः | पठेः | पठेतम् | पठेत |
| उत्तम पुरुषः | पठेयम् | पठेव | पठेम |

**लिख्= अक्षरविन्यासे (लिखना) लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | लिखति | लिखतः | लिखन्ति |
| मध्यम पुरुषः | लिखसि | लिखथः | लिखथ |
| उत्तम पुरुषः | लिखामि | लिखावः | लिखामः |

**लिख् = लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यम पुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तम पुरुषः | अलिखम् | अलिखाव | अलिखाम |

**लिख्= लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यम पुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तम पुरुषः | लेखिष्यामि | लेखिस्यावः | लेखिष्यामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## लिख्=लोट्लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | लिखतु | लिखताम् | लिखन्तु |
| मध्यम पुरुषः | लिख | लिखतम् | लिखत |
| उत्तम पुरुषः | लिखानि | लिखाव | लिखाम |

## लिख् = विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | लिखेत् | लिखेताम् | लिखेयुः |
| मध्यम पुरुषः | लिखेः | लिखेतम् | लिखेत |
| उत्तम पुरुषः | लिखेयम् | लिखेव | लिखेम |

## सेव्= सेवा करना लट्लकारः (वर्तमानकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यम पुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तम पुरुषः | सेवे | सेवावहे | सेवामहे |

## सेव् = लङ्लकारः (अनद्यतनभूतकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | असेवत | असेवेताम् | असेवन्त |
| मध्यम पुरुषः | असेवथाः | असेवेथाम् | असेवध्वम् |
| उत्तम पुरुषः | असेवे | असेवावहि | असेवामहि |

## सेव् =लृट्लकारः (भविष्यत्कालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यम पुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तम पुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## सेव् = लोट्लकारः (आज्ञार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यम पुरुषः | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तम पुरुषः | सेवै | सेवावहै | सेवामहै |

## सेव् = विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | सेवेत | सेवेयाताम् | सेवेरन् |
| मध्यम पुरुषः | सेवेथाः | सेवेयाथाम् | सेवेध्वम् |
| उत्तम पुरुषः | सेवेय | सेवेवहि | सेवेमहि |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**याच् = (मांगना) लट्लकारः (आत्मनेपदम्)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | याचते | याचेते | याचन्ते |
| मध्यम पुरुषः | याचसे | याचेथे | याचध्वे |
| उत्तम पुरुषः | याचे | याचावहे | याचामहे |

**याच्= लङ्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अयाचत | अयाचेताम् | अयाचन्त |
| मध्यम पुरुषः | अयाचथाः | अयाचेथाम् | अयाचध्वम् |
| उत्तम पुरुषः | अयाचे | अयाचावहि | अयाचामहि |

**याच्= लृट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | याचिष्यते | याचिष्येते | याचिष्यन्ते |
| मध्यम पुरुषः | याचिष्यसे | याचिष्येथे | याचिष्यध्वे |
| उत्तम पुरुषः | याचिष्ये | याचिष्यावहे | याचिष्यामहे |

**याच्=लोट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | याचताम् | याचेताम् | याचन्ताम् |
| मध्यम पुरुषः | याचस्व | याचेथाम् | याचध्वम् |
| उत्तम पुरुषः | याचै | याचावहै | याचामहै |

**याच्=विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | याचेत | याचेयाताम् | याचेरन् |
| मध्यम पुरुषः | याचेथाः | याचेयाथाम् | याचेध्वम् |
| उत्तम पुरुषः | याचेय | याचेवहि | याचेमहि |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रार्थनापत्रं, निबन्धाः संख्याज्ञानः।

## प्रार्थनापत्रलेखनम्

### अवकाशार्थं प्रार्थनापत्रम्

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीय वरि.उपा.सं.विद्यालयः,
जयपुरम्।

विषयः - **अवकाशाय प्रार्थनापत्रम्।**

महोदयाः !

सविनयं निवेदयामि यद् अहं गतदिवसात् ज्वरेण पीडिताऽस्मि। चिकित्सकस्य परामर्शेण अहं गृहे एव तिष्ठामि। अद्याहं विद्यालयं गन्तुमक्षमाऽस्मि। अत अद्यतः त्रयाणां दिवसानां कृते रुग्णावकाशं स्वीकृत्य मामनुगृहीष्यन्ति भवन्तः।

सादरम्।

भवतां शिष्या
गार्गी
कक्षा-नवमी 'ब'

दिनाङ्कः - 4.7.2016 अनुक्रमाङ्कः 15

-

### शुल्कमुक्त्यर्थं प्रार्थनापत्रम्

सेवायाम्,

श्रीमन्तः प्रधानाध्यापकमहोदयाः,
राजकीय प्रवेशिका सं.विद्यालयः,
बाडमेरम्

विषयः - **शुल्कमुक्त्यर्थम्।**

मान्यवराः !

सविनयं निवेदयामि यद् अहम् अतीवनिर्धनपरिवारस्य बालकोऽस्मि। मम जनकः बी.पी.एल. पत्रधारकोऽस्ति। अतो मदीयं शुल्कमुक्तिं कृत्वा मामनुगृहीष्यन्ति भवन्तः।

भवतां शिष्यः
मुनिराजः
कक्षा-नवमी 'अ'

दिनाङ्कः - **5 जुलाई 2016** अनुक्रमाङ्कः **16**

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## स्थानान्तरणप्रमाणपत्रप्राप्त्यर्थं प्रार्थनापत्रम्

सेवायाम्,

श्रीमन्तः प्राचार्य महोदयाः

राजकीय वरि.उपा.संस्कृत विद्यालयः,

अजयमेरुः।

विषयः - **स्थानान्तरणप्रमाणपत्रप्राप्त्यर्थम्।**

मान्यवराः!

उपर्युक्तविषयान्तर्गतं निवेदनमस्ति यन्मया अस्य विद्यालयस्य नवमी कक्षा समुत्तीर्णा। प्रवेशिका कक्षायाम् अहं स्वग्रामे एव पठिष्यामि। नवीनविद्यालये प्रवेशार्थं स्थानान्तरणप्रमाणपत्रं नूनमावश्यकं वर्तते। अत एव मह्यं स्थानान्तरणप्रमाणपत्रं प्रदाय अनुगृह्णन्तु भवन्तः।

सादरम् -

भवतां शिष्यः

हेरम्बः

दिनाङ्क : 7 जुलाई 2016 प्रवेशिका कक्षा - 9

## भ्रात्रे पत्रम्

सवाईमाधोपुरतः

दिनाङ्कः -10 जनवरी 2016

प्रियानुज मनोज !

शुभाशीषः।

अहं ग्रामात् सोमवासरे अत्र आगतवान्। अत्राहं कुशलोऽपि सन् भूयो भूयः त्वां स्मरामि। मया पाठ्यपुस्तकानि क्रीतानि। कतिपयेषु दिवसेषु सामान्यो भविष्यामि। अद्यतः छात्रावासे स्थास्यामि। परिवारस्य समाचारं शीघ्रमेव प्रेषय। मातृपितृचरणेषु मे प्रणामाः निवेदनीयाः। स्नेहिलेभ्यः शुभाशीर्वादाः।

तवाग्रजः

लोमशः

## पित्रे पत्रम्

जयपुरतः

दिनाङ्कः 3 फरवरी 2016

पूज्यपितृचरणारविन्दयोः,

मम शतशः प्रणामाः

अत्राहं कुशलोऽस्मि। ईशानुकम्पया भवन्तोऽपि तत्र सानन्दाः भविष्यन्ति। भवता प्रेषितानि पञ्चशतरूप्यकाणि अद्य मया प्राप्तानि। एतैः परीक्षाव्ययः सम्पन्नो भविष्यति। भवतो निर्देशानुसारम् एवाहं प्रतिदिनं मनोयोगपूर्वकम् अध्ययनं कुर्वन् अस्मि। परीक्षानन्तरं गृहम् आगमिष्यामि।

भवदाज्ञाकारी पुत्रः

सुधीरः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## मित्राय पत्रम्

कोटानगरात्
दिनाङ्कः 2 फरवरी, 2016

प्रियमित्र खगेन्द्र!

सस्नेह नमस्कारः।

चिरकालानन्तरं तव पत्रं प्राप्य अतीव हर्षम् अनुभवामि। अप्रेलमासे मम वार्षिकी परीक्षा भविष्यति। सम्प्रति तु सर्वाणि अन्यानि कार्याणि विहाय अहम् अध्ययने एव संलग्नोऽस्मि। परीक्षानन्तरम् अहं गृहम् आगमिष्यामि। ग्रीष्मावकाशे वयं नैनीतालनगरं द्रष्टुं गमिष्यामः। त्वयापि अस्माभिः सह गन्तव्यः।

ज्येष्ठेभ्यो नमः, कनिष्ठेभ्यश्च शुभाशीषाः।

तव सुहृत्
रामबाबू चौधरी

-

## मात्रे पत्रम्

जोधपुरतः
दिनाङ्कः 3 मार्च, 2016

पूज्ये मातः!

भवत्याः पादपद्मेषु मे सादरं प्रणतिः।

अत्र शं तत्रास्तु। भवदीयं कृपापत्रं मया प्राप्तम्। सम्पूर्णं च वृत्तं ज्ञातम्। अद्यत्वे मम वार्षिकी परीक्षा प्रचलति। अहं दत्तावधानम् अध्ययनं करोमि। आशासे परीक्षायां प्रथमश्रेण्यां सफलो भविष्यामि। परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि। पूज्यस्य पितृवर्यस्य चरणारविन्दयोर्मम प्रणतिः।

भवत्याः स्नेहिलःपुत्रः
गणेशः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# निबन्ध-लेखनम्

## संस्कृतभाषा

शुद्धा परिष्कृता निर्दुष्टा च भाषा संस्कृत भाषा कथ्यते। भाषेयम् अस्य जगतः सर्वासु भाषासु प्राचीनतमा सर्वोत्तमसाहित्यसमृद्धा चास्ति। प्रचीनेयं भाषा सर्वासां भाषाणां जननी। संस्कृते एव भारतीया संस्कृतिः पूर्णरूपेण वसति। अतः संस्कृतं विना संस्कृतेः कल्पनापि निर्मूला सिध्यति। यतोहि सर्वप्राचीनाः ग्रन्थाश्चत्वारो वेदाः संस्कृतभाषायामेव सन्ति। तत आरण्यकाः ब्राह्मणग्रन्थाः रचिताः। अध्यात्म-विषयप्रतिपादकाः उपनिषदः, अस्माकं गौरवभूतानि षड्दर्शनानि च विश्वस्मिन् विश्वे सर्वमान्याः निधयः सन्ति।

एवमेव श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शिक्षा-कल्प-छन्दः-व्याकरण ज्योतिष-निरुक्तादयः ग्रन्थाः अतिमहत्त्वपूर्णाः सन्ति।

रामायण-महाभारत-गीता-पुराण-विविधमहाकाव्य-नाटक-नीतिशास्त्रादयो ग्रन्थाः अपि अस्माकं प्राणभूताः सन्ति। अतः संस्कृतभाषाया अध्ययनम् अध्यापनं प्रचार-प्रसारं च कृत्वेयं अमूल्यज्ञाननिधिरस्माभिः रक्षणीया।

—

## विद्या

'विद्या धनं सर्वधनं प्रधानम्' इति सर्वैः स्वीक्रियते, यतोहि विद्यया एव सर्वे जनाः सर्वाणि कार्याणि साधयितुं समर्थाः भवन्ति। विद्यां प्राप्य उन्नतिं, कीर्तिं, सुखसमृद्धिं च लभन्ते विद्वांसः। यदुक्तं केनचित् -

**मातेव रक्षति पितेव हिते नियुक्ते,**
**कान्तेव चाभिरमयत्यपनीयखेदम्।**
**लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,**
**किं किं न साधयति कल्पलतेव विद्या॥**

विद्याधनं व्यये कृते वर्धते, संचयात् च क्षयम् आप्नोति, एतस्माद् इदम् अपूर्वम् एव धनम्। अत एवोक्तम्-

**अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति।**
**व्ययतो वृद्धिमायाति क्षयमायाति संचयात्॥**

नृपाः, राष्ट-पतयः, मुख्यमन्त्रिणः, प्रधानमन्त्रिणोऽपि विविधविषयविशेषज्ञानां कवीनां, वैज्ञानिकानां मतिमतां विदुषां समादरं कुर्वाणाः तेषां उत्साहवर्धनं कुर्वन्ति पुरस्कारैः। अत अस्माभिरपि विद्या पूर्णमनोयोगेन पठनीया, गृहणीया विद्याविहीना पशु इति निर्विवादेन सिध्यति।

-

## सदाचारः

सज्जनानां आचारः सदाचारः कथ्यते। ये सज्जनाः भवन्ति तेषां व्यवहार अनुकरणीयः सर्वजनहिताय च भवति। यदुक्तम्-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**'आत्मनः प्रतिकूलानि परेषां न समाचरेत्'**

अतः सज्जनाः सहृदयाश्च यथा आचरन्ति तथैव आचरणं सदाचार उच्यते। सदाचारिणः सत्यं वदन्ति, मातृ-पितृ-गुरुजनानां च आदरं कुर्वन्ति। तेषां आज्ञां च पालयन्ति। तस्माद् एतेषां जीवनं सुखमयम् उन्नतिकारकं च भवति। सन्तोष एव पुरुषस्य परं निधानं कथ्यते। तथा च सदाचारिणो जनाः एवं सन्तोषं प्राप्नुवन्ति। असद् वृत्ताः जनाः तात्कालिकं सुखम् अथवा अस्थायिनीम् उन्नतिं तु प्राप्तुं शक्ताः दृश्यन्ते परं तेषाम् इहलोकेन सह परलोकोऽपि दूषितो भवति। अतः सदाचारस्य महती आवश्यकता दरीदृश्यते।

सदाचारपालनेन एव विवेकानन्द-गान्धि-तिलकादयो महापुरुषाः अभूवन्। सदाचाराभावेनैव दुर्योधन-कंस-रावणादयो महतो बलशालिनोऽपि सर्वैः हेयदृष्ट्या विलोक्यन्ते। अतः सर्वैः स्वोन्नत्यै समाजोन्नत्यै शान्तिव्यवस्थायै च सदाचारः पालनीयः। उक्तःा -

**वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥**

-

## परोपकारः

परेषां हितसम्पादनार्थं यानि कार्याणि क्रियन्ते, तानि सर्वाणि परोपकारशब्देन स्वीक्रियन्ते। समाजे परोपकारेण एव जनाः शान्तिपूर्वकं स्थातुं समर्थाः भवन्ति।

परोपकारभावनया एव जीवेषु परस्परं सुखस्य स्थापना भवति। परोपकारी जन एव समाजसेवां राष्ट-सेवां च कृत्वा महत् पुण्यमयं कार्यं करोति। परोपकारेण हृदयं पवित्रं सरसं विनयोपेतं च भवति। परोपकारिणः सर्वभूतेषु आत्मवत् चिन्तयन्ति। सर्वेषां गुणानां सारः परोपकार एव। अत एवोक्तम् -

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**
**धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति॥**

अत अस्माभिः सर्वैः सर्वदा परोपकार एव करणीयः, यतोहि परोपकारजं पुण्यं यज्ञशताद् अपि अधिकं भवति।

-

## स्वामी विवेकानन्दः

भारतवर्षे समये-समये अनेके महापुरुषा अभूवन्। येषां जीवनं राष्ट-ाय, समाजाय संस्कृति-रक्षायै च समर्पितम् आसीत्। तेषु विवेकानन्दो भानुना सदृशः तेजस्वी महापुरुष आसीत्। बाल्यकाले स नरेन्द्र इति नाम्ना ज्ञायते स्म। रामकृष्णपरमहंस अस्य गुरु आसीत्।

स्वामी विवेकानन्दो महान् समाजसुधारक अभवत्- 'रामकृष्णमिशन' इति संस्थायाः स्थापनां कृत्वा अनया संस्थया अनेन तत्कालिके समाजे व्याप्तकुरीतीनां प्रबलविरोधः कृतः। सतीप्रथा, कन्यावधः, बालविवाहः, जातिप्रथा अस्पृश्यता च तदानीं भीषणकुरीतयः आसन् तासां विरोधं कृत्वा उन्नत्यै समाजम् अशिक्षयत्। विधवाविवाहं स्त्रीशिक्षां च प्रारभत्।

विश्वधर्मसम्मेलने अमेरिकादेशे अद्वितीयभाषणं प्रदाय विश्वस्मिन् विश्वे भारतवर्षस्य गौरवम् अवर्धयत्, पुनर्जागरणस्य कर्मठनेता युगपुरुषोऽयं भारतस्योत्थाने महान्तं प्रयासं कृतवान्।

-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## नारीशिक्षा

नारीणां कृते शिक्षाया महती आवश्यकता वर्तते। यतोहि समये प्राप्ते ता एव मातरो भवन्ति। माता च बालकस्य प्रथमगुरुः भवति। कोमलबुद्धेः बालकस्योपरि सदुपदेशानां सत्शिक्षाणां च स्थायी प्रभावो भवति। यतोहि तस्य मस्तिष्कं निर्मलकर्गदपत्रमिव भवति। एतस्मात् कारणाद् यदि मातरोऽशिक्षिताः, विद्याशून्याः, कर्त्तव्याकर्त्तव्यज्ञानरहिताश्च भविष्यन्ति तर्हि सन्ततयोऽपि तथैव अविद्यागृस्ता भविष्यन्ति। यदि नार्यः शिक्षिताः सन्ति, तर्हि ताः स्वपुत्रपुत्रीणां पालनं रक्षणं शिक्षणादिकं च सम्यक्तया करिष्यन्ति। तस्मात् तासां सन्ततयोऽपि विद्याविनययुक्ताः स्वस्थाः सद्गुणोपेताः च भविष्यन्ति।

अपि च - यस्मिन् देशे समाजे वा स्त्रीभिः सह समानव्यवहारो भवति स एव देशः समाजो वा उन्नतिशिखरम् आरोहति।

उक्तःा मनुना -

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

अतो देशस्य समाजस्य च उन्नत्यै श्रीवृद्धये च नारीशिक्षा अत्यावश्यकी ज्ञेया।

-

## पर्यावरणम्

परितो यद् आवरणम् अस्ति तत् सर्वं पर्यावरणं कथ्यते। वयं अस्मात् सर्वतः यत् किमपि पश्यामः तत् सर्वं 'पर्यावरणम्' इति शब्देन गृह्यते। यादृशे वातावरणे वयं निवसामः तस्य प्रभावः अस्मासु भवति। यदि पर्यावरणं शुद्धं भवेत् तर्हि अस्माकं मनः, बुद्धिः, चेतः शारीरिकं स्वास्थ्यम् अपि सुष्ठु भविष्यति। अद्यत्वे पर्यावरण-शुद्धिः संकटे निपतिता। तदेव पर्यावरणप्रदूषणनाम्ना ज्ञायते तत् प्रदूषणं पःाविधं मुख्यतया भवति-

**वायुप्रदूषणम् -** यद् विविधकार्बनिकधूमेन भवति।

**जलप्रदूषणम् -** यद् विविधप्राकृतिकाप्राकृतिककारणैर्भवति।

**ध्वनिप्रदूषणम् -** महानगरेषु औद्योगिकयन्त्रैर्ध्वनिविस्तारयन्त्रैश्च भवति।

**मृदाप्रदूषणम्-** रासायनिकोर्वरकेन कीटनाशकेन च भवति।

**नाभिकीयप्रदूषणम् -** परमाणुपरीक्षणेन रेडियोधर्मिपदार्थेन च भवति।

अतो जीवनस्य रक्षायै अस्माभिः पर्यावरणं दूषितं न करणीयम्। अन्येभ्यश्चापि एतद् रक्षणीयम् इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सङ्ख्याज्ञानम्

| | | |
|---|---|---|
| एकः,एकम्,एका | द्वौ,द्वे,द्वे | त्रयः, त्रीणि,तिस्रः |
| चत्वारः,चत्वारि, चतस्रः | प:ा | षट् |
| सप्त | अष्ट, अष्टौ | नव |
| दश | एकादश | द्वादश |
| त्रयोदश | चतुर्दश | प:ादश |
| षोडश | सप्तदश | अष्टादश |
| एकोनविंशतिः | विंशतिः | एकविंशतिः |
| द्वाविंशतिः | त्रयोविंशतिः | चतुर्विंशतिः |
| प:ाविंशतिः | षड्विंशतिः | सप्तविंशतिः |
| अष्टाविंशतिः | एकोनत्रिंशत् | त्रिंशत् |
| एकत्रिंशत् | द्वात्रिंशत् | त्रयस्त्रिंशत् |
| चतुस्त्रिंशत् | प:ात्रिंशत् | षट्त्रिंशत् |
| सप्तत्रिंशत् | अष्टत्रिंशत् | एकोनचत्वारिंशत् |
| चत्वारिंशत् | एकचत्वारिंशत् | द्विचत्वारिंशत् |
| त्रिचत्वारिंशत् | चतुश्चत्वारिंशत् | प:ाचत्वारिंशत् |
| षट्चत्वारिंशत् | सप्तचत्वारिंशत् | अष्टचत्वारिंशत् |
| एकोनप:ाशत् | प:ाशत् | एकप:ाशत् |
| द्विप:ाशत् | त्रिप:ाशत् | चतु:प:ाशत् |
| प:ाप:ाशत् | षट्प:ाशत् | सप्तप:ाशत् |
| अष्टप:ाशत् | एकोनषष्टिः | षष्टिः |
| एकषष्टिः | द्विषष्टिः | त्रिषष्टिः |
| चतुःषष्टिः | प:ाषष्टिः | षट्षष्टिः |
| सप्तषष्टिः | अष्टषष्टिः | एकोनसप्ततिः |
| सप्ततिः | एकसप्ततिः | द्विसप्ततिः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| त्रिसप्ततिः | चतुःसप्ततिः | पःासप्ततिः |
| षट्सप्ततिः | सप्तसप्ततिः | अष्टसप्ततिः |
| एकोनाशीतिः | अशीतिः | एकाशीतिः |
| द्व्यशीतिः | त्र्यशीतिः | चतुरशीतिः |
| पःाशीति | षडशीतिः | सप्ताशीतिः |
| अष्टाशीतिः | एकोननवतिः | नवतिः |
| एकनवतिः | द्विनवतिः | त्रिनवतिः |
| चतुर्नवतिः | पःानवतिः | षण्णवतिः |
| सप्तनवतिः | अष्टनवतिः | एकोनशतम् |
| शतम् | 1000. सहस्रम् | 10000. अयुतम् |

100000. लक्षम्, कोटिः, अर्बुदम्।



Downloaded from https:// www.studiestoday.com